॥ श्रीः ॥

श्रीपाञ्चरात्रे भगवच्[illegible]

प्रतिष्ठाविधिः

(श्रीपाद्मसंहितानुसारी)

श्रीशेलान्त्यवेङ्कटाचार्यविरचितः

श्रीमन्महीशूरपुरास्थानधर्माधिकारिणां महामहोपाध्यायानां
लक्ष्मीपुराभिजनानां
श्रीनिवासाचार्याणां
प्रत्यवेक्षणेन

व्याकरणवेदान्तविदुषा श्रीवैखानसप्रधानाध्यापकेन
चक्रवर्ती तिरुमलाचार्येण
संशोधितः



मैसूरु
राजकीय शाखामुद्रालये सम्मुद्रितः
१९४३

॥ श्रीः ॥

पी ठि का

अयि ! महाशयाः,

इह खलु लोके सर्वेऽपि जनास्सुखाभिलाषिणो दरीदृश्यन्ते । न तु दुःखाभिलाषिण इति विदितचरमेव तत्रभवतां भवतां सर्वेषामेव ॥

सर्वेषां अभिलाषास्पदं च सुखं कीदृशम् ? कथञ्च तत्प्राप्तिः ? इत्यादि विषये जनाः बहुधा विप्रतिपद्यन्ते ॥

तत्रतावत् ऐहिकस्यामुष्मिकस्य वाऽपवर्गव्यतिरिक्तस्य सर्वस्यापि सुखस्याल्पत्वास्थिरत्वदुःखमूलत्वादिदोषसम्भिन्नतया प्रेक्षावतां विवेकधनानां कदापि त्रैवर्गिकं सुखं न मनोरथगोचरतामप्यापद्यते । तादृशदोषगन्धशङ्कादूरमापवर्गिकं सुखन्तु स्वरूपानुरूपम् विवेकशीलानामादरणीयमिति त्रयीशरणानां सरणिः ॥

तथा च प्रेक्षावद्भिस्तादृशनित्यनिरतिशयसुखस्वरूपं, तत्प्राप्तृस्वरूपं, तत्प्रापयितृस्वरूपं, तत्प्राप्त्युपायः, तत्प्राप्तिविरोधिस्वरूपञ्चेत्यर्थपञ्चकमवश्यं ज्ञातव्यं भवति । जोघुष्यते चेदमेव सकलवेदसारभूतमिति ॥

प्राप्यस्य ब्रह्मणो रूपं प्राप्तुश्च प्रत्यगात्मनः ।
प्राप्त्युपायं फलञ्चैव तथा प्राप्तिविरोधि च ॥
वदन्ति सकला वेदास्सेतिहासपुराणकाः ॥ इति ॥

एवञ्च तादृशनित्यसुखरूपमोक्षस्य प्राप्तिः "क्षयन्तमस्य रजसः पराके" "तद्विष्णोः परमं पदं" "सहस्रस्थूणे विमिते दृढ उत्रे यत्र देवानामधिदेव आस्ते" "वैकुण्ठभुवनलोकं गमिष्यति" ॥

वैकुण्ठे तु परे लोके श्रिया सार्धं जगत्पतिः ।
आस्ते विष्णुरचिन्त्यात्मा भक्तैर्भागवतैस्सह ॥

सर्वात्मसाधारणनाथगोष्ठी
पूरेऽपि दुष्पूरमहावकाशम् ।
आस्थानमानन्दमयं सहस्र-
स्थूणादिनाम्ना तमवाप्तवानि ॥

इत्यादि सोपबृंहणश्रुतिशतसमधिगते देशविशेषे एवेति नैगमिकः पन्थाः ॥

तादृशाप्राकृतदेशविशेषे शुद्धसत्वमयपूर्णषाड्गुण्यविग्रहो, हेयप्रतिभटाकल्याणगुणाकरः स्वानुरूपपत्नीपरिजनविशिष्टः परो नारायणः नित्यसूरिपरिषत्संसेव्यमानो मोक्षप्रदो भगवान्विभ्राजत इत्यनुपदमुदाहृतैरेव प्रमाणगणैरवगम्यते ॥

एवं देशविशेषे नित्यसूरिपरिषत्संसेव्यमानोऽपि देशान्तरगतपुत्रविषयकवात्सल्यवान्पितेव करुणाविष्टमानसोऽवाप्तसमस्तकामः आश्रितवात्सल्यैकजलधिः "आनीदवातं स्वधया तदेकम्" इत्यादिश्रुतिसिद्धस्वानुरूपस्वरूपगुणविभवैश्वर्याद्यनन्तकल्याण — गुणगणश्रीसहायः परब्रह्माभिधानः "सदेव सौम्येदमग्र आसीत्" "असदेवेदमग्र आसीत्" "ब्रह्म वा इदमग्र आसीत्" "आत्मा वा इदमग्र आसीत्" "एको ह वै नारायण आसीत्" इत्यादिश्रुतिषु सामान्यविशेषन्यायेन सद्ब्रह्मात्मादिशब्दैः प्रतिपिपादयिषितः नारायण एव द्विपरार्धावसानकाले नामरूपविभागानर्हसूक्ष्मदशामापन्नः प्रलीनकरणकळेबरानचिदविशेषान्प्रळयसीमनि सञ्चरतो जन्तून्करुणयावलोक्य तेषां करणकळेबरादीन् घटयितुं दयया जगत्ससर्ज । तदिदं सर्वमभिप्रेत्याचार्यपादा अन्वगृह्णन् ॥

अचिदविशिष्टान्प्रळये जन्तूनवलोक्य जातनिर्वेदा ।
करणकळेबरयोगं वितरसि वृषशैलनाथ करुणे त्वम् ॥ इति ॥

जगत्सृष्टौ च कृपैव प्रधानं कारणम् । कृपा नाम स्वार्थनिरपेक्षपरदुःखनिराचिकीर्षात्मकस्सङ्कल्पः । तयैव कृपया नित्यसुखैकसाधनभूतपरमपुरुषार्थप्रदस्वपरिचर्यार्थमेव करणकळेबरादिप्रदानञ्चाकरोत् । उक्तञ्च—

विचित्रा देहसम्पत्तिरीश्वराय निवेदितुम् । इति ॥

एवं स्थितेऽपि हस्तपादादिपरिकरपरिकर्मिता जीवा निखिलदुःखनिदानभूतविषयान्तरेष्वासक्ता माभूवन्निति पर्यालोच्य तदभिलषितसम्पत्प्राप्त्युपायप्रकाशनबहुलां सोपबृंहणां त्रयीं प्रवर्तयामास । एवमपि—

लब्ध्वा तु मानुषं देहं पञ्चभूतसमन्वितम् ।
मामेव न प्रपद्यन्ते ततो दुःखतरं नु किम् ॥
शुभमिदमुपलभ्य मानुषत्वं
सुकृतलवेन वृथेन्द्रियार्थहेतोः ।
रचयति कुरुते न मोक्षमार्गं
स दहति चन्दनमाशु भस्महेतोः ॥
महता पुण्यपण्येन क्रीतेयं कायनौस्त्वया ।
प्राप्तुं दुःखोदधेः पारं त्वर यावन्न भिद्यते ॥
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥

इत्यादि नारसिंहवराहपुराणाद्युक्तप्रकारेण देवादिभ्योऽप्युत्कृष्टतरसर्वोपकरणसमृद्धिमन्तोऽपीमे जीवाः परत्वसौलभ्यादिप्राप्यत्वौपयिकगुणाकरस्य भगवतः सर्वदेशसर्वकालसर्वावस्थोचितसर्वविधैकैङ्कर्येषु स्वरूपयोग्यतया नित्यसूरिवद्दायभागिनोऽप्यनादिमायया ऽऽवृताः प्रकृतिमरुकान्तारे परिभ्रमन्तः तत्त्वहितविषयकयथावत्प्रकाशरहिता मृगयासक्तनृपतिकुलपरिभ्रष्टशबरकुलप्रविष्टराजकुमारवत्स्वाभाविकं स्वस्वरूपं शेषत्वादिकं विस्मृत्य परस्वरूपं शेषित्वादिकमात्मन्यारोप्य बंभ्रम्यन्ते । एवं भ्रान्तजीवात्मोद्दिधीर्षया "सर्वस्य शरणं सुहृत्" "मित्रभावेन सम्प्राप्तं न त्यजेयं कथञ्चन। दोषो यद्यपि तस्य स्यात्" "सर्वलोकशरण्याय" "सुहृदं सर्वभूतानाम्" "समोऽहं सर्वभूतेषु"—

ब्राह्मणैः क्षत्रियैर्वैश्यैश्शूद्रैश्च कृतलक्षणैः ।
अर्चनीयश्च सेव्यश्च पूजनीयश्च माधवः ॥

सात्वतं विधिमास्थाय गीतस्सङ्कर्षणेन यः ।
अपि वर्णापकृष्टस्तु नारीवाधर्मकाङ्क्षिणी ॥
तावप्येतेन मार्गेण गच्छेतां परमां गतिम् ॥

इत्यादिश्रुतिरामायणगीताभारताद्युक्तप्रकारेण जातिगुणवृत्तादि-वैषम्यवतामपि शरण्यत्वे विशेषरहितस्सर्वरक्षको भगवान् समर्थ-मसमर्थञ्चाधिकारिणमुद्दिश्य प्राधान्येन स्वाराधनावबोधकमागम-नामकं शास्त्रं विखनसब्रह्मरुद्रेन्द्रादिमुखेन लोके प्रवर्तयामास। स्वयमेव च—

वेदान्तेषु यथासारं सङ्गृह्य भगवान् हरिः ।
भक्तानुकम्पया विद्वान् सञ्चिक्षेप यथासुखम् ॥

इत्याद्युक्तप्रकारेण पञ्चरात्राख्यं शास्त्रं चतुर्मुखायोपदिदेश । तदुक्त-मागमप्रामाण्ये—

"सकलसहजसंवेदनसाक्षाद्भवदखिलवेदराशि-प्रकीर्णविविध-विध्यर्थवादमन्त्रात्मकानेकशाखाध्ययनादिष्वधीरधियो भक्तानव-लोक्य तदनुकम्पया लघुनोपायेन तदर्थं सङ्क्षिप्योपदिदेश" इति ॥

तथा चास्मिन् शास्त्रे चेतनैरनुष्ठीयमाननित्यनैमित्तिक-काम्यरूपसर्वविधकर्मसमाराध्यः तत्तत्फलप्रदश्च भगवानेवेति ॥

शरीरारोग्यमर्थांश्च भोगांश्चैवानुषङ्गिकान् ।
ददाति ध्यायिनां नित्यमपवर्गप्रदो हरिः ॥

इत्यादिना प्रत्यपादि ॥

तादृशमुक्तप्राप्यस्य परस्य ब्रह्मणस्स्वरूपम्

परस्मिन्व्यूहाख्ये विभवनिवहेऽर्चावतरणे
तथैवान्तर्भेजद्धृदयनिकारादिनियमाः ।
निरुध्य स्वं चित्तं निरवधिमहानन्दजलधौ
निरस्तान्यापेक्षा नयत सफलङ्कालमखिलम् ॥

इत्यादिना श्रीमदाचार्यैरनुगृहीतदिशा पर, व्यूह, विभव, अन्तर्यामी, अर्चा—इति पञ्चधा प्रतीयते ॥

तत्र परस्वरूपम्

"सत्यं ज्ञानमनन्तं ब्रह्म" "विज्ञानमानन्दं ब्रह्म" इत्यादिश्रुतयः सत्यत्वज्ञानत्वानन्तत्वानन्दत्वामलत्वादिस्वरूपनिरूपकधर्मैर्विशिष्टं धारणार्थं नियमनार्थं च जगति व्याप्य वर्तमानं वस्तु प्रतिपादयन्त्यः कारणस्वरूपं शाधयन्ति। अस्यैव कारणरूपस्य परस्य ब्रह्मणः शुभाश्रयवैशिष्ट्यं "एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते" "न तस्य कार्यं करणं च विद्यते" "पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" "तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम्" "सकारणं करणाधिपाधिपः" "सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते" "वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसस्परस्तात्" "सर्वेऽनिमेषा जज्ञिरे विद्युतस्पुरुषादधि" इत्याद्याश्रुतयः प्रतिपादयन्ति॥

विष्वक्सेनसंहितायाम्

"वैकुण्ठे तु परे लोके श्रीसहायो जनार्दनः" इत्यादिना "दक्षिणं जानुके न्यस्य लम्बयन् जगतां पतिः" इत्यन्तेन ॥

पाद्मसंहितायाम्

"आदिमध्यान्तरहितमवृद्धिक्षयमच्युतम्" इत्यादिना "पश्यन्ति सूरयश्चक्षुर्विष्णोः परमं पदम्" इत्यन्तेन। एवमेव ईश्वर-विष्णुतिलक-बल-पौष्कर-श्रीसात्वत-सौमन्तव-भार-द्वाज-सङ्कर्षण-जय-जयोत्तरानन्दादिसंहितासु च परब्रह्मणः शुभाश्रय-वैशिष्ट्यं प्रत्यपादि ॥

व्यूहावतारः

पूर्वोक्तादृशरूपविशिष्टस्य ब्रह्मणः "अजायमानो बहुधा विजायते" "तस्य त्वष्टा विदधद्रूपमेति" इत्यादिश्रुतिषु नानाविधव्यूहाद्यवतारः प्रतीयन्ते ॥

अवतारो नाम—"उपासकानुग्रहार्थं समाश्रयणीयत्वौपयिक-परत्वसौलभ्यादिदिव्यगुणविशिष्टस्यैव सतः स्वेच्छया देवतिर्यङ्मनुष्यादिसंस्थानसजातीयसंस्थानदिव्यरूपपरिग्रहः ॥

अस्य च भगवतश्शरीरनिषेधवचनानि तु पुण्यपापरूपकर्महेतुकसुखाद्यर्थप्राकृतदेहसम्बन्धरूपजन्मनिषेधपराणि अयञ्चार्थः "अजायमानो बहुधा विजायते" इति श्रुत्या प्रकटीकृतः ॥

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥
यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥

इत्यादिगीतावचनान्यपि पूर्वोक्तश्रुतिमुपबृंहयन्ति ॥

किञ्च उत्पत्त्यसम्भवाधिकरणशङ्करभाष्ये (२-२-४२) "तत्र भागवता मन्यन्ते भगवानेवैको वासुदेवः निरञ्जनज्ञानस्वरूपः परमार्थतत्त्वं चतुर्धाऽऽत्मानं प्रविभज्य प्रतिष्ठितो वासुदेवव्यूहरूपेण सङ्कर्षणव्यूहरूपेण प्रद्युम्नव्यूहरूपेणानिरुद्धव्यूहरूपेण च । वासुदेवो नाम परमात्मोच्यते । सङ्कर्षणो नाम जीवः । प्रद्युम्नो नाम मनः । अनिरुद्धो नामाहङ्कारः । तेषां वासुदेवः परा प्रकृतिः, इतरे सङ्कर्षणादयः कार्यम् । तमित्थंभूतं परमेश्वरं भगवन्तमभिगमनोपादानेज्यास्वाध्याययोगैर्वर्षशतमिष्ट्वा क्षीणक्लेशो भगवन्तमेव प्रतिपद्यते इति" । आगमप्रामाण्ये च "वासुदेवः परा प्रकृतिः परमात्मा ततः सङ्कर्षणो नाम जीवो जायते । सङ्कर्षणात्प्रद्युम्नसंज्ञं मनो जायते । ततोऽनिरुद्धनामाऽहङ्कारो जायत" इति ॥

अत्र सङ्कर्षणप्रद्युम्नानिरुद्धानां जीवमनोऽहङ्कारव्यपदेशः तत्तत्त्वाभिमानित्वनिबन्धनः । एषां स्वरूपं, उत्पत्तिः, प्रयोजनादिकञ्च—

षाड्गुण्याद्वासुदेवः पर इति स भवान्मुक्तभोग्यो बलाढ्या-
द्बोधात्सङ्कर्षणस्त्वं हरसि वितनुषे शास्त्रमैश्वर्यवीर्यात् ।
प्रद्युम्नस्सर्गधर्मौ नयसि च भगवन्शक्तितेजोऽनिरुद्धो-
बिभ्राणः पासि तत्त्वं गमयसि च तथा व्यूहरङ्गाधिराज ॥

इत्यभियुक्तवचनेन प्रपञ्चितम् ॥

विभवावतारः

विशेषेण भवति आविर्भवतीति विभवः रामकृष्णाद्यवतारः

"परित्राणाय साधूना" मिति श्लोकोक्तस्वावतारप्रयोजनं भगवतः मत्स्यादिदशस्ववतारेष्ववगम्यते ॥

रामकृष्णाद्यवतारेषु सर्वसमाश्रयणीयत्वौपयिकपरत्वसौल-भ्यादिगुणविशिष्टविग्रहवत्वं सुस्पष्टमेव प्रपञ्चितं श्रीरामायण-भागवतादिषु॥

एवं च अप्राकृत इव प्राकृतेऽपि लोके स्वेच्छयाऽवतीर्णस्य दिव्यमङ्गलविग्रहविशिष्टस्य अजत्वाव्ययत्वाभ्यां सत्यत्वम्, भूता-नामीश्वरोऽपि स" न्नित्यनेन अजहत्स्वस्वभावत्वम्, "प्रकृतिं स्वामधिष्ठाये" त्यनेन शुद्धसत्वमयद्रव्यप्रकृतिकत्वं "संभवाम्या-त्ममायये" त्यनेन स्वोत्पत्तौ स्वेच्छामात्रस्य कारणत्वम्, "यदा यदा हि धर्मस्ये" त्यनेन धर्मोपरोधसमयोत्पत्तिकत्वं "परित्राणाय साधूना" मित्यनेन आनुषङ्गिकदुष्टशिक्षणपूर्वकं परमप्रयोजनभूत-साधुपरित्राणार्थत्वं च प्रपञ्चितं भवति॥

दुष्टशिक्षणस्य सङ्कल्पमात्रेणाऽपि साध्यतयाऽनुषङ्गिकत्वं साधुपरित्राणमेव परमं प्रयोजनम्॥

यन्मुहूर्तं क्षणं वाऽपि वासुदेवो न चिन्त्यते।
सा ह्यानिस्तन्महच्छिद्रं सा भ्रान्तिः सा च विक्रिया॥
वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः।
न शौरिचिन्ताविमुखजनसंवासवैशसम्॥
विलासविक्रान्तपरावरालयं
नमस्यदार्तिक्षपणे कृतक्षणम्।
धनं मदीयं तव पादपङ्कजं
कदानु साक्षात्करवाणि चक्षुषा॥

इत्याद्युक्तप्रकारेण भगवत्प्रीतिजनकव्यापाररूपभगवदाराधनेन साक्षात्कारमपेक्षमाणानां तद्दर्शनेन विना जीवितमलभमानाना-माराधकानां स्वस्वरूपप्रदर्शनादिना जीवयितृत्वमेव साधुपरि-त्राणम्। इदमेवावतारस्य परमं प्रयोजनम्। तथा च श्री-मद्भाष्यकारैरेवमनुगृहीतं गीताभाष्ये—

"साधवः उक्तलक्षणधर्मशीलाः वैष्णवाग्रेसराः मत्समाश्रयणे प्रवृत्ताः मन्नामकर्मस्वरूपाणां वाङ्मनसागोचरतया मद्दर्शनादृते स्वात्मधारणपोषणमलभमानाः क्षणमात्रकालं कल्पसहस्रं मन्वानाः प्रशिथिलसर्वगात्रा भवेयुरिति मत्स्वरूपचेष्टितावलोकनालापनादिदानेन तेषां परित्राणाय तद्विपरीतानां विनाशाय च क्षीणस्य वैदिकस्य धर्मस्य मदाराधनरूपस्याराध्यप्रदर्शनेन स्थापनाय च देवमनुष्यादिरूपेण युगे युगे सम्भवामि। कृतत्रेतादियुगविशेषानियमोऽपि नास्तीत्यर्थः॥

एवं च अवताराणां स्वरूपेण, प्रकारेण, द्रव्येण, हेतुना, कालेन, फलेन च दिव्यत्वं वक्ष्यमाणप्रमाणैः सिद्धं भवति। तदुक्तं विष्णुपुराणे—

समस्ताश्शक्तयश्चैताः नृप यत्र प्रतिष्ठिताः।
तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत्॥
समस्तशक्तिरूपाणि तत्करोति जनेश्वर।
देवतिर्यङ्मनुष्याख्या चेष्टावन्ति स्वलीलया॥
जगतामुपकाराय न सा कर्मनिमित्तजा॥ इति।

महाभारते—

न भूतसङ्घसंस्थानो देहोऽस्य परमात्मनः।
न तस्य प्राकृता मूर्तिर्मांसमेदोऽस्थिसम्भवा॥
नैव गर्भत्वमापेदे न योन्यामवसत्प्रभुः। इति॥

गीतायां—

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्।
परं भावमजानन्तो मम भूतमहेश्वरम्॥ इति।

तथा—

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः।
परं भावमजानन्तो ममाव्ययमनुत्तमम्॥

इति च। एतत्सर्वमभिप्रेत्य श्रीभाष्यकारैः एवमनुगृहीतम्। "एतदुक्तं भवति। परस्यैव ब्रह्मणो निखिलहेयप्रत्यनीकानन्तज्ञाना-

नन्दैकस्वरूपतया सकलेतरविलक्षणस्य स्वाभाविकानवधिकातिशयासङ्ख्येयकल्याणगुणगणाश्च सन्ति । तद्वदेव स्वाभिमतानुरूपैकरूपाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्वल्यसौन्दर्य - सौगन्ध्यलावण्य यौवनाद्यनन्तगुणगणनिधिदिव्यरूपमपि स्वाभाविकमास्त । तदेवोपासकानुग्रहेणतत्तत्प्रातिपस्यनुरूपसंस्थानं करोत्यपारकारुण्यसौशील्यवात्सल्यौदार्यजलनिधिर्निरस्तनिखिलहेय - गन्धोऽपहतपाप्मा परमात्मा परंब्रह्म पुरुषोत्तमो नारायण इति ॥

अन्तर्यामी

योगिनां हृदयगुहासु परात्मध्यानसौकर्याय परिगृहीतोऽङ्गुष्ठप्रमितरूपविशेषः । हृदयगुहासु पूर्वोक्तप्रकारेण चिन्तनाधिकारस्तु योगिनामेव । तथा चोक्तम्—

अष्टाङ्गयोगसिद्धानां हृद्यागनिरतात्मनाम् ।
योगिनामधिकारस्स्यादेकस्मिन्हृदये शये ॥ इति ।
नित्यमुक्तोपभाग्यत्वात्परव्यूहात्मनो हरेः ।
तत्कालसन्निकृष्टैकभोग्यत्वाद्विभवात्मनः ॥
विशुद्धयोगसंसिद्धेश्चिन्त्यत्वादन्तरात्मनः ॥

इत्याद्युक्तप्रकारेण पराद्यन्तर्याम्यन्तानामवताराणां देशकालादिविप्रकर्षान्मांसचक्षुषामस्मदादीनां साक्षात्तदाराधनादिना आनन्दस्यानुभवितुमशक्यतया अनधिकारात् ॥

अर्चा

आनन्दरूपस्य निरन्तरसाक्षात्कारानुबुभूषारूपपरमभक्तिसाध्यस्य विवेकिभिरपेक्ष्यमाणस्य मोक्षस्य प्राप्तये सुलभोपायभूतदर्शन-श्रवण - कीर्तन - ध्यानार्चन - प्रणामादिरूपाराधनाधिकारसिद्धयर्थं "अर्चात्मन्येव सर्वेषामधिकारो निरङ्कुश" इत्युक्तदिशा भगवता अस्मदादिष्वव्याजवात्सल्याद्रत्नादिषड्द्रव्यात्मना यो रूपपरिग्रहः सैवार्चा ॥

अर्चा नाम अर्च्यत इत्यर्चापदाभिधेयः प्राकृतसुवर्णरजतादिपरिकल्पितः परव्यूहविभवाद्यप्राकृतदिव्यमङ्गळविग्रहसमानाकारः

तादृशविग्रहविशिष्टभगवदधिष्ठितः भगवतो वासुदेवस्य मूर्तिविशेषः ॥

स च यद्यपि प्रतिष्ठादितश्प्राक्प्राकृत एव। तथाऽपि शास्त्रीयप्रतिष्ठादिसंस्कारवशात् तदनुप्रविष्टस्य अप्राकृतशुभाश्रयत्वात् तत्संश्लिष्टस्य प्राकृतस्याप्यस्य बिम्बस्य शुभाश्रयत्वं षाड्गुण्यप्रकाशकशुद्धसत्वद्रव्यमयत्वं मोक्षप्रदत्वौपयिकमहिमवत्वञ्च प्रमाणशतबलादप्रत्याख्येयं प्रमाणशरणैः ॥

पञ्चोपनिषदात्मानं दिव्यमङ्गळविग्रहम्।
स्वामिन् लक्ष्मीश भगवन् सन्निरुन्धस्व विग्रहे ॥

इत्याद्युक्तप्रकारेण भागवतप्रार्थनानिबन्धनभगवत्सङ्कल्पासिद्धः अनयोस्संसर्गविशेषः शास्त्रोक्तप्रतिष्ठादिना सिध्यति ॥

तथा च पौष्करसंहितायाम्—

देवो वैकुण्ठनाथस्तु अनन्तासनसंस्थितः।
सेव्यश्श्रीभूमिनीळाभिः प्रादुर्भावैस्तथाऽखिलैः ॥
बिम्बाकृत्यात्मना बिम्बे समागत्यावतिष्ठते।
अर्चायां लौकिकी या सा भगवद्भावितात्मनाम् ॥
मन्त्रमन्त्रेश्वरन्यासात्सापि षाड्गुण्यविग्रहा। इति

विवृतं चेदं श्रीमद्रहस्यत्रयसारव्याख्यायां सारास्वादिन्यां तत्त्वत्रयाधिकारे—

"बिम्बः आराधकैर्यथारुचि सुवर्णरजतादिनिर्मिता प्रतिमा। तस्या आकृतिरिव आकृतिर्यस्य स बिम्बाकृतिः। स चासावात्मा चेति कर्मधारयः। अत्रात्मशब्दो विग्रहपरः बिम्बसदृशविग्रहेणेत्यर्थः। बिम्बे प्रतिमायां समागत्य समित्येकीकारे नीरक्षीरवदविभागेन संश्लेषविशेषं प्राप्येत्यर्थः" इति। शरणागतिगद्यव्याख्यायाम्—

नानारूपेष्वपि हि व्यूहविभवार्चावतारेषु अप्राकृतत्वशुभाश्रयत्वादिकं "समस्ताश्शक्तयश्चैता नृप यत्र प्रतिष्ठिताः" "समस्तशक्तिरूपाणि" "बिम्बाकृत्यात्मना बिम्बे" इत्यादिभिरुच्यते। परव्यूहादिवत् तत्तद्विग्रहानुप्रवेशादर्चायामपि षाड्गुण्यप्रकाशकशुद्ध-

सत्कृत्यार्थः " इति । न्यायसिद्धाञ्जने नित्यविभूतिपरिच्छेदेऽप्याचार्यैरेवमनुगृहीतम्—

" स्वयंव्यक्तदैवार्षादयस्त्वर्चावतारभेदाः । दैवादिष्वपि विशिष्टप्रतिष्ठानन्तरमप्राकृतत्वमनुसन्धेयम् । प्राकृताप्राकृतसंसर्गोऽपि नानुपपन्नः अन्यथा प्राकृतलोके भगवदवतारादः परमपदेऽप्यर्चिरादिमार्गेण सूक्ष्मशरीरस्य वैदिकपुत्रादेर्वा गमनं कथं घटेत " इति ॥

एवञ्च शिल्पिनिर्मितस्य प्राकृतस्याप्यर्चाविग्रहस्य प्रतिष्ठादिना षाड्गुण्यप्रकाशकशुद्धसत्वमयद्रव्यप्रकृतिकत्वशुभाश्रयत्वादीनां पूर्वोक्तप्रमाणगणप्रतिपन्नत्वेन मुमुक्षूपास्यत्वमविरुद्धम् । तथा चोक्तं भगवता शौनकेन—

सुरूपां प्रतिमां विष्णोः प्रसन्नवदनेक्षणाम् ।
कृत्वाऽत्मनः प्रीतिकरीं सुवर्णरजतादिभिः ॥
तामर्चयेत्तां प्रणमेत्तां यजेत्तां विचिन्तयेत् ।
विशत्यपास्तदोषस्तु तामेव ब्रह्मरूपिणीम् ॥

इति ॥

अर्चात्मनाऽवतीर्णं मां जानन्तोऽपि विमोहिताः ।
कृत्वा दारुशिलाबुद्धिं गच्छन्ति नरकायुतम् ॥

इत्युक्तदिशा अर्चायां भगवन्तमजानतां नरकादिप्रवेशरूपदोषस्य प्रतिपादनात् ॥

एतावता अर्चायाः मुमुक्षूपास्यत्वं सिद्धम् ॥

साचाऽर्चा प्रतिष्ठितैवाराध्या न त्वप्रतिष्ठिता । अप्रतिष्ठितविग्रहाराधने राजराष्ट्रक्षोभादीनां बहूनां दोषाणां भगवच्छास्त्रे प्रतिपादनात् ॥

सर्वत्र व्यापिनो भगवतः शिल्पिनिर्मिते कस्मिंश्चिद्विग्रहे प्रतिष्ठा नाम का ? कीदृशश्च प्रतिष्ठादिना तत्र भगवतस्सान्निध्यविशेषः ? इत्याद्याशङ्काः शास्त्रेष्वेवं परिहृताः ॥

पाद्मसंहितायाम्—

व्यापिनो देवदेवस्य प्रतिष्ठा कीदृशी मता ।
भगवन् संशयानस्य मम निश्चयतो वद ॥

सर्वस्य भूतजातस्य हरिरात्मा स्थितोऽपि सन् ।
मन्त्रवीर्याच्च माहात्म्यात् स्थापकस्य गुरोस्तथा ॥
प्रतिमायां प्रकर्षेण सन्निधत्ते हरिस्स्वयम् ।
कामानशेषांस्तत्रैव हरिमर्थयते जनः ॥
तेन प्रतिष्ठा नामेदमन्वर्थं वर्तते भुवि ।
यथा च वह्निर्दहनो न दहन्व्याप्य तिष्ठति ॥
अरणीमथनाद्भूयो जायमानः प्रदृश्यते ।
दहनादीनि कर्माणि करोति च यथातथम् ॥
तथा सर्वगतो विष्णुरदृश्यः प्राकृतैर्जनैः ।
दृश्यते च प्रतिकृतौ मन्त्रिणो मन्त्रगौरवात् ॥
तस्मात्सर्वात्मना विष्णुं प्रतिष्ठाप्य च पूजयेत् ।
शिल्पिभिर्निर्मिते बिम्बे शास्त्रदृष्टेन वर्त्मना ॥

इत्यादिना अरणीदृष्टान्तप्रदर्शनमुखेन सेव्यजनानां सर्वविधफलप्रदानं सिद्धं भवति ॥

लोके च यथा चक्रवर्तिवंशप्रसूतोऽपि राजा पट्टाभिषेकरूपशास्त्रीयकर्मनिर्वर्तनसमनन्तरमेव निग्रहानुग्रहसमर्थो राष्ट्रसंरक्षकश्च भवति तथा सर्वत्र व्याप्तोऽपि भगवान् विग्रहविशेषे शास्त्रीयप्रतिष्ठारूपकर्मनिर्वर्तनानन्तरं तदाराधकानां सर्वेषां सर्वविधफलप्रदो भवति । अत्राराधकः अर्चक एव न किन्तु भगवत्सेवार्थमागतास्सर्वेऽपि जनाः । ते सर्वे फलभागिनो भवन्ति ॥

एवञ्च सर्वविधलोकक्षेमनिदानभूतं प्रतिष्ठाशब्दवाच्यं कर्म साङ्गोपाङ्गतया होतृपरिग्रहन्यायेन पाञ्चे प्रदिपादितम् । पाञ्चानुसारी अयं "प्रतिष्ठाविधि" नामकग्रन्थः कार्तयुगधर्मानुष्ठानबद्धादरैस्सर्वैस्सादरमादरणीय इति विजयते तमाम् ॥ इति ॥

स्वभानुवत्सराश्विनशुक्ल-
विजयदशम्यां स्थिरवासरे.

कस्तूरि श्रीनिवासरङ्गाचार्यः,
आस्थानमहाविद्वान्,
श्रीमन्महाराजसंस्कृतमहापाठशाला-
पाञ्चरात्रागमप्रधानाध्यापकः.

विषय सूची

विषयाः				पृष्ठम्
मङ्गलम्	....	....	....	1
बिम्बनिर्णयः	....	....	....	1
श्रीभागवतोक्काष्टविधप्रतिमादिशेषः		....	....	1
मुहूर्तनिर्णयः	....	....	....	2
आचार्यलक्षणम्	....	....	....	3
महाभागवतलक्षणम्	....	....	....	3
आचार्यऋत्विग्वरणम्	....	....	....	4
मण्डपादिलक्षणम्	....	....	....	4
स्तम्भप्रमाणानि	....	....	....	5
कुण्डविकल्पः	....	....	....	6
मण्टपालङ्करणम्	....	....	....	6
कुण्डविकल्पः	....	....	....	6
कुण्डविन्यासक्रमः	....	....	....	6
मेखलानिरूपणम्	....	....	....	7
भूसूक्तम्	....	....	....	8
शाकुनसूक्तम्	....	....	....	10
पालिकाविधानक्रमलक्षणम्		....	....	10
कलशस्थापनम्	....	....	....	10
अङ्कुरार्पणम्	....	....	....	12
विष्वक्सेनपूजा	....	....	....	13
महासङ्कल्पः	....	....	....	13
तत्र द्वीपादिविवरणम्	....	....	....	14
भगवत्स्वरूपरूपगुणविभवादिकथनम्		....	....	14–15
पुण्याहवाचनक्रमः	....	....	....	16

विषयाः				पृष्ठम्
प्रोक्षणमन्त्रः	....	....	....	17
तोरणादिपूजा	....	....	....	18
ध्वजपूजा	....	....	....	18
द्वारपालपूजनम्	....	....	....	19
कुम्भेषु दिक्पतिपूजनम्	....	....	....	19
अग्न्यलङ्कारादिक्रमः	....	....	....	21
पुरुषसूक्तषोडशाहुतीः	....	....	....	24
अङ्कार्पणक्रमः	....	....	....	26
अभ्युदयश्राद्धम्	....	....	....	30
प्रासादगमनवास्तुपूजादिक्रमः		....	....	35
पुनरग्नेसाधनक्रमः	....	....	....	36
नास्तिकादीनां बहिर्निर्वासः		....	....	41
गोदानम्	....	....	....	42
पुनःप्रदोषसमये प्रतिसरादिहोमक्रमः		...	....	42
जपक्रमः	....	....	....	43
लक्ष्मीसूक्तम्	....	....	....	45
वरुणसूक्तम्	....	....	....	46
रुद्रसूक्तम्	....	....	....	47
ब्रह्मसूक्तम्	....	....	....	47
विष्णुसूक्तम्	....	....	....	48
महीसूक्तम्	....	....	....	49
घृतसूक्तम्	....	....	....	50
पुण्याहमन्त्रः	....	....	....	52
पञ्चगव्यक्रमः	....	....	....	53
पञ्चामृताभिषेकक्रमः	....	....	....	54
अर्घ्यादिपात्रपरिकल्पनक्रमः		....	....	55
मधुपर्कलक्षणम्	....	....	....	56
औपासनादिहोमक्रमः	....	....	....	56

विषयाः				पुटम्
श्रीभगवच्छान्तिहोमः	....	....	....	59
प्रतिमायां सान्निध्ययाचनम्		....	....	61
महापुरुषविद्या	....	....	...	61
स्वागतम्	....	....	....	61
वीथ्युत्सवक्रमः	....	....	....	62
नारायणसूक्तम्	....	....	....	62
जलाधिवासस्थाने विधिक्रमः		....	....	63
पवमानसूक्तम्	....	....	....	65
बलिक्रमः	....	....	...	68
जलाधिवासावधिनिर्णयः	....	....	....	69
द्वितीयदिवसोत्सवः	....	....	....	70
उत्तिष्ठेत्यादिभगवत्प्रबोधक्रमः		....	....	70
पञ्चगव्यमेलनक्रमः	....	....	....	71
पञ्चगव्यादिस्नानक्रमः	....	....	....	72
द्वितीयवारं बलिक्रमः	...	....	....	75
पुनर्यानारोहणम्	....	....	....	76
सर्वौषधिगणः	....	....	....	77
सर्वतो रक्षणीयचण्डाद्यावाहनम्		....	....	79
कुण्डलक्षणम्	....	....	....	83
औपासनादिहोमक्रमः	....	....	....	83
विष्णुसूक्तेन होमक्रमः	....	....	....	89
वरुणसूक्तेन होमक्रमः	....	....	....	90
श्रीसूक्तेन होमक्रमः	....	....	....	91
फलश्रुतेः	....	....	....	92
भूसूक्तेन होमः	....	....	....	92
ऋगादिहोमक्रमः	....	....	....	93
केशवादिहोमः	....	....	....	94
सहस्रनामाधारशक्त्यादिहोमः		....	....	95

विषयाः				पृष्ठम्
प्रतिष्ठातृतीयदिवसक्रमः	....	....	....	100
अङ्गहोमः (वर्णहोमः)	....	....	....	101
सुदर्शनाद्यायुधन्यासः	....	....	....	103
षोडशन्यासः	....	....	....	104
व्याहृतिन्यासः	....	....	....	105
ओङ्काराद्रिगायत्र्यन्तः	....	....	....	105
नक्षत्रन्यासः	....	....	....	106
ग्रहन्यासः ...	....	....	....	107
वत्सरन्यासः	...	...	...	107
वर्णन्यासः	...	....	....	108
वेदन्यासः	....	...	....	109
देवन्यासः	....	....	....	109
वैराजन्यासः	....	....	...	110
क्रतुन्यासः	....	....	....	111
गुणन्यासः	....	....	....	112
ज्ञानादिगुणन्यासः	....	....	....	112
लोकन्यासः	....	....	....	112
जयादिहोमः	....	....	....	113
ज्ञाताज्ञातदोषनिर्हरणप्रायश्चित्तम्		....	....	116
पूर्णाहुतेरशुभसूचकत्वम्		....	....	118
महाभिषेकः (पञ्चामृताभिषेकक्रमः)		....	....	120
(अष्टबन्धनं) विष्णुतिलके नेत्रोन्मीलनम्		....	....	122
भूतशुद्धिप्रमाणवचनानि		....	....	124
भूतशुद्धिक्रमः	....	....	....	125
भगवद्ध्यानपूर्वकभगवदाराधनक्रमः		....	....	127
बिम्बे न्यासक्रमः	....	....	....	131
प्राणप्रतिष्ठा	....	....	...	131
पञ्चोपनिषन्न्यासः	....	....	....	132

विषयाः				पुटम्
आनुकूल्यसूक्तम्	...	....	....	132
आधारशक्त्यादिध्यानम्	....	....	....	133
पूजारम्भः	....	....	....	136
स्नानासनम्	....	....	....	137
अलङ्कारासनम्	....	....	....	137
भोज्यासनम्	....	....	....	138
पुनर्मन्त्रासनम्	....	....	....	139
सान्निध्ययाचनम्	....	....	....	140
बलिदानम्	....	....	....	141
भगवत्प्रार्थनम्	....	....	....	142
पुष्पाञ्जलिमन्त्रः	....	....	....	142
अक्षतसमर्पणमन्त्रः	....	....	....	143
पर्यङ्कासनम्	....	....	....	145
सात्त्विकत्यागः	....	....	....	145
ब्राह्मणभोजनम्	....	....	....	146
आचार्यपूजा	....	....	....	146
फलश्रुतिः	....	....	....	146
निगमनम्	....	....	....	147

———

पारिशिष्टम्

द्वाविंशत्युत्तरशततमे पुटे पूर्णाहुत्यनन्तरं कर्तव्यः अष्टबन्धः अनुक्तः सः अधोनिर्दिष्टप्रकारेण अनुसन्धेयः —

पूर्णाहुत्यनन्तरं मुहूर्ते प्राप्ते देवेशं प्रणम्य आनम्य कुम्भं विना देवं गर्भगृहमानीय रत्नोपरि विष्णुसूक्तं पुरुषसूक्तं ध्रुवसूक्तं वैष्णवं च जप्त्वा "प्रतद्विष्णु" रिति देवं संस्थाप्य पश्चादष्टबन्धं प्रयोजयेत् ॥

अष्टबन्धः

विमानार्चनकल्पे ६५-६६ पुटे लाक्षागुडमधूच्छिष्टगुग्गुळून् परस्परं समभागं कृत्वा एषां द्विगुणं सज्जरसं गैरिकं घनचूर्णं अर्धम्। सर्वेषामर्धं तैलं संयोज्य लोहपात्रे निक्षिप्य लोहदर्व्या समेनाग्निना सुपक्वं पचेत्। तद्बन्धमानीय तत्पीठरन्ध्रे प्रक्षिपेत् तद्दृढं दृषत्समं भवति॥

———

शुद्धाशुद्धपत्रिका

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
वस्त्र	वस्त	2	5
स	सं	2	6
क्रेः	क्रे	4	11
चतुः	चतु	5	21
त्त	स्त	5	21
छू	चू	5	22
नैः	नै	6	2
न्तेर	न्तेरे	6	5
रया	राया	6	20
र्वि	र्वि	8	8
पीठकं	पिटकं	8	18
वृ	मृ	11	7
त	द्भुत	13	21
रे	रै	14	11
ष्ण	ष्णा	14	14
मे	म	17	14
प्रवि	प्रडि	22	5
त्यर्प्य	तप्य	23	14
वेदाहमित्यादि सन्ति देवान्तं एकाहुतिः.		26	1
वपा	वाप	29	10
पितेषु	हीनेषु	30	7

अशुद्धम्	शुद्धम्	पुटे	पङ्क्तौ
रन्यैः	रंन्नैः	31	5
पुर्ण	पूर्ण	35	9
तदुपरि तदुपरि	तदुपरि	35	20
		35*	
पार्श्वयोः	पाणौ	36	6
वा दधति	वादधाति	39	4
षान्न	षौन्न	41	20
छुरां	खुरां	42	7
ध्य	क्ष्य	44	9
त्रीर	त्रिर	58	2
ननमा	ननमो	61	21
त्रिस्ति	त्रिस्रि	62	14
मलं	मलां	67	9
तिप्य	तितप्य	85	7
ध्य	ध्यं	85	7
तिप्य	तितप्य	86	9
न्वा	न्व	89	11
सयं	स्वयं	93	9
पूर्ण	पूर्व	11	24
कर्मान्तरं	कर्मान्तरितं	116	19
ङ्गी	ङ्गीः	124	12
तीनु	तीत्यनु	126	23–24
यामान्तर्या	यामोन्तर्या	131	19
चारन्	चरन्	137	11
शंत	शत	139	14

* ' धारयेथुस्तमस्ता ' इत्यनन्तरं ' ध्यायेदेवं दलितदनुजं सूत्रवत्या समेतं ' इत्यतःपूर्वं मेघश्यामं सुमणिमकुटं पीतवस्त्रं ' शुभाङ्गम् ' इति वर्तते मूले.

WD 132—GBPM—500 copies—4-1-44

॥ श्रीः ॥

॥ श्रीमते हयग्रीवाय नमः ॥

प्रतिष्ठाविधिः

रामानुजदयापात्रं ज्ञानवैराग्यभूषणम् ।
श्रीमद्वेङ्कटनाथार्यं वन्दे वेदान्तदेशिकम् ॥
अथ भगवत्प्रतिष्ठां व्याख्यास्यामः ॥

तत्र बिम्बनिर्णयः

सालग्रामशिलायां च कर्तव्यो विग्रहो हरेः ।
पुण्यतीर्थे शुभे क्षेत्रे पुण्यपर्वतमस्तके ॥ १ ॥
स्निग्धं रम्यं गृहीत्वा च कारयेच्छुभविग्रहम् ।
सर्वावयवसंपूर्णं लक्षणैश्च विराजितम् ॥ २ ॥
श्रीभूमिसहितं देवं कारयेच्छुभलक्षणम् ।

तत्र प्रतिमाविशेषमाह श्रीभागवते—

शैली दारुमयी लौही लेख्या लेप्या च सैकती ॥ ३ ॥
मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता ।
गृहेषु प्रतिमायास्तु न तासां नियमः क्वचित् ॥ ४ ॥
मनसैवेप्सिताः कार्याः सर्वा एव शुभप्रदाः ।
भुजे चक्रं द्विजातीनां शिरश्चक्रं च दैवतम् ॥ ५ ॥

अचक्र द्विजदेवानां पूजा दानं च निष्फलम् ।
प्रतिमा सशिरश्चक्रा तस्मा च्छ्रीभूयुता मता ॥ ६ ॥

अथ मुहूर्तनिर्णयः

गुरावस्त्रङ्गते शुक्रे व्यतीपाते च वर्जयेत् ।
सक्रान्तौ दुर्दिने चैव ग्रहणे सोमसूर्ययोः ॥ ७ ॥
पुरस्ताच्च परस्ताच्च षोडशाहानि वर्जयेत् ।
अतिचारे तथा मासे सर्वयुग्मयुते तथा ॥ ८ ॥
अप्रशस्तेषु योगेषु गण्डस्थूणार्धकेषु च ।
एवमादिषु योगेषु गर्हितेषु न कल्पयेत् ॥ ९ ॥
दुर्लग्ने दुर्मुहूर्ते तु भूकम्पोल्कानिपातने ।
हरेस्तत्र न कर्तव्या प्रतिष्ठा द्विजसत्तमैः ॥ १० ॥
चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे तथा ।
माघे वा विष्णुबिम्बानां प्रतिष्ठा शुभदा सिते ॥ ११ ॥
कृष्णपक्षत्रिभागेषु प्रथमे स्याच्छुभावहा ।
मध्या द्वितीयभागे तु तृतीये कर्तृनाशिनी ॥ १२ ॥
शुक्ले त्रिभागे प्रथमे देशनाशाय कीर्तिता ।
द्वितीये मध्यफलदा तृतीयेऽतिशुभावहा ॥ १३ ॥
पञ्चमी च द्वितीया च तृतीया सप्तमी तथा ।
दशमी पौर्णमासी च तथा षष्ठी त्रयोदशी ॥ १४ ॥
एकादशी द्वादशी च शुक्लपक्षे शुभप्रदाः ।
कृष्णे तु पञ्चमी यावत्तिथयस्सम्प्रकीर्तिताः ॥ १५ ॥
सोमो बृहस्पतिश्चैव भार्गवोऽथ बुधस्तथा ।
एते सौम्यग्रहाः प्रोक्ताः शुभदाः स्थापनं प्रति ॥ १६ ॥

आषाढद्वितयं मूलमुत्तरात्रयमेव च ।
ज्येष्ठाश्रवणरोहिण्यः पूर्वभाद्रपदस्तथा ॥ १७ ॥
हस्तोऽश्विनी रेवती च पुष्यो मृगशिरस्तथा ।
अनूराधा तथा स्वाती प्रतिष्ठादिषु शस्यते ॥ १८ ॥
धनुर्नक्रौ परित्यज्य सर्वे लग्नाश्शुभावहाः ।
आचार्यश्शुभे मुहूर्ते यजमानस्य राज्ञः राज्यस्य स्वस्य च चन्द्राद्यानुकूल्ये देवस्य प्रतिष्ठामाचरेत् ॥

तत्र क्रमप्राप्तमाचार्यलक्षणमाह—

महाभागवतं चैव आचार्यं वृणुयात्सुधीः ॥ १९ ॥
महाभागवता एव नियोज्या ऋत्विजस्तथा ।

महाभागवतलक्षणम्

तापादिपञ्चसंस्कारान्महाभागवतास्स्मृताः ॥ २० ॥
वेदवेदाङ्गतत्वज्ञान् सर्वशास्त्रविशारदान् ।
मन्त्ररत्नार्थविदुषः ब्राह्मणान् वृणुयात् शुभान् ॥ २१ ॥
तादृग्गुणसमायुक्तं आचार्यं वृणुयात् सुधीः ।
शङ्खचक्रोर्ध्वपुण्ड्रादिचिह्नैश्च रहितैर्द्विजैः ॥ २२ ॥
यद्यत्कर्मकृतं तत्तु महाहानिप्रदं भवेत् ।
चक्रादिचिह्नहीनेन स्थापिते यत्र विग्रहे ॥ २३ ॥
न सान्निध्यं हरिर्याति क्रियाकोटिशतैरपि ।
अवैष्णवस्थापितानां प्रतिमानाञ्च वन्दनम् ॥ २४ ॥
यः करोति स मूढात्मा रौरवं नरकं व्रजेत् ।
तस्मा त्तु वैष्णवा एव नियोज्या स्सर्वकर्मस्तु ॥ २५ ॥
शास्त्रयुक्तेन विधिना कुर्यात् संस्थापनं हरेः ।

अथाचार्यऋत्विग्वरणम्

अथ यजमानः स्नातः शुचिरलंकृतः तथाभूतया पत्न्या सहितः दर्भेष्वासीनः दर्भान्धारयमाणः पवित्रपाणिः पाणानायम्य सङ्कल्पं कुर्यात् । श्रीगोविन्द । अस्यां शुभतिथौ श्रीभगवदाज्ञया भगवत्कैंकर्यार्थं श्रीविष्णोः प्रतिष्ठां कर्तुं तदङ्गतत्कर्मार्थं मण्डपादि कर्तुं आचार्यादिवरणमहं करिष्ये । स्वशेषभूतेन मया स्वीयै स्सर्वपरिच्छदैः विधातुं प्रीतमात्मानं देवः प्रक्रमते स्वयत् । इत्यनुसंधाय उक्तलक्षणमाचार्यं वृणुयात् ॥

मम अस्यां भगवत्प्रतिष्ठायां त्वमाचार्यो भवेति प्रार्थ्य । भविष्यामीत्युक्तेः आचार्यत्वेन त्वामहं वृणे । इति दर्भद्वयं दद्यात्— यजमानः आचार्यं गन्धपुष्पदक्षिणादिभिः सम्पूजयेत् । गुरुणा सह यजमानः षोडशाष्टौ चतुरो वा उक्तलक्षणान् ऋत्विजो वृणुयात् । अस्यां भगवत्प्रतिष्ठायां यूय मृत्विजो भवथेति प्रार्थ्य भविष्याम इत्युक्ते ऋत्विक्तेन युष्मा नहं वृण इति दर्भद्वयं ऋत्विग्धस्ते दत्वा वृतास्म इति ऋत्विग्भिरुक्ते यजमानः ऋत्विजो गन्धपुष्पदक्षिणादिभि स्सम्पूजयेत् । आचार्येणानुज्ञातो यजमानश्शिल्पिनं संतोष्य तद्धस्तेन बिंबं गृहीत्वा आचार्यहस्ते दत्वा यथोचितं कर्म कुर्वित्याचार्यं प्रार्थयेत् ॥

अथ मण्डपादिलक्षणम्

तत आचार्यो मण्टपादिरचनां कुर्यात् । तत्प्रकारः प्रासादाग्रतः प्रथमावरणे द्वितीयावरणे तृतीयावरणे आशास्वष्टासु अभिमते देशे मण्टपं कुर्यात् । तन्प्रमाणं दशहस्तमितां चतुरश्रां द्वादशांगुलोच्चां मण्टपवेदिं कुर्यात् । तन्मध्ये पञ्चहस्तां चतुरश्रां द्वादशांगुलोच्चां मध्यवेदिं कुर्यात् ॥

दशहस्तसमायामं तदर्धं विस्तरं तथा ।
तन्मध्ये वेदिकां कुर्यात् कुण्डानि परिकल्पयेत् ॥
अष्टकुण्डं चतुष्कुण्ड मेककुण्डं तथापि वा ।
अश्वत्थादिद्रुमै र्बद्धतोरणानि चतुर्दिशम् ॥
मध्ये वेद्याश्चतुष्कोणेष्वष्टहस्तमितोच्छ्रयान् ।

द्वादशाङ्गुलपरिमितस्थूलान् चतुरः पलाशस्तंभान् हस्तमात्रं भूमौ निखनेत् । प्राकारवेद्या श्चतुष्कोणे तु पंचहस्तपरिमितोच्छ्रायान् द्वादशांगुलपरिमितस्थूलान् चतुरः पलाशस्तंभान् हस्तमात्रं भूमौ निखनेत् । प्राच्यां दिशि चतुरंगुलाधिकहस्तद्वयायामविशिष्टप्राग्द्वारासिध्यर्थं पञ्चहस्तपरिमितोच्छ्रायौ द्वादशांगुलपरिमितस्थूलौ द्वौ पलाशस्तभौ हस्तमात्रं भूमौ निखनेत् । दक्षिणस्यां दिशि चतुरंगुलाधिकहस्तद्वयायामविशिाशिष्टदक्षिणद्वारसिद्धयर्थं पञ्चहस्तपरिमितोच्छ्रायौ द्वादशांगुलपरिमितस्थूलौ द्वौ पलाशस्तंभौ निखनेत् । प्रतीच्यां दिशि चतुरंगुलाधिकहस्तद्वयायामविशिष्टपश्चिमद्वारसिद्धयर्थं पञ्चहस्तपरिमितोच्छ्रायौ द्वादशांगुलपरिमितस्थूलौ द्वौ पलाशस्तभौ हस्तमात्रं भूमौ निखनेत् । उदीच्यां दिशि चतुरंगुलाधिकहस्तद्वयायामविशिष्ट उत्तरद्वारसिद्धयर्थं पञ्चहस्तपरिमितोच्छ्रायौ द्वादशांगुलपरिमितस्थूलौ द्वौ पलाशस्तभौ हस्तमात्रं भूमौ निखनेत् । मध्ये वेध्याः चतुस्तम्भाग्रेषु पलाशदण्डिका दृढं स्थापनीयाः प्राकारवेद्या द्वादशस्तम्भाग्रेषु पलाशदण्डिका दृढं स्थापनीयाः मध्यमवेद्या श्चतुस्तम्भोपरिगतदण्डिकां चतुःष्कोणषु त्रिहत्तपरिमिततिर्यक्काष्ठानि कदळीपुष्पाकारनिर्मितछूडारम्भेषु स्थापनयानि । प्राकारवेद्या द्वादशस्तम्भोपरिकल्पितदण्डिका मध्यमवेदिस्तम्भोपरि कल्पितदण्डिकावधि स्थापनीया । यथा न पतति तथा अयःकीलकैः दृढं कुर्यात् । यथा

जलं न स्रवति तथा कुशैः काशैर्वा आच्छादयेत् । विचित्रवसनैः वितानं कुर्यात् । विचित्रपटै स्तम्भाना च्छादयेत् । यथा मण्टपे चतुर्द्वारता भवति तथा मण्टपकोणाच्छादनं कुर्यात् । मण्डपपूर्वद्वार-देशा द्बहिर्हस्तान्तेर पञ्चहस्तपरिमितोच्छ्राये द्वे हरिताश्वत्थशाखे द्वार-स्तम्भसमानसूत्रनिपाते हस्तमात्रं निखनेत् । मण्टपदक्षिणद्वारदेशे पूर्वो-क्तरीत्या औदुंबरशाखे निखनेत् । पूर्वद्वारतोरणद्वये शंखद्वयं स्थापयेत् । दक्षिणद्वारतोरणद्वये चक्रद्वयं स्थापयेत् । पश्चिमद्वारतोरणद्वये गदाद्वयं स्थापयेत् । मण्डपालङ्करणार्थं षोडशस्तम्भेषु षोडशकदळीस्तम्भान् स्थापयेत् । आम्रपल्लवमालाभिः पुष्पमालाभिर्वा मण्डपं वेष्टयेत् । चित्रध्वजो दशहस्तदीर्घः त्रिहस्तविस्तारः दशहस्तवंशयुक्तशिरसि चाम-रयुक्तः मण्डपोपरिभागे निवेश्यः पूर्वादिद्वारेषु रक्तपीतौ नीलपांडुरौ द्वौ द्वौ ध्वजौ स्थापयेत् । प्रतिस्तम्भेषु पताकाः दीर्घाः त्रिकोणाः स्थापयेत् । एवं मंडपद्वयं कुर्यात् । ध्यानाधिवासमंडप मध्यमवेद्या श्चतुर्दिक्षु चतुरः कुण्डान् विदध्यात् ॥

तत्र क्रमः—

पूर्वे चतुरश्रकुण्डं दक्षिणे धनुराकृति ।
पश्चिमे वर्तुलाकारं उत्तरे च त्रिकोणकम् ॥
मेखलाभि स्त्रिभिर्युक्तं सर्वं कुर्वीत बुद्धिमान् ॥

विस्तारयामे त्यत्रा यं भावः । विस्तारायामयोः हस्तमात्रप्रमाणे मेख-लाभ्यन्तरप्रवेशः । मेखलास्वरूपं । द्वादशाष्टचतुरंगुलप्रमाणेन निम्नानि प्रथमद्वितीयतृतीयानि मेखलारूपाणि इत्याह । योनिं कुर्यादित्यत्र योनि स्तु पृष्ठतः कुंडकण्ठादपि द्व्यगुळोन्नता अगुळोत्सेधेति यावत् । अग्रतः कण्ठसमा तदुक्तक्रमान्निम्नेति । आदिमध्यान्तेष्वेव मायतेति

भावः । एकांगुळिमानेन कुण्डांतनिम्ना कुण्डकण्ठोपरि द्व्यंगुळमानात्रिमेखलोपरि द्वादशांगुलिमाना एवमेकीभूयोक्ता पञ्चदशेति ॥

विस्तारायामनिम्नैश्च हस्तमात्रं त्रिमेखलम् ।
द्वादशाष्टचतुर्मानैस्स्वांगुलैश्च प्रकल्पयेत् ॥
कुण्डस्य पश्चिमे भागे योनिं कुर्यात्सलक्षणम् ।
अश्वत्थपत्रसदृशीं कुंडे किंचित्प्रतिष्ठिताम् ॥
षट्चतुस्त्र्यंगुला चापि भवेन्निम्नाक्रमाद्विजाः ।
विस्तारेणापि सा योनिः भवेत्पञ्चदशांगुला ॥
स्थलादारभ्य नालं स्याद्योन्या मध्ये सरन्ध्रकम् ।
नार्पयेत् कोणकुण्डेषु योनिं होमपरायणः ॥
कुण्डानां कल्पयेन्मध्ये नाभिमम्बुजसन्निभाम् ।
तत्तत्कुण्डानुरूपं वा मान मस्या निगद्यते ॥

पूर्वे चतुरश्रं चतुर्विंशत्यंगुलायामदैर्घ्यं विशिष्टं भूतलं द्व्यंगुलं निखनेत् । प्रथमा भूमिलम्ना भूमितश्चतुरंगुलोच्चा चतुरंगुलविस्तृता मेखला विधेया । तृतीया द्वादशांगुलोच्चा चतुरंगुलविस्तृता मेखला विधेया । तदुपरि-द्व्यंगुलोच्च द्व्यंगुलविस्तृतकुण्डकण्ठो विधेयः । चतुरंगुलविस्तृता मेखला यथा दर्शनीया स्स्यु स्तथा कुर्यात् । तद्दक्षिणे धनुराकृति चतुर्विंशत्यंगुलायामविशिष्टं भूतलं द्व्यंगुलं निखनेत् । प्रथमा भूमिलम्ना भूमितश्चतुरंगुलोच्चा चतुरंगुलविस्तृता मेखला कार्या । द्वितीया अष्टांगुलोच्चा चतुरंगुलविस्तृता मेखला कार्या । तृतीया द्वादशांगुलोच्चा चतुरंगुलविस्तृता मेखला कार्या । द्व्यंगुलोच्चः द्व्यंगुलविस्तृतः कुण्डकण्ठो विधेयः । पश्चिमे वर्तुलाकारं चतुर्विंशत्यंगुलायामदैर्घ्यविशिष्टं भूतलं द्व्यंगुलं निखनेत् । प्रथमा भूमिलम्ना भूमितश्चतुरंगुलोच्चा चतु-

रंगुलविस्तृता मेखला कार्या। द्वितीया अष्टांगुलोच्चा चतुरंगुलविस्तृता मेखला विधेया। तृतीया द्वादशांगुलोच्चा चतुरंगुलविस्तृता मेखला कार्या। द्व्यंगुलोच्चो द्व्यंगुलविस्तृतः कुण्डकण्ठः विधेयः। कुण्ड-कण्ठोपरि मध्यभागे अश्वत्थपत्राकारां पञ्चदशांगुलायतां मूले षडंगुल-विस्तीर्णां मग्रे अंगुलविस्तीर्णां अंगुलद्वयोच्चां पृष्ठतोन्नतां अग्रतो निम्नां कुण्डे किञ्चित्प्रतिष्ठितां योनिं कुर्यात्। तस्या नालं कुण्डभूमिलग्नं कुर्यात्। योन्या मध्ये रन्ध्रं कुर्यात्। उत्तरे त्रिकोणं चतुर्विंश-त्यंगुलायामदैर्ध्यविशिष्टं भूतलं द्व्यङ्गुलं निखनेत्। प्रथमा भूमिलग्ना भूमितश्चतुरंगुलोच्चा चतुरंगुलविस्तृता मेखला कार्या। द्वितीया अष्टांगुलोच्चा चतुरंगुलविस्तृता मेखला कार्या। तृतीया द्वादशांगुलोच्चा चतुरंगुलविस्तृता मेखला कार्या। द्व्यंगुलोच्चे द्व्यंगुलविस्तृतः कुण्डकण्टो विधेयः। यादृशः कुण्डाकारः तादृशी मेखला विधेया। चतुर्ष्वपि कुण्डेषु चतुरंगुलविस्तृता द्व्यंगुलोच्चा पद्माकारा मध्ये नाभि र्विधेया। एवं प्रतिष्ठार्थं कल्पितं मण्डपद्वयं अन्तर्बहिश्च मार्जयित्वा गोमयोदके-नोपलिप्य रङ्गवल्यादिभिरलंकृत्य दर्भपुञ्जैः पर्यग्निकरणं कृत्वा तत्र घृतपूर्णान् प्रदीपान् प्रस्थापयेत्। गौरसर्षपाक्षतान् विकीर्य। अथाचार्यः ऋत्विग्भिस्सह खनित्रं पीठकं चतुर्हस्तायतं नवं वस्त्रं गन्धपुष्पधूपदीप-नैवेद्यदक्षिणाद्रव्याण्यादाय ध्वजपताकाभिर्वाद्यघोषैः यजमानेन भागवतै-स्सह बहिर्निष्क्रम्य प्राचीमुदीचीं वा दिशङ्गच्छेत्। तत्र शुचौ देशे ओन्नमः अस्त्रायफट् इत्यस्त्रमन्त्रेण महीं संप्रोक्ष्य॥

भूसूक्तम्

हरिः ओम्। भूमिं भूम्ना द्यौ वरिणा न्तरिक्ष

म्महित्वा । उपस्थे ते देव्यदितेऽग्नि मन्नाद मन्ना-
द्याया दधे । आ य द्यौः पृथिं रक्रमी दसंन
न्मातरं पुनः । पितरं श्च प्रय न्त्सुवः ।
त्रिगुश द्धाम वि राजति वाक्पतंगाय शिश्रिये ।
प्रत्यस्य वह द्युभिः । अस्य प्राणा दपानत्यन्त
श्चरति रोचना । व्यख्य न्महिष स्सुवः । यस्त्वा
क्रुद्धः परोवप मन्युना यदवर्त्या । सुकल्प मग्ने
तत्तव पुन स्त्वो दीपयामसि । यत्ते मन्युपरोप्तस्य
पृथिवी मनु दध्वसे । आदित्या विश्वे तद्देवा वसव श्च
समाभरन् । मेदिनीं देवी वसुन्धरास्याद्वसुधां देवी
वासवीं । बृह्मवर्चसः पितृणाꣳ श्रोत्रं चक्षु र्मनः ।
देवी हिरण्यगर्भिणी देवी प्रसूवरीं । सदने सत्या-
यने सीद । समुद्रवती सावित्री हनों देवी मह्यङ्गीं ।
मही धरणी महो व्यधिष्ठा शृङ्गेशृङ्गे यज्ञे यज्ञे
विभीषिणी । इन्द्रपत्नी व्यापिनीं सुरसरिं दिह ।
वायुमतीं जलशयनी स्वयंधा राजा सत्यन्धो परि-
मेदिनीं । श्वो परिधत्तं गाय । विष्णुपत्नीं महीं

देवीं माधवीं माधवप्रियां । लक्ष्मीप्रियसखीं देवीं नमा म्यच्युतवल्लभां । ओं धनुर्धरायै विद्महे सर्वसिद्धयै च धीमहि । तन्नो धरा प्रचोदयात्—

इति महीसूक्तेन भूमिं संस्पृश्य वराहरूपिणं भगवन्तं अर्घ्य पाद्य आचमन स्नान वस्त्रो पवीत गन्ध पुष्प धूप दीप नैवेद्य ताम्बूल दक्षिणाभि स्सम्पूज्य क्रोडविद्यया खनित्रेण भूमि त्रिखनेत् । वेत्रजे पात्रे मूलमंत्रेण उद्धृतासीतिमंत्रेण च मृदं संगृह्य मूलमंत्रेण वाससा संवेष्टय नदीतीरवालुकां गोकरीषं चा दाय रथे गजे वा समारोप्य ॥

शाकुनसूक्तम्

अनुहवं परिहवं परीवादं परिक्षपम् । दुस्स्वप्नं दुरुदितं तद्विषद्भ्यो दिशा म्यहम् । अनुहूतं परिहूतश्च शकुने यदशाकुनम् । मृगस्य सृत मक्ष्णया तद्द्विषद्भ्यो दिशा म्यहम् । आरा त्ते अग्नि रस्त्वारात्परशु रस्तुते । निवाते त्वा भिवर्षतु स्वस्ति तेस्तु वनस्पते स्वस्ति मेस्तु वनस्पते । नमश्शकृत्सदे रुद्राय नमो रुद्राय शकृत्सदे । गोष्ठ मसि नमस्ते अस्तु मा माहिश्सीः । सिग मसि नसि वज्रो नमस्तेऽस्तु मा माहिश्सीः । उद्वातेवं

शकुने सामगायसि ब्रह्मपुत्र इव सर्वनेषु शस्यसि।
स्वस्तिनं इशकुने अस्तु प्रतिन स्सुमना भव ॥

इति शाकुनसूक्त मधीयानैः ऋत्विग्वि ब्राह्मणै स्सह ग्रामं प्रदक्षिणीकुर्वन् मण्डपं प्रविशेत् । तत आचार्यादयः अलङ्कृता स्सर्वे कुश धान्य कलश मालिका दूर्वा श्वत्थ शिरीष बिल्वपत्र श्वेतसूत्र वस्त्र वृत्तिका वल्मीकमृत्तिका गोकरीष गन्ध पुष्प धूप दीप तुलसी व्रीहि यव माष तिल प्रियङ्गु मुद्ग सर्षप गोधूम चणक पयोनैवेद्य ताम्बूला क्षत । श्रीफला म्रपल्लव पूगीफलादिसम्भारा न्संगृह्य शुद्धजलैः ॥

पालिकाविधानम्

ओ न्नारायणाय विद्महे वासुदेवाय धीमहि ।
त न्नो विष्णुः प्रचोदयात् ॥

इति विष्णुगायत्र्यापालिकाः प्रोक्षयेत् । दूर्वाश्वत्थशिरीषबिल्वपत्राणि तासां कण्ठेषु श्वेतसूत्रेण वेष्टयेत् ॥

दूर्वा मश्वत्थपत्रं च शिरीषं बिल्वपत्रकम् ।
तासां कण्ठेषु बध्नीयात् श्वेतसूत्रेण वेष्टयेत् ॥

ततः कुशै स्तासां बिलं पूरयित्वा आनीतमृत्तिकया वल्मीकया च गोकरीषेण च पालिकाः पूरयेत् ॥

दुत्तूरकुसुमाकारं वक्त्र मम्भोजसन्निभम् ।
द्वाविंशाङ्गुल मुत्सेधं पालिकालक्षणं स्मृतम् ॥

शुचौ समे देशे गोमयेन गोचर्ममात्रं चतुरश्रं स्थण्डिलं कृत्वा तत्र तण्डुला न्विकीर्य दर्भेण पश्चिमत आरभ्य उत्तरपर्यन्तं तिस्र स्तिस्रो

रेखा लिखित्वा अद्भि रभ्युक्ष्य स्थण्डिलस्य मध्ये प्रागग्रान् दर्भान् सँस्तीर्य तदुपर्य ष्टपालिकाः प्रागाद्यष्टादिक्षु स्थापयेत् । तासां मध्ये कलशं स्थापयेत् । तस्मिन् सुगंधि जलम् । ओं भूर्भुवस्सुवरिति पूरयित्वा वज्रवैडूर्यपुष्यरागमौक्तिकनीलमणीन् पञ्च रत्नानि निक्षिप्य वटाश्वत्थोदुम्बराम्रप्लक्षपञ्चपल्लवान् निक्षिप्य तुलसीदळं पूगीफलं च निक्षिपेत् । कुम्भस्य मुखे एकविंशतिदर्भनिर्मितं कूर्चं निधाय श्रीफलं निक्षिप्य नववाससा (आ)च्छादयेत् । व्रीह्यादिनवधान्यानि महति मृण्मये नूतने पात्रे निक्षिप्य तत्पात्रं मूर्ध्नि विन्यस्य तूर्यघोषपुरस्सरं मंदिरं परिक्रम्य ॥

अंकुरार्पणम्

पालिकानां प्राग्देशे निवेश्य पयसा प्रक्षाळ्य नववाससा (आ)च्छाद्य पुण्याहं कुर्यात् । पादौ प्रक्षाळ्य द्वि राचम्य आचार्यो ब्राह्मणै स्सह नृत्यवाद्यघोषपूर्वकं ताम्बूलफलपुष्पदक्षिणाविशिष्टं पात्रं हस्ते गृहीत्वा यजमानमुखेन अनुज्ञां गृह्णीयात् ॥

ओ॑ न्नम॒ स्सद॑से॒ नम॒ स्सद॑स्पत॑ये॒ नम॒ स्सखी॑नां पु॒रोगा॑णां॒ चक्षु॑षे॒ । नमो॑ दि॒वे । नमः॑ पृथि॒व्यै । सम्प॑थस्॒भां मे॑ गोपाय । ये च॒ सभ्या॑ स्सभा॒सद॑ः । ता तिँ॑द्रियाव॑तः कुरु । सर्व॒ मायु॑ रुपा॑सतां ॥

सर्वेभ्य श्श्रीवेष्णवेभ्यो नमः । इत्यक्षता न्श्रीवैष्णवशिरसि विकीर्य । अशेषे हे परिषत् भवत्पादमूले मया समर्पितां इमां सौवर्णीं

यत्किंचिद्दक्षिणां यथोक्तदक्षिणा मिव स्वीकृत्य अस्य भगवतः श्रीभूमि-नीळासमेतस्य समस्तपरिवारस्य श्रीमदादिनारायणस्य प्रतिष्ठाकर्मणः निर्विघ्नपरिसमाप्ति र्भूया दिति भवन्तो महान्तो ऽनुगृह्णन्तु । इति परिषद मनुज्ञाप्य संकल्पं कुर्यात् ॥

विष्वक्स ापूजा

प्रागग्रेषु दर्भेषु प्राङ्मुख उपविश्य भगवन्तं ध्यात्वा श्रीभगवदाज्ञया भगवत्प्रीत्यर्थं करिष्यमाणस्य भगवत्प्रतिष्ठाकर्मणः निर्विघ्नेन परिसमाप्त्यर्थं आदौ श्रीविष्वक्सेनपूजां करिष्य इति सङ्कल्प्य मध्यमपलाशपर्णे कूर्चं निक्षिप्य तत्र श्रीमते विष्वक्सेनाय नम इति मन्त्रेण सूत्रवत्या साकं सेनेशं ध्यानावहनासनाार्घ्यपाद्याचमनस्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणाभिस्सम्पूज्य---

यस्य द्विरदवक्त्राद्याः पारिषाद्याः परश्शतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं समाश्रये ॥

इति मन्त्रेण विष्वक्सेनं प्रार्थयेत् । त्रिःप्राणानायम्य दक्षिणोत्तरौ पाणी कृत्वा (तत्र च सव्यपाणेरङ्गुष्ठतर्जनीमध्ये दक्षिणपाणेरङ्गुष्ठवर्जिताः चतस्रोऽङ्गुलीः कृत्वा सव्याङ्गुष्ठं दक्षिणाङ्गुष्ठेनावेष्टयेत् ॥

महासङ्कल्पः

ओम्–श्रीगोविन्द गोविन्द गोविन्द आद्यश्रीभगवतो महापुरुषस्य श्रीमदादिनारायणस्य अचिन्त्याद्भुतशक्त्या महाजलौघमध्ये परिभ्रममाणानां अनेककोटिब्रह्माण्डानामेकतमे । अव्यक्तमहदहङ्कारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृते । अस्मिन् महति ब्रह्माण्डकटाहकरण्डके सकलाधिष्ठात्रादिवराहदंष्ट्राङ्कुरमृणाळभूतस्य जगन्मूलकन्दस्य

भगवदाधारकूर्माद्यष्टदिग्गजानन्तफणामण्डलस्योपरितले वर्तमानस्य अतल वितलसुतलतलातलरसातलमहातलपातालाख्यलोकसप्तकस्योपरितले वर्तमानस्य भुवस्सुवर्महर्जनस्तपस्सत्यलोकषट्कस्याधोभागे संस्थितस्य बाह्ये अन्धतमसावृतेन तद्बहिः अनन्तसूर्यप्रकाशेन लोकालोकवलयेन वलयितस्य लवणेक्षुसुरासर्पिक्षीरदधिशुद्धोदकाख्यसप्तार्णवैः परिमण्डितस्य जम्बूप्लक्षकुशक्रौञ्चशाकशाल्मलिपुष्कराख्यसप्तद्वीपैः परिवृतस्य भरतकिंपुरुषहरीळावृतकुरुभद्राश्वकेतुमालहैरण्यकपाञ्चजन्याख्यनववर्षैर्विभूषितस्य विन्ध्यमेरुहिमगन्धमादनमाल्यवत्सह्यपारियात्राख्यसप्तकुलपर्वतैः परिशोभितस्य इन्द्रकशेरुताम्रगभस्तिनागसौम्यगन्धर्वचारणभरताख्यनवखण्डैः परिमण्डितस्य अरुणोदयमहाभद्रशीतोदकमानसाख्यसरोवरैर्विराजितस्य बदरिकाश्रमनैमिशकुरुक्षेत्रपुष्करायोध्याद्वारकाश्रीरङ्गवेङ्कटाद्रियादवाद्रिवानाद्र्यादिदिव्यक्षेत्रसङ्कुलस्य गङ्गायमुनागोदावरीसरस्वती-नर्मदासिन्धुकावेरीताम्रपर्णीसरयूतुङ्गभद्राकृष्णवेण्यादिपुण्यनदीभिरलङ्कृतस्य अङ्गवङ्गकळिङ्गकाश्मीरकाम्भोजकामरूपकेरळकैकेयकोसलमैथिलकुन्तल-कुरङ्गकुरवकसौवीरसौराष्ट्रमहाराष्ट्रमत्स्यमागधमालवमराळसिंहळमलयाळ-चोळबङ्गाळनेपालपञ्चालसाळ्वपुळीन्द्रपौण्ड्रकर्णाटकवराटकमराटकाकिरातसिक्कसिन्धुपंचाविकपाविकपाण्ड्यद्रविडयवनशूरसेनधूर्जरकुक्कुरपराशरगांधारविदर्भबर्बरबरमभोजचैद्यबाह्लीककोंकणटेंकणचीणहूणदशार्णाख्यषट् -पञ्चाशद्देशभेदैः तत्तदाचारविचित्रवस्त्राभरणालंकारैश्च अष्टादशवर्णभोज्यभाषाभेदैः परिष्कृतस्य अयोध्यामधुरामाया काशीकाञ्चयवन्तिका । द्वारवत्याख्यमुक्तिदायकपुण्यनगरीभिर्विराजितस्य भूमण्डलस्योपरि भुवर्महर्जनस्तपस्सत्यलोकानामुपरि ब्रह्माण्डकटाहस्योपरि आवरणाद्बहिर्महांधकारस्योपरिस्थिते अनेककोटिवह्यर्केन्दुदेदीप्यमाने श्रीमद्वैकुण्ठाख्ये

दिव्यनगरे दिव्यरत्नमयानन्दमण्टपे भगवदाधारशक्तिप्रकृतिकूर्मानन्त-धर्माद्यष्टमूर्तिभिः उपरिधारितमहापद्मस्य पूर्वाद्यष्टदळेषु विमलाद्यष्ट-चामारग्राहिणीभिः परिवृते तत्कर्णिकोपरि अग्न्यादिमण्डलत्रयान्विते तदुपरि ऋग्यजुस्सामाथर्वान्विते अनेककोटिसूर्यप्रकाशदिव्यसिंहासने शेषपर्यंकशायिनः अपरिपिततेजोराशेः अखिलजगन्मातृश्रीभूमिनीळाभिः परिसेव्यमानस्य तद्बहिः अनन्तगरुडमिष्वक्सेनादिनित्यसूरिभिस्संसेव्य-मानस्य तद्बहिः परितः पंचकालपरायणैः भगवच्छेषनिष्ठैः सालो-क्यादिपदस्थितैः नित्यतृप्तैः परिसेव्यमानस्य अखिलजगत्सृष्टिस्थिति-संहारकारणकर्तृभूतस्य भगवतो दिव्याज्ञया प्रवर्तमानस्य आद्य-ब्रह्मणः द्वितीयपरार्धे, श्रीश्वेतवराहकल्पे, वैवस्वतमन्वन्तरे, कलियुगे, प्रथमपादे, जंबूद्वीपे, भारतवर्षे, भरतखण्डे, शकाब्देमेरोर्दक्षिणे, पार्श्वे, अस्मिन्, वर्तमाने व्यावहारिके प्रभवादिषष्टिसंवत्सराणां मध्ये अमुके, संवत्सरे, अयने, ऋतौ, मासे, पक्षे, तिथौ, वासरे, नक्षत्रे, एवंगुणविशेषणविशिष्टायां मस्यां शुभतिथौ अस्य अनन्त, गरुड, विष्वक्सेनादिनित्यसूरिपरिषत्संसेव्यमानस्य, पराङ्कुश, परकालयतिवरादिभक्तै स्संततसमर्चितचरणयुगळस्य महाजलकमलमध्य-परिभ्राम्यमाणानेककोटिसूर्यप्रभासमेतस्य श्रीभूमिनीळाकुचकलशविन्यस्त-कुंकुमांकितवक्षस्स्थलनायकस्य, शेषपर्यंकशायिनः, शंखचक्रगदापद्म-खड्गशार्ङ्गहस्तविराजितस्य, सौशील्यवात्सल्यादिगुणयुक्तस्य श्रीम-न्नारायणस्य भगवतो दिव्याज्ञया, भगवत्प्रीत्यर्थं अस्य अशेषचिदचि-द्वस्तुशेषीभूतस्य सत्यज्ञानानन्तानन्दामलस्वरूपस्य श्रीवल्लभस्य ज्ञान-शक्तिबलैश्वर्यवीर्यशक्तितेजस्सौशील्यवात्सल्यस्वामित्वसर्वज्ञत्वसर्वशक्तत्व-परमकारुणिकत्वकृतित्वकृतज्ञत्वपरिपूर्णत्वपरमोदारत्वमार्दवार्जवसौगन्ध्य —

सौकुमार्यादिगुणगणौघमहार्णवस्य, अभिनवजलधरसुंदरादिव्यमंगळविग्रहस्य भगवतो नारायणस्य सान्निध्यसिध्यर्थं अमुकमूर्तिप्रतिष्ठा महं करिष्यामि, क्रियापलस्य आत्मगामित्वे कारिष्य इति सङ्कल्पयेत् ॥

अथ पुण्याहवाचनम्

तदङ्गत्वेन पुण्याहवाचनं करिष्ये । इत्युक्त्वा शुचौदेशे तण्डुलोपरि प्रागग्रान् दर्भान् न्संस्तीर्य तेषु सुवर्णादिसम्भवं कुम्भं निधाय व्याहृतीभिरद्भिरापूर्य ऊर्ध्वाग्रं कूर्चं निधाय गंधपुष्पैरभ्यर्च्य शुध्यर्थं मण्टपशुध्यर्थं भगवत्प्रतिष्ठाङ्गं पुण्याहं वाचयिष्ये । पुण्याहे चतुरो ब्राह्मणान् भोजयित्वा ऋत्विग्भि स्तैः दर्भहस्तैः पुण्याहं वाचयेत् ॥

अञ्जलिं कृत्वा ओं स्वामिनः मनस्समाधीयतामिति प्रार्थ्य समाहितमनस स्म इति तैः प्रत्युक्ते भवद्भिरनुज्ञातः पुण्याहं वाचयिष्ये। इत्यनुज्ञाप्य वाच्यतामित्यनुज्ञातः । पुण्याहं वाचयिष्ये वाच्यतामित्यनुज्ञातः । उदकुम्भं सव्यहस्ते निधाय दक्षिणहस्तेन पिधाय भगवत्प्रतिष्ठाकर्मणः पुण्याहंभवन्तोब्रुवन्तु भगवत्प्रतिष्ठाकर्मणः ऋद्धिंभवन्तोब्रुवन्तु । भगवत्प्रतिष्ठाकर्म ऋध्यताम् । इति त्रिः प्रार्थना प्रतिवचनं ब्रूयुः । कुंभं पूर्ववद्भूमौ निधाय । पुण्याहसमृद्धिरस्तु । शिवंकर्मास्तु । प्रजापतिःप्रीयतामिति भवन्तोब्रुवन्विति प्रार्थ्य । प्रीयतां भगवान् प्रजापतिः इति ब्रूयुः । ओं शान्तिरस्तु । तुष्टिरस्तु । ऋद्धिरस्तु । अविघ्नमस्तु । आयुष्यमस्तु । आरोग्यमस्तु । धनधान्यसमृद्धिरस्तु । गोब्राह्मणेभ्यश्शुभं भवतु । ईशान्यां बहिर्देशे अरिष्टनिरसनमस्तु । आग्नेयां यत्पापं तत्प्रतिहतमस्तु । उत्तरेकर्मण्यविघ्नमस्तु । उत्तरोत्तराभिवृद्धिरस्तु । सर्वशोभनमस्तु । सर्वास्संपदस्सन्तु । ओं शुभानिवर्धन्तां

ओं शान्तिरशान्तिरशान्तिरिति सर्वे ब्रूयुः । शान्तिरस्त्वित्येतदारभ्य ओं शान्तिरित्यन्तैर्वाक्यैः कूर्चेन पर्णपुटे जलन्निक्षिप्य पुनस्तज्जलं कुम्भे निक्षिपेत् । अस्मिन् कुम्भे वरुणरूपिणं भगवन्तं पुण्डरीकाक्षमावाहयिष्ये ॥

इमंमेवरुणश्रुधीहवमद्याचमृडयेत्यारभ्य प्रमोषीरित्यन्तेनावाह्य अर्घ्यपाद्याचमनस्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणाभिस्सम्पूज्य, दधिक्रावृण्गोअकारिषमित्यारभ्य आपोजनयथाचन इत्यन्तं, हिरण्यवर्णाश्शुचयः पावका इत्यारभ्य बलमोजो निधत्तेत्यन्तं, पवमानस्सुवर्जन इत्यारभ्य जातवेदा मोर्जयंत्या पुनातु इत्यन्तम्, ओंतच्छंयो रित्यारभ्य शश्वतुष्पद इत्यन्तम् ओं शान्तिरशान्तिरशान्तिरित्येभिर्मन्त्रैर्ब्राह्मणैस्सह कुम्भं दर्भैस्स्पर्शयेत् ॥

अथ प्रोक्षणमन्त्रः

ओं वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो अनमीवो भवानः । यत्त्वेमेह प्रतितन्नो जुषस्व शन्न एधि द्विपदे शं चतुष्पदे । वास्तोष्पते शग्मया सग्ंसदा ते सक्षीमहिरण्वया गातुमत्या । आवः क्षेम उत योगे वरन्नो यूयम्पात स्वस्तिभिस्सदा नः । वास्तोष्पते प्रतरणोन एधि गोभिरश्वेभिरिन्दो । अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व । अमी वहा वास्तोष्पते विश्वारूपाण्याविशन् । सखा सुशेव एधि नः । शुभग्म् शुभम् (शिवग्म् शिवम्) ॥

स्वस्त्ययनं तार्क्ष्यं मरिष्टनेमिं महद्भूतं वायसं देवतानाम् । असुरघ्नमिन्द्रसखं समत्सुबृहद्यशो नावमिवारुहेम । अंहोमुच माङ्गिरसं गयं च स्वस्त्यात्रेयं मनसा च ताक्ष्यम् । प्रयतपाणिश्शरणं प्रपद्ये स्वस्ति सम्बाधेष्वभयं नो अस्तु ॥ इमं मन्त्रं पठन् आम्रपल्लवेन

पुण्याहजलैः मण्टपादिकं सर्वमन्तर्बहिश्च प्रोक्षयेत् । पुण्याहकलशं शुभे देशे सुरक्षितं कृत्वा स्थापयेत् ॥

अथ तोरणादिपूजा.

ततस्तूर्यनादेन तोरणादिपूजां कुर्यात् । अत्र क्रमः । अग्निमीळे पुरोहितम् यज्ञस्यदेवमृत्विजम् । होतारं रत्नधातमम्—इति मन्त्रेण गन्धपुष्पधूपदीपनैवेद्यैः पूर्वद्वारं सम्पूज्य, सुशोभनायेन्द्रदैवत्यायाश्वत्थ-ऋग्वेदतोरणाय नम—इति मन्त्रेण गन्धपुष्पधूपदीपनैवेद्यैः पूर्वद्वार-तोरणं संपूजयेत् । इषेत्वोर्जेत्वावायवस्थोपायवस्थदेवोवस्सवितात्प्रार्पयतु-श्रेष्ठतमायकर्मणे—इति मन्त्रेण गन्धपुष्पधूपदीपनैवेद्यैः दक्षिणद्वारं सम्पूज्य, श्राद्धदेवाय यमदैवत्याय उदुम्बरयजुर्वेदतोरणाय नम—इति मन्त्रेण गन्धपुष्पधूपदीपनैवेद्यैर्दक्षिणद्वारतोरणं पूजयेत् । अग्न आयाहि-वीतये गृणानोहव्यदातये । निहोतासत्सिबर्हिषि—इति मन्त्रेण गन्धपुष्प-धूपदीपनैवेद्यैः पश्चिमद्वारं संपूज्य, सुभद्राय वरुणदैवत्याय न्यग्रोध-सामवेदतोरणाय नम—इति मन्त्रेण गन्धपुष्पधूपदीपनैवेद्यताम्बूल-नीराजनैः पश्चिमद्वारतोरणं संपूजयेत् । शन्नोदेवीरभिष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तुन—इति मन्त्रेण उत्तरद्वारतोरणं गन्धपुष्पधूपदीप-नैवेद्यैस्सम्पूज्य, भद्राय सोमदैवत्याय प्लक्षाय नम—इति मन्त्रेण गन्धपुष्पधूपदीपनैवेद्यैरुत्तरद्वारतोरणं पूजयेत् ॥

अथ ध्वजपूजनम्

कुमुदाय नमः । कुमुदाक्षाय नमः । इति मन्त्रद्वयेन पूर्वद्वार-पार्श्वे स्थितौ रक्तौ ध्वजौ गन्धपुष्पधूपदीपनैवेद्यैः पूजयेत् । पुण्डरीकाय नमः, वामनाय नम—इति मन्त्रद्वयेन दक्षिणद्वारपार्श्वे स्थितौ द्वौ पीतौ ध्वजौ गन्धपुष्पधूपदीपनैवेद्यैः पूजयेत् । शङ्कुकर्णाय नमः । सर्वनेत्राय

नमः । इति मन्त्रद्वयेन पश्चिमद्वारपार्श्वे स्थितौ नीलौ द्वौ ध्वजौ गन्ध-पुष्पधूपदीपनैवेद्यैः पूजयेत् । सुमुखाय नमः । सुप्रतिष्ठिताय नमः । इति मन्त्रद्वयेन उत्तरद्वारपार्श्वे स्थितौ द्वौ पाण्डुरौ ध्वजौ गन्धपुष्पधूप-दीपनैवेद्यैः पूजयेत् । ततः पूर्वादिचतुर्द्वारेषु धान्यसञ्चयेषु प्रतिद्वारं द्वौ कुम्भाविति सर्वतः अष्टौ कुम्भान्, इदं विष्णुर्विचक्रमे त्रेधानिदधे-पदम् । समूढमस्यपाँसुरे । इति मन्त्रेण निवेश्य तान्सुगन्धजलै रापूर्य अश्वत्थपल्लवाक्षततुलसीदळानि तेषु निक्षिप्य, सूत्रवस्त्रैरावेष्टय मुखेषु श्रीफलानि दद्यात् । पूर्णाय नमः । युक्तिमन्त्रिणे नमः । इति मन्त्रद्वयेन पूर्वद्वारकुम्भौ, आनन्दाय नमः । नन्दनाय नमः । इति मन्त्रद्वयेन दक्षिणद्वारकुम्भौ, वीरसेनायनमः । सुसेनायनमः । इति मन्त्रद्वयन । पश्चिमद्वारकुम्भौ, सम्भवाय नमः । प्रभवाय नमः । इति मन्त्रद्वयेन उत्तरद्वारकुम्भौ गन्धपुष्पधूपदीपनैवेद्यैः पूजयेत् ॥

अथ द्वारपालपूजनम्

कुमुदाय नमः । कुमुदाक्षाय नमः । इति मंत्रद्वयेन कुमुद-कुमुदाक्षौ पूर्वद्वारदेशे, पुण्डरीकाक्षाय नमः वामनाय नम इति मन्त्र-द्वयेन पुण्डरीकवामनौ, दक्षिणद्वारदेशे । शङ्कुकर्णाय नमः । सर्वनेत्राय नम इति मन्त्रद्वयेन शङ्कुकर्णसर्वनेत्रौ, पश्चिमद्वारदेशे । सुमुखाय नमः । सुप्रतिष्ठिताय नम इति मन्त्रद्वयेन सुमुखसुप्रतिष्ठितौ उत्तरद्वारदेशे । गन्धपुष्पधूपदीपनैवेद्यैः पूजयेत् ॥

ततः दिक्पतिपूजनम्

पूर्वादिदिक्षु धान्यसञ्चयेषु कुम्भान् संस्थाप्य पूर्वेशानयोर्मध्ये ब्रह्मकलशं स्थाप्य नैर्ऋतपश्चिमयो र्मध्ये अनंतकुम्भं स्थाप्य क्रमेण इन्द्रादिदिक्पतीन् पूजयेत् । पूर्वकुम्भे 'त्रातार मिन्द्र मवितार मिन्द्रगं

हवेहवे सुहवगं् शूरमिन्द्रम् । हुवे नु शक्रं पुरुहूत मिन्द्रग्ं् स्वस्ति नो मघवा धात्विन्द्र—इति मन्त्रेण इन्द्रमावाह्य, इन्द्रायमेघाधिपतयेसायुधाय-सपरिवारायभगवत्पार्षदायनम, इति मन्त्रेण गन्धपुष्पधूपदीपनैवेद्यैरिन्द्रं पूजयेत् । 'त्वन्नो अग्नेवरुणस्य विद्वान्देवस्यहेडोवयासिसिष्ठाः । यजिष्ठो-वह्नितमश्शोशुचानोविश्वाद्वेषागं्सिप्रमुमुग्ध्यमस्मत्—इति मन्त्रेण वह्नितम—मावाह्य, अग्नये तेजोधिपतये सायुधाय सपरिवाराय भगवत्पार्ष-दाय नम—इति मन्त्रेण गन्धपुष्पधूपदीपनैवेद्यैराग्निं पूजयेत् । दक्षिणकुम्भे 'सुगन्नः पन्था मभयं कृणोतु । यस्मिन्नक्षत्रे यम एति राजा । यस्मिन्नेनमभ्यषिञ्चन्तदेवाः । तदस्य चित्रगं् हविषा यजाम' इति मन्त्रेण यममावाह्य, यमाय धर्मराजाय सायुधाय सपरिवाराय भगवत्पार्षदाय नम—इति मन्त्रेण गन्धपुष्पधूपदीपनैवेद्यैर्यमं पूज-येत् । नैर्ऋतकुम्भे 'असुन्वन्तमयजमानमिच्छस्तेनस्येत्यान्तस्करस्या-न्वेषि । अन्यमस्मदिच्छसात इत्यानमोदेविनिर्ऋतेतुभ्यमस्तु—इति मन्त्रेण निर्ऋति मावाह्य, निर्ऋतये भूताधिपतये सायुधाय सपरि-वाराय भगवत्पार्षदाय नम—इति मन्त्रेण गन्धपुष्पधूपदीपनैवेद्यै र्निर्ऋतिं पूजयेत् । पश्चिमकुम्भे 'तत्वायामिब्रह्मणावन्दमानस्तदा-शास्तेयजमानोहविर्भिः । अहेडमानोवरुणेहबोध्युरुशगं् समान आयुः प्रमोषीरिति मन्त्रेण वरुणमावाह्य, वरुणाय जलाधिपतये सायुधाय सपरिवाराय भगवत्पार्षदाय नम—इति मन्त्रेण गन्धपुष्पधूपनैवेद्यै-र्वरुणं पूजयेत् । वायुकुम्भे 'आनोनियुद्भिश्शतिनीभिरध्वरं । सहस्रिणीभिरुपयाहियज्ञम् । वायो अस्मिन् हविषिमादयस्व । यूयम्पात-स्वस्तिभिस्सदान—इति मन्त्रेण वायुमावाह्य, वायवे प्राणाधिपतये सायुधाय सपरिवाराय भगवत्पार्षदाय नम—इति मन्त्रेण गन्धपुष्प-

दीपनैवद्यैर्वायुं पूजयेत् । सोमकुम्भे 'वयग्ंसोमव्रतेतव । मनस्तनूषु-बिभ्रतः । प्रजावन्तो अशीमहि'—इति मन्त्रेण सोममावाह्य सोमाय पीयूषाधिपतये सायुधाय सपरिवाराय भगवत्पार्षदाय नम—इति मन्त्रेण गन्धपुष्पधूपदीपनैवेद्यैस्सोमं पूजयेत् । ईशानकुम्भे 'तमीशानं-जगतस्तस्थुषस्पतिन्धियंजिन्वमवसेहूमहेवयम् । पूषानोयथावेदसा-मसद्वृधेरक्षितापायुरदब्धस्वस्तये'—इति मन्त्रेण ईशानमावाह्य, ईशानाय विद्याधिपतये सायुधाय सपरिवाराय भगवत्पार्षदाय नम—इति मन्त्रेण गन्धपुष्पदीपनैवेद्यैरीशानं पूजयेत् । ईशानेन्द्रान्तरे ब्रह्म-कलशे 'ब्रह्मजज्ञानं प्रथमंपुरस्ताद्विसीमतस्सुरुचोवेन आवः । सबु-ध्निया उपमा अस्य विष्ठास्सतश्चयोनिमसतश्चविवः—इति मन्त्रेण ब्रह्माण मावाह्य, ब्रह्मणे लोकाधिपतये सायुधाय सपरिवाराय भगव-त्पार्षदाय नम—इति मन्त्रेण गन्धपुष्पधूपदीपनैवेद्यैर्ब्रह्माणं पूजयेत् । निर्ऋतिपश्चिमयोर्मध्ये अनन्तकलशे 'स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छानश्शर्म सप्रथाः'—इति मन्त्रेणानन्तमावाह्य अनन्ताय नागाधिपतये सायुधाय सपरिवाराय भगवत्पार्षदाय नम—इति मन्त्रेण गन्धपुष्पधूपदीपनैवेद्यैरनन्तं पूजयेत् । एवं मण्टपद्वयेपि दिक्पतीन् पूजयेत् । तत आचार्यः ऋत्विग्भिस्सह यस्मिन् देशे पालिका स्स्थापितास्तं देशमागत्य स्थण्डिलं कुर्यात् ॥

अथाग्न्यलंकारादिक्रमः.

तच्चेष्टकामी कूर्मपृष्ठसमोन्नतं गोमयेनोपलिप्तं हस्तमात्रं चतुरश्रं कुर्यात । तत्र तण्डुलान्विकीर्य पश्चिमत आरभ्य प्राक्पर्यन्तम्, दक्षिणत आरभ्य उत्तरपर्यन्तं तिस्रस्तिस्रो रेखास्स्रुवेण दर्भमूलेन वा लिखित्वा तं दर्भं न्यस्य अद्भिरभ्युक्ष्य तृणं स्थण्डिले निक्षिप्य

ओं भूर्भुव स्सुव रोमित्यग्निं प्रतिष्ठाप्य अग्नेरुपरि समुद्दीपनार्थं समिधः प्रक्षिप्य, 'चत्वारिश्रृंगात्रयो अस्यपादा द्वेशीर्षे सप्तहस्तासो अस्य। त्रिधाबद्धो वृषभोरोरवीति महोदेवो मर्त्यांग् आविवेश।' इति मन्त्रेण जलाक्षतान् अग्नेः पश्चिमतः प्रतिष्ठाप्य, एष हि देवः प्रविशो नु सर्वाः पूर्वोहिजातस्सउगर्भे अन्तः। सविजायमान स्सजनिष्यमाणः प्रत्यङ्मुखास्थिष्ठति विश्वतोमुखः हे अग्ने प्राङ्मुखो देव ममाभिमुखो भव। इत्यग्निं प्रार्थ्य अग्निमलंकृत्य, ओम् अग्नये नमः। ओं जातवेदसे नमः। ओं सहोजसे नमः। ओं अजिराप्रभवे नमः। ओं वैश्वानराय नमः। ओं नर्यापसे नमः। ओं पङ्क्तिराधसे नमः। ओं विसर्पिणे नमः। ओं श्रीयज्ञपुरुषाय नमः। इतिमन्त्रैः प्रागाद्यष्टसु दिक्षु अक्षता न्निक्षिप्य ओं आत्मने नमः। इति स्वमूर्ध्नि ओं सर्वेभ्यश्श्रीवैष्णवेभ्यो नम इति श्रीवैष्णवोपर्यक्षतान्निक्षिपेत्। ओं अदितेनुमन्यस्वेतिदाक्षिणतः प्राचीनं, ओं अनुमतेनुमन्यस्वेति दक्षिणत उदीचीनं, ओं सरस्वतेनुमन्यस्वेत्युत्तरतः प्राचीनं, ओं देवसवितः प्रसुवेति समन्ततोऽग्निंपरिषिच्य परिषेचनक्रमेण प्रागुदगग्रैर्दर्भैरग्निं परिस्तीर्य अग्नेरुत्तरतः प्रागग्रान् दर्भान् संस्तीर्य दर्व्याज्यस्थाल्यौ प्रोक्षणी पूर्णपात्रे इध्मस्रुवौ च दर्भपङ्क्तिद्वये च निक्षिप्य, अधोमुखानि समौ साग्रौ द्वौ दर्भौ प्रादेशमात्रौ पवित्रीकृत्याद्भिरनुमृज्य प्रोक्षणीपात्रे निधाय, पवित्रांतर्हिते प्रोक्षणीपात्रे अक्षतसहिता अप आनीय, अग्नेः प्रदक्षिणमानीतं मुखसममुद्धृत्य स्वस्य पुरतस्थाप्य हस्तयोरङ्गुष्ठकनिष्ठकाभ्यामुदगग्रे पवित्रे गृहीत्वा प्रागन्तं क्रिरुत्पूय पात्राण्युत्तानानि कृत्वा सपवित्रेण हस्तेन त्रिः प्रोक्ष्य, इध्मं च विस्रस्य त्रिःप्रोक्ष्य, ते पवित्रे पूर्णपात्रे निधाय हस्तयोरङ्गुष्ठकनिष्ठिकाभ्यामुदगग्रे पवित्रे गृहीत्वा प्राग्वत्त्रिरुत्पूय

अग्नेः प्रदक्षिणतो निनीय मुखसममुद्धृत्य अग्ने रुत्तरतो दर्भानास्तीर्य तेषु निक्षिप्य दर्भैराच्छाद्य दक्षिणतस्त्रिभिर्दर्भैर्ब्रह्मासनमास्तीर्य । ओं ब्रह्मणे नम—'इति ब्रह्माणमावाह्य' ओं ब्रह्मणे नम इति मन्त्रेण आसनार्घ्यपाद्याचमनस्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणाभिर्ब्रह्माणमभ्यर्चयेत् । पवित्रे आज्यपात्रे निधाय । अग्नेः पश्चिमतः पवित्रान्तर्हितायामाज्यस्थाल्यां सचरुमाज्यन्निरूप्य उदीच्यामङ्गारेषु निधाय ज्वलता दर्भेणावद्योतनम् । द्वे दर्भाग्रे प्रच्छिद्य प्रक्षाळ्य आज्यपात्रे प्रत्यस्य, ज्वलता दर्भेण त्रिरग्निं प्रदक्षिणीकृत्य तं दर्भमैशान्यां निक्षिपेत् । आज्यमवतार्य अङ्गारान् वह्नौ निक्षिपेत् । सपवित्रेण हस्तेन अग्नेः प्रदक्षिणत आज्यमानीय स्वस्य पुरतस्स्थाप्य हस्तयोरङ्गुष्ठकनिष्ठिकाभ्यामुदगग्रे पवित्रे गृहीत्वा आज्यं त्रिरूत्पूय पवित्रग्रन्थिं विस्रस्य पवित्रमद्भिरभ्युक्ष्य प्रागग्रे पवित्रे अग्नौ प्रहरति । स्रुवमग्नौ प्रत्यर्प्य दर्भाग्रैस्स्रुवाग्रं दर्भमूलैस्स्रुवमूलं दर्भमध्यैस्स्रुवमध्यं सर्वतस्स्रुवबिलं सम्मार्ष्टि । पुनः प्रतितप्य प्रोक्ष्योत्तरतो निधाय दर्भानाद्धिस्संस्पृश्याग्नौ प्रहरति । परिधीन् परिदधाति । स्थविष्ठमुत्तराग्रं परिधिमग्नेः पश्चिमतो निक्षिप्याग्नेर्दक्षिणत अणीयांसं पारिधिं पूर्वाग्रं निक्षिप्य उत्तराग्रमग्नेः पश्चिमतो निहितं मध्यमं परिधिमुपस्पृश्य अग्नेः पुरस्ताद्दक्षिणोत्तरक्रमेण ऊर्ध्वाग्रे इतरे द्वे आधारसमिधावादधाति । परिस्तरणोपर्यन्योन्यसंस्पृष्टान्निधाय सव्येन पात्रं स्पृशन् दक्षिणेन हस्तेन परिध्यन्तः परिस्तरणोपरि अदितेनुमन्यस्व अनुमतेनुमन्यस्व सरस्वतेनुमन्यस्व देवसवितः प्रसुवेति समन्ततः प्रागारभ्य प्रदक्षिणं परिषिच्य इध्ममाज्येनाभ्यज्य, अस्मिन् भगवत्प्रतिष्ठाहोमकर्मणि ब्रह्मन् इध्ममाधास्य इति ब्रह्माणं प्रति ब्रूयात् । 'ओम् आधत्स्व' इति प्रति-

वचनम् । प्रजापतिम्मनसा ध्यायन् तूष्णीं घृताक्ताः पञ्चदश समिधो वह्नौ प्रक्षिपेत् । दर्व्या आज्यमादाय अग्नये स्वाहा । अग्नय इदं न मम । इत्यग्नेर्दक्षिणभागे जुहुयात् । इन्द्राय स्वाहा । इन्द्रायेदं न मम । इत्यग्नेर्दक्षिणभागे जुहुयात् । इन्द्राय स्वाहा । इन्द्रायेदन्न मम । प्रजापतये स्वाहा । प्रजापतय इदन्न मम । इत्यग्निमध्ये जुहुयात् ॥

द्विशीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकम् ।
वरदं शक्तिपाणिं च बिभ्राणं स्रुक्स्रुवौ तथा ॥

इत्यग्निं ध्यात्वा । ततस्सर्पिषा चरुणा मूलमन्त्रेण अष्टोत्तरशतवारं जुहुयात् ॥

केवलान्नं पायसान्नं मुद्गान्नं च गुडोदनम् ।

इति चतुर्विधं चरु । तस्य तस्य पाकश्चुल्यामिष्यते ॥

अथ षोडशाहुतीः.

पुरुषसूक्तेन ससर्पिषा षोडशाहुतीर्जुहुयात् । ओम् सहस्रशीर्षा पुरुषः । सहस्राक्षस्सहस्रपात् । स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम । पुरुष एवेदꣳ सर्वम् । यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानः । यदन्नेनातिरोहति ॥ २ ॥ पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदन्न मम । एतावानस्य महिमा । अतो ज्यायाꣳश्च पूरुषः । पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि ॥ ३ ॥ पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम । त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहाभवात्पुनः । ततो विष्वङ्व्यक्रामत् । साशनानशने अभि ॥ ४ ॥ पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम । तस्माद्विराडजायत । विराजो अधि पूरुषः । स जातो

अत्यरिच्यत । पश्चाद्भूमिमथो पुरः ॥ ५ ॥ पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम । यत्पुरुषेण हविषा । देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मश्शरद्धविः ॥ ६ ॥ पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम । सप्तास्यासन् परिधयः । त्रिस्सप्त समिधः कृताः । देवा यद्यज्ञं तन्वानाः । अबध्नन् पुरुषं पशुम् ॥ ७ ॥ पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम । तय्यँज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः । तेन देवा अयजन्त । साध्या ऋषयश्चये ॥ ८ ॥ पुरुषाय नारायणायस्वाहा । पुरुषाय नारायणायेदं न मम ॥ ९ ॥ तस्माद्यज्ञात्सर्वहुतः । संभृतंपृषदाज्यम् । पशूगँ् स्तागँ्श्चक्रे वायव्यान् । आरण्यान् ग्राम्याश्चये ॥ १० ॥ पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम । तस्माद्यज्ञात्सर्वहुतः । ऋचस्सामानिजज्ञिरे । छंदागँ्सिजज्ञिरेतस्मात् । यजुस्तस्मादजायत । पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम ॥ ११ ॥ तस्मादश्वा अजायन्त । येकेचोभयादतः । गावोहजज्ञिरेत्तस्मात् । तस्माज्जाता अजावयः । पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम ॥ १२ ॥ यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू । कावूरूपादावुच्येते । पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम ॥ १३ ॥ ब्राह्मणोऽस्यमुखमासीत् । बाहू राजन्यः कृतः । ऊरूतदस्य यद्वैश्यः । पद्भ्यागँ् शूद्रो अजायत । पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम ॥ १४ ॥ चन्द्रमा मनसो जातः । चक्षोस्सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत । पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम ॥ १५ ॥ नाभ्या आसदिन्तरिक्षम् । शीर्ष्णो द्यौस्समवर्तत । पद्भ्यां भूमिर्दिशश्श्रोत्रात् ।

तथा लोकाग्ँ् अकल्पयन् । पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम ॥ १६ ॥ वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तुपारे । सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाभिवदन् यदास्ते । धातापुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान् प्रदिशश्चतस्रः । तमेवं विद्वानमृतइहभवति । नान्यः पन्था अयनाय विद्यते । पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम ॥ १७ ॥ यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् । तेहनाकं महिमानस्सचन्ते । यत्रपूर्वे साध्यास्सन्ति देवाः । पुरुषाय नारायणाय स्वाहा। पुरुषाय नारायणायेदं न मम ॥ १८ ॥ ततो मूलमन्त्रेण शताहुतीर्हुत्वा । सप्तते अग्ने समिधस्सप्तजिह्वास्सप्तर्षयस्सप्तधामप्रियाणि । सप्तहोत्रास्सप्तधात्वायजन्ति । सप्तयोनीरापृणस्वाघृतेन स्वाहा । अग्नये सप्तवत इदं न मम । इत्यनेन मंत्रेण पूर्णाहुतिं कुर्यात् ॥

अथ अङ्कुरार्पणम् ।

तत आचार्यः प्राङ्मुखः पुण्याहजलेन सकलशाः पालिकाः प्रोक्ष्य पालिकामध्यकलशे ब्रह्माणमावाहयेत् । ओं भूः ब्रह्माणमावाहयामि । ओं भुवः चतुर्मुखमावाहयामि । ओग्ँ सुवः हिरण्यगर्भमावाहयामि । ओं भूर्भुवस्सुवः प्रजापतिमावहयामि । एभिर्मन्त्रैः शोभनाक्षतैः कलशे ब्रह्माणमावाहयेत् ॥ ओं भूः इन्द्र मावाहयामि ओं भुवः वज्रिणमावाहयामि । ओग्ँ सुवः शचीपतिमावाहयामि । ओं भूर्भुवस्सुवः शतक्रतुमावाहयामि । एभि र्मन्त्रैः पूर्वपालिकायां इन्द्रमावाहयेत् ॥ ओं भूः अग्निमावाहयामि । ओं भुवः वह्निमावाहयामि । ओग्ँ सुवः पावकमावाहयामि । ओं भूर्भुवस्सुवः वीतिहोत्रमावाहयामि । एभिः मन्त्रैः वह्निकोणस्थपलिकायां वह्नि

मावाहयेत् ॥ ओं भूः यममावाहयामि । ओं भुवः वैवस्वतमावाहयामि । ओगँ् सुवः पितृपतिमावाहयामि । ओं भूर्भुवस्सुवः धर्मराजमावाहयामि । एभिर्मन्त्रैः दक्षिणपालिकायां यममावाहयेत् ॥ ओं भूः निर्ऋति मावाहयामि । ओं भुवः यातुधान मावाहयामि । ओगँ् सुवः नक्तंचर मावाहयामि । ओं भूर्भुवस्सुवः पुण्यजनमावाहयामि । एभि-र्मन्त्रै र्निर्ऋतिपालिकायां निर्ऋतिमावाहयेत् ॥ ओं भूः वरुण-मावाहयामि । ओं भुवः प्रचेतसमावाहयामि । ओगँ् सुवः सुरूपिण मावाहयामि । ओं भूर्भुवस्सुवः अपांपतिमावाहयामि । एभिर्मन्त्रैः पश्चिमपालिकायां वरुणमावाहयेत् ॥ ओं भूः वायुमावाहयामि । ओं भुवः पवनमावाहयामि । ओगँ् सुवः मारुतमावाहयामि । ओं भूर्भुवस्सुव समीरणमावाहयामि । एभिः मन्त्रैर्वायव्यपालिकायां वायुमावाहयेत् ॥ ओं भूः सोममावाहयामि । ओं भुवः इन्दु-मावाहयामि । ओगं् सुवः निशाकरमावाहयामि । ओं भूर्भुवस्सुवः ओषधीपतिमावाहयामि । एभिर्मन्त्रैरुत्तरपालिकायां सोममावाहयेत् ॥ ओं भूः ईशानमावाहयामि । ओं भुवः शूलिनमावाहयामि । ओगँ् सुवः उमापतिमावाहयामि । ओं भूर्भुवस्सुवः पिनाकिनमावाहयामि । एभिर्मन्त्रैरीशानकोणस्थपालिकायां ईशानमावाहयेत् ॥ ब्रह्मणे नमः । इन्द्राय नमः । अग्नये नमः । यमाय नमः । निर्ऋतये नमः । वरुणाय नमः । वायवे नमः । सोमाय नमः । ईशानाय नमः । एभिर्मन्त्रैर्ब्रह्मेन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशान् आसनार्घ्यपाद्या-चमनस्नानवस्त्रोपवीत गन्ध पुष्प धूप दीप नैवेद्य ताम्बूल दक्षिणा-प्रदक्षिण नमस्कारैरर्चयेत् । उत्थाय, दिशां पतीन् नमस्यामि सर्वकाम-प्रलप्रदान् । कुर्वन्तु सफलं कर्म कुर्वन्तु सततं शुभम् । इति

ब्रह्मादीनुपस्थाय आचार्य उपदिशेत् । या जाता ओषधयो देवेभ्य-स्त्रियुगं पुरा । मन्दामि ब्रह्मणा महगं् शतन्धामानि सप्तच । शतं वो अम्बधामानि सहस्रमुतवोरुहः । अथाशतक्रत्वो यूयमिमम्मे अगदं कृत । पुष्पावतीः प्रसूवतीः फलिनीरफला उत । अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः । ओषधीरिति मातरस्तद्वो देवीरुपब्रुवे । रपागंसि विप्रुतीरितरपश्चातयमानाः । अश्वत्थेवो निषदनं पर्णेवो वसतिः कृता । गोभाज इत्किलासथयत्सनवथपूरुषम् । यदहं वाजयन्निमा ओषधी-र्हस्तहस्त आदधे । आत्मायक्ष्मस्य नश्यति पुरा जीवगृभोयथा । यदोषधयस्सङ्गच्छन्ते राजानस्समितावि्व । विप्रस्सउच्यते भिषग्रक्षो हामीवचातनः । निष्कृतिर्नामवो माता था यूयगँ्स्थः संकृतीः । सराः पतात्रिणस्थन यदामयति निष्कृत । अन्यावो अन्यामवत्वन्यान्यस्या उपावत । ता स्सर्वा ओषधय स्संविदाना इदम्मे प्रावतावचः । उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते । धनगँ् सनिष्यन्तीनामात्मानं तव पूरुषत । अति विश्वाः परिष्ठास्तेन इव व्रजमक्रमुः । ओषधयः प्राचुच्यवुर्यत्किञ्च तनुवागँ् रपः । यास्त आतस्थुरात्मानं या आविविशुः परुःपरुः । तास्ते यक्ष्मं विबाधन्ता मुम्रो मध्यमशीरिव । साकं यक्ष्म प्रपतश्येनेनकिकिदीविना । साकंवातस्य ध्राज्या साकं नश्य निहाकया । अश्वावतीगँ् सोमवती मूर्जयन्तीमुदोजसम् । आविस्सिसर्वा ओषधीरस्मा अरिष्टतातये । याः फलिनीर्या अफला अपुष्पायाश्च पुष्पिणीः । बृहस्पति प्रसूतास्तानो मुञ्चन्त्वगँ्हसः । या ओषधयस्सोम राज्ञीः प्रविष्टाः पृथिवीमनु । तासां त्वमस्युत्तमा प्रणो जीवातवेसुव । अवपतन्तीरवदान्दिव ओषधयः परि । यं जीवमश्नवामहैनसरिष्याति पूरुषः । याश्चेदमुपशृण्वन्तियाश्च

दूरं परागताः । इह संगत्यतास्सर्वा अस्मै सन्दत्तभेषजम् । मावोरिष-त्खनिता यस्मै चाहं खनामिवः । द्विपच्चतुष्पदस्माकगुँसर्वमस्त्वनातुरम् । ओषधयस्संवदन्ते सोमेन सह राज्ञा । यस्मै करोति ब्राह्मणस्तꣳ राजन् पारयामसि ' इत्यनुवाकेन नवधान्यविशिष्टपात्र मनुमन्त्रयेत् ॥ ' त्रातारमिन्द्रमवितारमिन्द्रगुँ हवे हवे सुहवगुँ शूरमिन्द्रम् । हुवेनु शक्रं पुरुहूतमिन्द्रगुँ स्वस्तिनो मघवाधात्विन्द्रः ' इति मन्त्रेण पूर्वपालिकायां । बीजावापनं कुर्यात् ॥ ' त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडोव-यासिसीष्ठाः । यजिष्ठो वह्नितमश्शोशुचानोविश्वाद्वेषागुँसि प्रमुमुग्ध्यस्मत् । इति मन्त्रेण अग्निकोणस्थ पालिकायां बीजावपानं कुर्यात् । सुगं नः पन्थामभयं कृणोतु । यस्मिन्नक्षत्रे यम एति राजा । यस्मिन्ननमभ्य-षिञ्चन्त देवाः । तदस्य चित्रगुँ हविषा यजाम । इति मन्त्रेण दक्षिणपालिकायां बीजावापनं कुर्यात् ॥ असुन्वन्तमयजमानमिच्छस्ते नस्येत्यांतस्करस्यान्वेषि । अन्यमस्मदिच्छसात इत्यानमो देवि निर्ऋते तुभ्यमस्तु । इति मन्त्रेण निर्ऋतिपालिकायां बीजावापनं कुर्यात् ॥ तत्वायामि ब्रह्मणावन्दमानस्तदाशास्ते यजमानोहविर्भिः । अहेडमानो वरुणेहबोध्युरुशगुंसमान आयुःप्रमोषीः । इति मन्त्रेण पश्चिमपालिकायां बीजावापनं कुर्यात् । अनोनियुद्भिश्शतिनीभिरध्वरगुंसहस्रिणीभिरुप-याहियज्ञम् । वायो अस्मिन् हविषिमादयस्व यूयम्पातस्वस्तिभिस्सदानः । इति मन्त्रेण वायुकोणस्थपालिकायां बीजावापनं कुर्यात् । वयगुं सोमव्रते तव । मनस्तनूषुबिभ्रतः । प्रजावन्तो आशीमहि । इति मन्त्रेणोत्तरपालिकायां बीजावापनं कुर्यात् । तमीशानं जगतस्तस्थु-षस्पतिंधियंजिन्वमवसे हूमहे वयम् । पूषानो यथा वेदसाम-सद्वृधेरक्षितापायुरदब्धस्वस्तये । इति मन्त्रेण ईशानपालिकायां

बीजापापनं कुर्यात्। शुद्धाभि र्मृद्भिः प्रच्छाद्य पयसा च सिक्त्वा प्रणवेनाभिमन्त्र्य सुरक्षितं कृत्वा प्रतिदिनं सायंप्रात स्संपूजये द्यावत्कर्मावसानम् ॥

II दीपां श्चारोपितान्कृत्वा ब्राह्मणान् ताम्बूलादिभिरभ्यर्च्य गुरुं धनेन संतोषयेत्। (I यावत्कर्मादौ प्राधान्यमेतत्—

अङ्कुरेषु च हीनेषु शुक्लेषु च तथा शुभम्।
विद्याच्छुभं प्ररूढेषु विपरीतेषु चा शुभम् ॥ ३० ॥
कर्मार्थं मङ्कुराण्यादौ य स्समारोपये द्गुरुः।
स एव कर्म कात्स्न्र्येन कुर्यात्प्राज्ञोपि ने तरः ॥ ३२ ॥
अनुज्ञया वा तत्पुत्रश्शिष्यो वा तत्समाचरेत्।
ऋत्विजो वापि तत्कर्म यद्य शक्तो गुरुर्भवेत् ३३ ॥) II

इत्यङ्कुरार्पणम् ॥

अथाभ्युदयिकश्राद्धं प्रातःकाले कुर्यात्.

तत्रोपवीती प्राङ्मुख उपविश्य नमितदक्षिणवामजानुः प्राग्रैः ऋजुभिः युग्मैः तिलार्थे यवैः देवतीर्थेन प्रदक्षिणं सर्वं कुर्यात् ॥

तत्राऽयं प्रयोगः.

आचम्य पवित्रपाणिः प्राणानायम्योपवीती श्रीगोविंदगोविंदगोविंद आद्यश्रीभगवतो महापुरुषस्य श्रीविष्णोराज्ञया प्रवर्तमानस्य आद्यब्रह्मणः द्वितियपरार्धे श्रीश्वेतवराहकल्पे वैवस्वतमन्वन्तरे कलियुगे प्रथमपादे जम्बूद्वीपे भरतवर्षे भरतखण्डे मेरो र्दक्षिणे पार्श्वे अस्मिन् वर्तमाने व्यावहारिके प्रभवादिषष्टिसंवत्सराणां मध्ये अमुकसंवत्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे

अमुकनक्षत्रे श्रीभगवदाज्ञया भगवत्कैंकर्यरूपं भगवत्प्रीत्यर्थं भगवत्प्रतिष्ठोत्सवनिमित्तं वसुसत्यसंज्ञिकविश्वेदेवपूर्वकममुकगोत्राणां प्रपितामही पितामही मातृणां प्रपितामहपितामहपितृणां अमुकगोत्राणां वृद्धप्रमातामहप्रमातामहमातामहानां एभिरन्यै राभ्युदयिकश्राद्धमहं करिष्ये । नान्दीमुखानां पितृणां मातामहानां कर्तव्यभगवत्प्रतिष्ठानिमित्ताभ्युदयिके द्वे श्राद्धे वैश्वदेविकौ भवन्तौ मयानिमन्त्रितौ इति द्वौ ब्राह्मणौ निमन्त्रयेत् ॥

अमुकगोत्राणां प्रपितामहीपितामहीमातृणां नान्दीमुखीनां अद्यकर्तव्यभगवत्प्रतिष्ठानिमित्ताभ्युदयिकश्राद्धे भवन्तौ मया निमन्त्रितौ । इति पीताक्षतैः मात्रर्थं द्वौ ब्राह्मणौ निमन्त्रयेत् । अमुकगोत्राणां प्रपितामहपितामहपितृणां नान्दीमुखानां अद्यकर्तव्यभगवप्रतिष्ठानिमित्ताभ्युदयिकश्राद्धे भवन्तौ इति पीताक्षतैः पित्रर्थं द्वौ ब्राह्मणौ निमन्त्रयेत् । अमुकगोत्राणां वृद्धप्रमातामहप्रमातामहमातामहानां नान्दीमुखाना मद्यकर्तव्यभगवत्प्रतिष्ठानिमित्ताभ्युदयिकश्राद्धे भवन्तौ मया निमन्त्रिता विति पीताक्षतैः मातामहार्थं द्वौ ब्राह्मणौ निमन्त्रयेत् । नान्दीमुखानां मातृणां नान्दीमुखानां पितृणां मातामहानामद्यकर्तव्यभगवत्प्रतिष्ठानिमित्ताभ्युदयिकश्राद्धे श्राद्धसंरक्षणार्थं विष्णुरूपेण भवान्निमन्त्रित इति पीताक्षतैर्विष्वर्थ मेकं ब्राह्मणं निमन्त्रयेत् । एवं नवब्राह्मणान् वृणुयात् । मधुवाताऋतायते मधुक्षरन्तिसिन्धवः । माध्वीर्नस्सन्त्वोषधीः । मधुनक्तमुतोषसि मधुमत्पार्थिवगूंरजः । मधुद्यौरस्तुनः पिता । मधुमान्नोवनस्पतिर्मधुमागूं अस्तु सूर्यः । माध्वीर्गावोभवन्तुनः । इति ऋक्त्रयं श्रावयेत् । ओं वसुसत्य सज्ञा विश्वेदेवा एतानि पाद्याचमनगन्धपुष्पधूपदीप यज्ञोपवीतवासांसि वो नमः । इति पाद्यादीनि दद्यात् ।

ओं प्रपितामह पितामह पितरः एतानि पाद्यार्घ्याचमनगन्धपुष्पधूप यज्ञोपवीतवासांसि वो नम इति पाद्यादीनिदद्यात्। ओं श्राद्धसंरक्षक श्रीमहाविष्णो एतानि पाद्यार्घ्याचमनगन्धपुष्पधूपदीपयज्ञोपवीतवासांसि ते नमः। इति पाद्यादीनि दद्यात् ॥

अन्नादिपरिषेचनक्रमः.

ततोऽन्नादिपरिषेचनं कृत्वा गायत्र्या अन्नं प्रोक्ष्य-पृथिवीतेपात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखेजुहोमि ब्राह्मणानांत्वा प्राणापानयोर्जुहोम्य-क्षितमसिमैषां क्षेष्ठा अमुत्रामुष्मिन् लोके। इति मन्त्रेण पात्रं स्पृष्ट्वा। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पाᳬसुरे। इति मन्त्रेण ब्राह्मणदक्षिणाङ्गुष्ठमन्ने निवेश्य भगवत्प्रतिष्ठाभ्युदयिकश्राद्धसंबन्धिवसु-सत्यसंज्ञिका विश्वेदेवा इदमन्नं सोपकरणं वो नम इति विश्वेदेवपात्र-समीपे पीताक्षतोदकं देवतीर्थेनोत्सृजेत्। गायत्र्या अन्नं प्रोक्ष्य। पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां त्वा प्राणापानयोर्जुहोम्यक्षितमसि मैषां क्षेष्ठा अमुत्रामुष्मिन् लोके। इति मन्त्रेण पात्रं स्पृष्ट्वा। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य-पाᳬसुरे। इति मन्त्रेण ब्राह्मणदक्षिणाङ्गुष्ठमन्ने निवेश्य। प्रपितामही पितामही मातरः नान्दीमुख्यः इदमन्नं सोपकरणं वो नम इति मातृ-पात्रसमीपे पीताक्षतोदकं देवतीर्थेन दद्यात्। गायत्र्या अन्नं प्रोक्ष्य पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां त्वा प्राणापानयोर्जुहोम्यक्षितमसि मैषां (मामे) क्षेष्ठा अमुत्रामुष्मिन् लोके इति मन्त्रेण पात्रं स्पृष्ट्वा इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढ-मस्यपागँसुरे। इति मन्त्रेण ब्राह्मणदक्षिणाङ्गुष्ठमन्ने निवेश्य प्रपितामह-पितामहपितरः नान्दीमुखा इदमन्नं सोपकरणं वो नम इति पीताक्षतो-

दकं पितृसमीपे देवतीर्थेनोत्सृजेत् ॥ गायत्र्याऽन्नं प्रोक्ष्य । पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां त्वा प्राणापानयोर्जुहोम्यक्षितमसि मैषां क्षेष्ठा अमुत्रामुष्मिन् लोके । इति मन्त्रेण पात्रं स्पृष्ट्वा । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपागूँसुरे । इति मन्त्रेण ब्राह्मणदक्षिणाङ्गुष्ठमन्ने निवेश्य वृद्धप्रमातामहप्रमातामहमातामहा नान्दीमुखा इदमन्नं सोपकरणं वो नमः । इति पीताक्षतोदकं देवतीर्थेन मातामहपात्रसमीपे दद्यात् । गायत्र्याऽन्नं प्रोक्ष्य । पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां त्वा प्राणापानयोर्जुहोम्यक्षितमसि मैषां क्षेष्ठां अमुत्रामुष्मिन् लोके इति मन्त्रेण पात्रं स्पृष्ट्वा । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपागं सुरे । अनेन ब्राह्मणदक्षिणाङ्गुष्ठमन्ने निवेश्य । श्राद्धसंरक्षकश्रीमहाविष्णो इदमन्नं सोपकरणं ते नम इति पीताक्षतोदकं विष्णुसमीपे देवतीर्थेनोत्सृजेत् । ओं भूर्भुवस्सुवः । सत्यन्त्वर्तेनपरिषिञ्चामीति—मन्त्रेण परिषेचनं कारयित्वा । भगवच्चरणारविन्दतीर्थं ब्राह्मणहस्ते दत्वा ततो यजमानः दूर्वापीताक्षतोदकं हस्ते गृहीत्वा । यज्ञेश्वरो हव्यकव्यसमस्तभोक्ता अव्ययात्मा हरिरीश्वरोऽत्र । तत्सन्निधानादपयान्ति सद्यो रक्षांसि भीता ह्यसुराश्चसर्वे । त्वां योगिनश्चिन्तयन्ति त्वां यजन्ति च यज्वनः । हव्यकव्यभुगस्माकं स नो विष्णुः प्रसीदतु । एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः । त्रीन्लोकान्व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः । अनेन श्रीवैष्णवाराधनरूपेणाभ्युदयिकश्राद्धेन वसुसत्यसंज्ञिकविश्वेदेवरूपी नान्दीमुख—वृद्धप्रमातामहप्रमातामहमातामह—स्वरूपी, नान्दीमुख प्रपितामहपितामहपितृस्वरूपी, प्रत्यक्ष श्रीमहाविष्णुरूपी सर्वरूपी भगवान् सदेवः श्रीजनार्दनः प्रीयतामित्युच्चारयन् प्राङ्मुखोनामितदक्षिणजानु

रुपवीति दूर्वापीताक्षतोदकं सर्वं देवतीर्थेन भूमावुत्सृजेत् । अमृतोपस्तरणमसीत्यनेन पूर्वापोशनं कारयेत् । ओंप्राणायस्वाहा । ओंअपानाय स्वाहा । ओं व्यानाय स्वाहा । ओं उदानाय स्वाहा । ओं समानाय स्याहा । इति पञ्च प्राणाहुतीः कारयित्वा ततो हस्तोदकं दद्यात् । अश्नत्सु तेषु यथाशक्ति मूलमन्त्रमन्त्ररत्नादीन् जपेत् । ततस्तृप्तान् ज्ञात्वासकृत्सकृदपो दत्वा गायत्रीं, मधु वाता ऋताय ते मधु क्षरन्ति सिन्धवः । माध्वीर्नस्संत्वौषधीः । मधु नक्त मुतोषसि मधुमत्पार्थिवगं रजः । मधु द्यौरस्तुनः पिता । मधुमान्नो वनस्पति र्मधुमाग् अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः । ओं मधु मधु मधु इति जपेत् । ततस्सम्पन्नमित्युक्ते अमृतापिधानमसीत्यनेन उत्तरापोशनं कारयेत् । विश्वेदेवाः प्रियन्तामित्युक्त्वा विश्वेदेवसमीपे क्षीरयवोदकं दद्यात् । नान्दीमुखाः पितरः प्रियन्तामित्युक्त्वा क्षीरयवोदकं देवतीर्थेन पितृसमीपे दद्यात् । नान्दीमुखामातामहाः प्रियन्तामित्युक्त्वा क्षीरयवोदकं देवतीर्थेन मातामहसमीपे दद्यात् । विष्णुः प्रियता मित्युक्त्वा क्षीरयवोदकं विष्णुसमीपे दद्यात् । ततो विप्रानुत्थाप्य मुखहस्तशोधनगण्डूषपादप्रक्षाळनाचमनानि कारयेत् । उपविष्टेषु तेषु ताम्बूलपूगफलएलालवंगजातीफलद्राक्षामलकहिरण्ययवान् दक्षिणां दत्वा, ततो दातारो नोभिवर्धन्तां वेदास्सन्ततिरेव नः श्रद्धा च नो माव्यपगाद्बहुदेयञ्च नोऽस्तु । अन्नञ्चनो बहु भवेदतिथींगंश्च लभेमहि । याचितारश्च नस्सन्तु माचयाचिष्म कञ्चन । इति यजमान आशीः प्रार्थनं कुर्यात् । ततो विप्राः दातारो वोभिवर्धन्तां वेदास्सन्तति रेववः । श्रद्धा च वो माव्यवगाद्बहुदेय श्च वोस्तु । अन्नं च वो बहु भवेदतिथींगंश्च लभध्वम् । याचितार श्च वं स्सन्तु मा च याचध्वं कञ्चन । इति ते ब्रूयुः । वाजे

वाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः । अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः । इत्युच्चार्य प्रणम्य विप्रान् विसर्जयेत् । तत आचम्य —

प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोःसंपूर्णं स्यादिति श्रुतिः ॥

इति पठित्वा उत्तरकर्म कुर्यात् ॥

तत आचार्यः ऋत्विग्यजमानपुरस्सरं मङ्गळतूर्यवेदघोषेण जलपूर्णकलशब्राह्मणकन्याश्च अग्रे कृत्वा प्रासादं गच्छेत् ॥

प्रासादगमनवास्तुपूजादिक्रमः

प्रासादद्वारदेशे विष्वक्सेनं सकलविबुधप्रौढसेनाधिनाथं ध्यायेत्-

मुद्राचक्रे करयुगधरं शङ्खदण्डौ दधानं
सर्वेषां पार्षदानां प्रबलतरबलं यः प्रगण्यो महात्मा ।
यस्याज्ञां नागवक्त्रप्रमुखगणगणा धारयेयुस्समस्ता
ध्याये देवं दलितदनुजं सूत्रवत्या समेतम् ॥

यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं समाश्रये ॥

इति विष्वक्सेनं ध्यात्वा प्रणमेत् । प्रासादं प्रविश्य प्रासादस्य दक्षिणपार्श्वकोणे वास्तुदेवं तण्डुलोपरि अधोमुखं पुरुषाकृतिमुल्लिख्य तदुपरि तदुपरि धर्मसप्तकनिर्मितं कूर्चं निक्षिप्य तत्र ओं वं वास्तुपुरुषाय नमः आगच्छागच्छेत्यावाह्य; वास्तुनाथं गन्धादिभिरभ्यर्च्य वास्तुनाथस्य शिरसि ओं अंशुमालिने नम इति अंशुमालिनमावाह्य गन्धपुष्पधूपदीपनैवेद्यैरर्चयेत् । बाहुमूले (झष) ध्वजाय नम इति भूषणध्वजमावाह्य

गन्धपुष्पधूपदीपनैवेद्यैरर्चयेत् । कूर्परे कुमाराय नमः इति कुमारमावाह्य गन्धपुष्पधूपदीपनैवेद्यैरर्चयेत् । हस्ते विनायकाय नम इति विनायकमावाह्य गन्धपुष्पधूपदीपनैवेद्यैरर्चयेत् । पादयुगळे अश्विनीदेवताभ्यां नमः इत्यश्विनीदेवावावाह्य गन्धपुष्पधूपदीपनैवेद्यैरर्चयेत् । मध्ये चन्द्राय नम इति चन्द्रमावाह्य गन्धपुष्पधूपदीपनैवेद्यैरर्चयेत् । पार्श्वयोर्दुर्गायै नम इति दुर्गामावाह्य गन्धपुष्पधूपदीपनैवेद्यैरर्चयेत् । कूर्परे अष्टमातृभ्यो नम इत्यष्टमातृरावाह्य गन्धपुष्पधूपदीपनैवेद्यैरर्चयेत् । बाहुमूले स्थाणवे नम इति स्थाणुमावाह्य गन्धपुष्पधूपदीपनैवेद्यैरर्चयेत् । हृदये विष्णवे नम इति भगवन्तमावाह्य गन्धपुष्पधूदीपनैवेद्यैरर्चयेत् । नाभिदेशे ब्रह्मणे नम इति ब्रह्माणमावाह्य गन्धपुष्पधूपदीपनैवेद्यैरर्चयेत् । पूर्वे तत्परितश्चाष्टसु दिक्षु क्रमेण ओं लं इन्द्राय नम इति इन्द्रमावाह्य गन्धपुष्पधूपदीपनैवेद्यैरर्चयेत । अग्निकोणे ओं रं अग्नये नम इत्यग्निमावाह्य गन्धपुष्पधूपदीपनैवेद्यैरर्चयेत् । दक्षिणे ओं हं यमाय नम इति यममावाह्य गन्धपुष्पधूपदीपनैवेद्यैरर्चयेत् । नैऋत्यां ओं षं निर्ऋतये नम इति निर्ऋतिमावाह्य गन्धपुष्पधूपदीपनैवेद्यैरर्चयेत् । पश्चिमे ओं वं वरुणाय नम इति वरुणमावाह्य गन्धपुष्पधूपदीपनैवेद्यैरर्चयेत् । वायव्ये ओं यं वायवे नम इति वायुमावाह्य गन्धपुष्पादिभिरर्चयेत् । उत्तरे ओं सं सोमाय नम इति सोममावाह्य गन्धादिभिरभ्यर्चयेत् । ईशानकोणे ओं शं शङ्कराय नम इतीशानमावाह्य गन्धादिभिरभ्यर्चयेत् । वास्तुनाथस्योत्तरपार्श्वे ओं क्षं क्षेत्रपालाय नम इति क्षेत्रपालमावाह्य गन्धादिभिरभ्यर्चयेत् ॥

अथाग्निसन्धानक्रमः

ततो वास्तुनाथस्य पश्चिमदिग्भागे इष्टकार्मा कूर्मपृष्ठसमोन्नतं

गोमयेनोपलिप्तं हस्तमात्रं चतुरश्रं कुर्यात् । तत्र तण्डुलान् प्रकीर्य पश्चिमत आरभ्य उत्तरपर्यन्तं तिस्रस्तिस्रो रेखाः स्रुवेण दर्भमूलेन वा लिखित्वा तत्र दर्भं न्यस्य अद्भिरभ्युक्ष्य तृणं स्थण्डिले निक्षिप्य पात्रद्वयेनाग्निमादाय ओं भूर्भुवस्सुवरोमित्यग्निं प्रतिष्ठाप्य अग्न्याधानयनपात्रयोरुदकं निनयेत् ॥

तथा च—

अग्न्याधानयनपात्रे च आर्द्रीकृत्वा समूहयेत् ।
अकृते नष्टहोमस्स्यादायुस्तत्र न पूर्यते ॥

इति । अधो क्षणतोयशेषमुत्सिच्य अग्नेरुत्तरतः पूर्ववत्तोयमुपदध्यात् । याज्ञिकैरिन्धनैः प्रज्वाल्य—

चत्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासोऽस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यागं आविवेश ॥

इति मन्त्रेण जलाक्षतानग्नेः पश्चिमतः प्रतिष्ठाप्य—

एष हि देवः प्रदिशोनु सर्वाः पूर्वो हि जातस्सउगर्भे अन्तः ।
सविजायमानस्सजनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः ॥

हे अग्ने प्राङ्मुखो देव ममाभिमुखो भव । इत्यग्निं प्रार्थ्य । अग्निमलंकृत्य ओं अग्नये नमः । ओं जातवेदसे नमः । ओं सहोजसे नमः । ओं ओं अजिराप्रभवे नमः । ओं वैश्वानराय नमः । ओं नर्यापसे नमः । ओं पङ्क्तिराधसे नमः । ओं विसर्पिणे नमः । ओं श्रीयज्ञपुरुषाय नमः । इत्यादिमन्त्रैः प्रागाद्यष्टसु दिक्षु अक्षतान्निक्षिप्य । ओं आत्मने नम इति स्वमूर्ध्नि । ओं सर्वेभ्यश्श्रीवैष्णवेभ्यो नम इति श्रीवैष्णवोपरि अक्षतान् निक्षिपेत् । अदितेनुमन्यस्वेति दक्षिणतः प्राचीनम् । ओं अनुमतेनुमन्यस्वेति दक्षिणत उदीचीनम् । ओं सरस्वतेनुमन्यस्वेत्युत्तरतः

प्राचीनम्। ओं देवसवितः प्रसुवेति समन्ततोऽग्निं परिषिच्य। परिषेचनक्रमेण प्रागुदगग्रैर्दर्भैरग्निं परिस्तीर्य। अग्नेरुत्तरतः प्रागग्रान्दर्भान्संस्तीर्य। दर्व्याज्यस्थाल्यौ प्रोक्षणी पूर्णपात्रे इध्मस्रुवौ च दर्भपङ्क्तिद्वये निक्षिप्य अधोमुखानि समौ साग्रौ द्वौ दर्भौ प्रादेशमात्रौ पवित्रीकृत्य अद्भिरनुमृज्य प्रोक्षणीपात्रे निधाय पवित्रान्तर्हिते प्रोक्षणीपात्रे अक्षतसहिता अप आनीय अग्नेः प्रदक्षिणतो निनीय मुखसममुद्धृत्य स्वस्य पुरतः स्थाप्य हस्तयोरङ्गुष्ठकनिष्ठिकाभ्यामुदगग्रे पवित्रे गृहीत्वा प्राक् त्रिरुत्पूय पात्राण्युत्तानानि कृत्वा सपवित्रेण हस्तेन त्रिः प्रोक्ष्य इध्मञ्च विसृज्य त्रिः प्रोक्ष्य ते पवित्रे पूर्णपात्रे निधाय हस्तयोरङ्गुष्ठकनिष्ठिकाभ्यामुदगग्रे पवित्रे गृहीत्वा प्राक् त्रिरुत्पूय अग्नेः प्रदक्षिणतो निनीय मुखसममुद्धृत्य अग्नेरुत्तरतो दर्भानास्तीर्य तेषु निक्षिप्य दर्भैराच्छादयेत्। दक्षिणतस्त्रिभिर्दर्भैर्ब्रह्मासनमास्तीर्य ब्रह्मणे नम इति मन्त्रेणासनार्घ्यपाद्याचमनस्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणाभिर्ब्रह्माणमभ्यर्चयेत्। ते पवित्रे आज्यपात्रे निधाय अग्नेः पश्चिमतः पवित्रान्तर्हितायामाज्यस्थाल्यामाज्यन्निरूप्य उदीच्यामङ्गारेषु निधाय प्रज्वलितैर्दर्भाग्रैस्संदीप्य द्वे दर्भाग्रे प्रच्छिद्य प्रक्षाळ्य आज्यपात्रे प्रत्यस्य ज्वलता दर्भेण त्रिरग्निं प्रदक्षिणीकृत्य तं दर्भं नैर्ऋत्यां निक्षिपेत्। आज्यमवतार्य अङ्गारान्वह्नौ निक्षिपेत्। सपवित्रेण हस्तेन अग्नेः प्रदक्षिणतः आज्यमानीय स्वस्य पुरतस्स्थाप्य हस्तयोरङ्गुष्ठकनिष्ठिकाभ्यामुदगग्रे गृहीत्वा आज्यं पश्चात्रिरुत्पूय पवित्रग्रन्थि विसृज्य पवित्रमद्भिरभ्युक्ष्य प्रागग्रे पवित्रे अग्नौ प्रतितप्य दर्भाग्रैस्स्रुवाग्रं दर्भमूलैस्स्रुवमूलं दर्भमध्यैस्स्रुवमध्यं सर्वतस्स्रुवतस्स्रुवाबिलं सम्मार्ष्टि। पुनः प्रतितप्य प्रोक्ष्य उत्तरतो निधाय दर्भानद्भिस्सगुंस्पृश्याग्नौ प्रहरति। परिस्तरणोपरि अन्योन्यसंस्पृष्टान्परिधीन्परि-

दधाति स्थविष्ठमुत्तराग्रं परिधिमग्नेः पश्चिमतो निक्षिप्य अग्नेर्दक्षिणतोऽणीयांसं परिधिं पूर्वाग्रं निक्षिप्य उत्तराग्रमग्नेः पश्चिमतो निहितं मध्यमं परिधिमुपस्पृश्याग्नेः पुरस्ताद्दक्षिणतोत्तरक्रमेण प्राग्रे इतरे द्वे आधारसमिधावादधाति । तथा आधारसमिधावग्नौ सर्वकर्मसु निक्षिपेत् । आदधातीतिस्थानध्याननिश्चित्योक्तं करोति । नो सव्येन पात्रं स्पृशन् । दक्षिणेन हस्तेन परिध्यन्तः परिस्तरणोपरि अदितेन्वमग्मंस्था इति दक्षिणतः प्राचीनं । अनुमतेन्वमग्मंस्था इति दक्षिणत उदीचीनं । सरस्वतेन्वमग्मंस्था इत्युत्तरतः प्राचीनम् । देवसवितःप्रसुवेति समंततः प्रागारभ्य प्रदक्षिणं परिषिच्य इध्ममाज्येनाभ्यज्य अस्मिन्भगवत्प्रतिष्ठाङ्गवास्तुहोमकर्मणि ब्रह्मन् इध्ममाधास्य इति ब्रह्माणं प्रतिब्रूयात् । ओम् आधत्स्वेति प्रतिवचनम् । प्रजापतिं मनसा ध्यायन् तूष्णीं घृताक्ताः पञ्चदशसमिधो वह्नौ निक्षिपेत् । दर्व्या आज्यमादाय । अग्नये स्वाहा । अग्नय इदन्नमम । इत्यग्नेर्दक्षिणभागे जुहुयात् । सोमायस्वाहा सोमायेदन्नमम इत्यग्नेरुत्तरभागे जुहुयात् । इन्द्रायस्वाहा इन्द्रायेदं न मम प्रजापतयेस्वाहा प्रजापतय इदं न मम इत्यग्निमध्ये जुहुयात्—

द्विशीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकम् ।
वरदं शक्तिपाणिं च बिभ्राणं स्रुक्स्रुवौ तथा ॥

इत्यग्निं ध्यात्वा । ओम् षान्नमः पराय परमेष्ठ्यात्मने नमस्स्वाहा । परमेष्ठ्यात्मन इदन्न मम । ओं, यान्नमःपराय पुरुषात्मने नम स्स्वाहा । पुरुषात्मन इदन्न मम । ओं, रान्नमः पराय विश्वात्मने नम स्स्वाहा । विश्वात्मन इदन्न मम । ओं, वा न्नमः पराय निवृत्त्यात्मने नम स्स्वाहा । निवृत्त्यात्मन इदन्न मम । ओं. लान्नमः पराय सर्वात्मने नमस्स्वाहा ।

सर्वात्मन इदन्न मम । इति पञ्चाहुतीनाम्मिळिताना मेकाहुतिः । एव-म्भूता अष्टोत्तरशताहुतीस्सर्पिषा जुहुयात् । ससर्पिषा पायसान्नेन पुरुष-सूक्तेन षोडशाहुतीर्जुहुयात् । सहस्रशीर्षापुरुष इत्यादिना सर्पिषा चरुणा पुरुषसूक्तेन षोडशाहुतीर्हुत्वा वास्तुदेवाङ्गावाहितदेवतानामभिश्चरुणा होमं कुर्यात् । ओं. अंशुमालिने स्वाहा । अंशुमालिन इदन्न मम । ओं, ऋषध्वजाय स्वाहा ऋषध्वजायेदन्न मम । ओं विनायकाय स्वाहा विनायकायेदं न मम । ओं अश्विनीदेवाभ्यां स्वाहा अश्विनी-देवाभ्यामिदं न मम । ओं चन्द्राय स्वाहा । चन्द्रायेदं न मम । ओं दुर्गायै स्वाहा दुर्गाया इदं न मम । ओं अष्टमातृभ्यस्स्वाहा अष्टमातृभ्य इदं न मम । ओं, स्थाणवे स्वाहा । स्थणव इदं न मम । ओं भगवते स्वाहा भगवत इदं न मम । ओं ब्रह्मणे स्वाहा ब्रह्मण इदन्न मम । ओं इन्द्राय स्वाहा इन्द्रायेदन्न मम । ओं अग्नये स्वाहा अग्नय इदन्न मम । ओं यमाय स्वाहा । यमायेदन्न मम । ओं, निर्ऋ-तये स्वाहा । निर्ऋतय इदन्न मम । ओं, वरुणाय स्वाहा । वरुणायेद न्न मम । ओं वायवे स्वाहा । वायव इदन्न मम । ओं सोमाय स्वाहा । सोमायेदन्न मम । ओं ईशानाय स्वाहा । ईशानायेदन्न मम । ओं क्षेत्रपालाय स्वाहा । क्षेत्रपालायेदन्न मम । ओं अंशुमालिने नम इत्यंशु-मालिने बलिं दद्यात् । ओं ऋषध्वजाय नम इति ऋषध्वजाय बलिं दद्यात् । ओं कुमाराय नम इति कुमाराय बलिं दद्यात् । ओं विनायकाय नम इति विनायकाय बलिं दद्यात् । ओं अश्विनीदेवाभ्यां नम इत्यश्विनी-देवाभ्यां बलिं दद्यात् । ओं चंद्राय नम इति चंद्राय बलिं दद्यात् । ओं दुर्गायै नम इति दुर्गायै बलिं दद्यात् । ओं अष्टमातृभ्यो नम इत्यष्टमातृभ्यो बलिं दद्यात् । ओं स्थाणवे नम इति स्थाणवे बलिं

दद्यात् । ओं भगवते नम इति भगवते बलिं दद्यात् । ओं ब्रह्मणे नम इति ब्रह्मणे बलिं दद्यात् । इन्द्राय नम इतीन्द्राय बलिं दद्यात् । अग्नये नम इत्यग्नये बलिं दद्यात् । ओं यमाय नम इति यमाय बलिं दद्यात् । निर्ऋतये नम इति निर्ऋतये बलिं दद्यात् । ओं वरुणाय नम इति वरुणाय बलिं दद्यात् । ओं वायवे नम इति वायवे बलिं दद्यात् । ओं सोमाय नम इति सोमाय बलिं दद्यात् । ओं ईशानाय नम इतीशानाय बलिं दद्यात् । ओं, क्षेत्रपालाय नम इति क्षेत्रपालाय बलिं दद्यात् ॥

ओं सप्तते अग्ने समिध स्सप्तजिह्वा स्सप्तर्षयस्सप्तधाम प्रियाणि । सप्तहोत्रा स्सप्तधात्वा यजन्ति स्सप्तयोनीरापृणस्वा घृतेन स्वाहा । अग्नये सप्तवत इदं न मम । इत्यनेन पूर्णाहुतिं कुर्यात् । अनन्तरं सर्वतो मन्दिरं मार्जयित्वा गोमयेनोपलिप्य शुद्धजलेन क्षाळयेत् । पुण्याहजलैः प्रोक्ष्य विचित्रतोरणैर्विचित्रपताकैरक्षवल्यादिभिरलंकृत्य, अखण्डदीपान् संवर्धयित्वा, ओं नमः अस्त्रायफट् इत्यनेन मन्त्रेण अक्षतासिद्धार्था-नष्टदिक्षु विकिरेत् ॥

नास्तिकान् भिन्नमर्यादान् देवब्राह्मणानिन्दकान् ।
पापरोगयुतान् मर्त्यान् निन्दितान्पिशुनांस्तथा ॥
पाषण्डिनो हीनवृत्तीनतिलोमान्समत्सरान् ।
लुब्धान्मूर्खानविदुषो बहिर्निर्वासयेत्ततः ॥

ओं रक्षोहणो वलगहनो वैष्णवान्खनामीदमहं तं वलगमुद्वपामि यन्नस्स-मानो यमसमानो निचखानेदमेनमधरं करोमि योनस्समानो योऽसमानोऽ-रातीयति गायत्रेण छन्दसाऽवबाढो वलगः किमत्र भद्रं तन्नौ सह विराडसि सपत्नहा सम्राडसि भ्रातृव्यहा स्वराडस्यभिमातिहा वि-श्वा

राडसि विश्वासां नाष्ट्राणाग्ं हन्ता' इत्यनेन मन्त्रेण रक्तपीततन्तुभिः प्रासादं सर्वतो वेष्टयेत् ॥

गोदानम्.

ततो हस्तपादौ प्रक्षाळ्याचम्य यजमानहस्तेन गोत्रोऽमुकशर्माहं कृतैतद्भगवत्प्रतिष्ठानिमित्तकवास्तुहोमसाङ्गतासिद्ध्यर्थं सुवर्णशृङ्गीं रौप्यछुरां ताम्रपृष्ठीं प्रवालोष्ठीं मुक्तापुच्छीं सवत्सां कांस्यदोहनां इमां गां अमुकशर्मणे ब्राह्मणाय तुभ्यं दातुमुत्सृजे । इति ब्राह्मणहस्ते जलाक्षतसहितहिरण्यं दद्यात् । ततो विप्रं परिक्रम्य प्रणमेत् । ततो ब्राह्मणेभ्यो भूयसीं दक्षिणां दत्वा—

प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥

इति पठेत् ॥

पुनः प्रदोषसमये प्रतिसरादिहोमक्रमः.

तत आचार्यः यजमानो ऋत्विजश्च सर्वे कृतस्नानाः धृतोर्ध्वपुण्ड्राः नवाम्बरधारिणः कृतसन्ध्यावन्दनाः प्रदोषान्ते प्रतिसरमारभेयुः । शुचौ देशेगोमयेन गोचर्ममात्रं चतुरश्रं स्थण्डिलं कृत्वा तदुपरि तण्डुलान्विकीर्य दर्भेण पश्चिमत आरभ्य प्राक्पर्यन्तं दक्षिणत अरभ्योत्तरपर्यन्तं तिस्रस्तिस्रो रेखा लिखित्वा अद्भिरभ्युक्ष्य स्थण्डिलस्य मध्ये प्रागग्रान् दर्भान्संस्तीर्य तेषूपरि कुम्भं निधाय तस्मिन् सुगन्धिजलं भूर्भुवस्सुवरिति पूरयित्वा वज्रवैडूर्यपुष्यरागमौक्तिकनीलमणीन् पञ्चरत्नानि निक्षिप्य तुलसीदळं पूगीफलञ्च निक्षिपेत् । कुम्भस्य मुखे एकविंशतिदर्भनिर्मितकूर्चंन्निधाय श्रीफलं निक्षिप्य नववाससा आच्छादयेत् । तस्मिन् कुम्भे

वरुणमावाह्य वरुणाय नम इति गन्धपुष्पधूपदीप नैवेद्यैः पूजयेत् । कुम्भस्योत्तरतो नवगुणितं गन्धानुलिप्तं कार्पाससूत्रं हरिद्राचूर्णभस्म-गोघृतानुलिप्तं कृत्वा निधाय श्रीभगवदाज्ञया भगवत्प्रीत्यर्थं भगवत्प्रति-ष्ठाङ्गप्रतिसरबन्धकर्म करिष्ये इति सङ्कल्प्य चतुर्दिक्षु चतुरो ब्राह्मणान् जपार्थं योजयेत् । अस्मिन् प्रतिसरबन्धकर्मणि पूर्वस्यां दिशि जप-कर्तारं त्वां वृणीमहे । अस्मिन् प्रतिसरबन्धकर्मणि दक्षिणस्यां दिशि जपकर्तारं त्वां वृणीमहे । अस्मिन् प्रतिसरबन्धकर्मणि पश्चिमस्यां दिशि जपकर्तारं त्वां वृणीमहे । अस्मिन् प्रतिसरबन्धकर्मणि उत्तरस्यां दिशि जपकर्तारं त्वां वृणीमहे ॥

अथ जपक्रमः.

गायत्री, सावित्री, दधिक्रावृण्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभिनो मुखाकरत् । प्रण आयूगँषि तारिषत् । आपो हिष्ठामयो भुवः । ता न ऊर्जे दधातन । महेरणाय चक्षसे । यो व-श्शिवतमो रसः । तस्य भाजयतेह नः । उशतीरिव मातरः । तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः । हिरण्य-वर्णाश्शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः । अग्निं या गर्भं दधिरे विरूपास्ता न आपश्शग्गँस्योना भवन्तु । यासागँ् राजा वरुणो याति मध्ये सत्यानृते अवपश्यन् जनानाम् ॥ मधुश्चुतश्शुचयो याः पावकास्तान आपश्शग्गँस्योना भवन्तु । शिवेन मा चक्षुषापश्यताप-श्शिवया तनुवोपस्पृशत त्वचम्मे । सर्वागँ् अग्नीगँ्रप्सुषदो हुवेवो मयि वर्चो बलमोजो निधत्त ॥ ओं विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि-विममे रजागँ्सि यो अस्कभायदुत्तरगँ् सधस्तं विचक्रमाणस्त्रेधो रुगायो विष्णोरराटमसि विष्णोः पृष्ठमसि विष्णोश्न्यस्नेस्थो विष्णोस्यूरसि

विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥ कृणुष्वपाजः प्रसितिं न पृथ्वीं याहि राजेवामवाग्ँ इभेन । तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्यरक्षसस्तपिष्ठैः ॥ तव भ्रमास आशु या पतन्त्यनुस्पृशद्दृषता शोशुचानः तपूग्ँष्यग्ने जुह्वा पतंगा न संदितो विसृज विष्वगुल्काः । प्रतिस्पशो विसृज तूर्णितमो भवापायुर्विशो अस्या अदब्धः । यो नो दूरे अघशग्ँसो यो अन्त्यग्ने माकिष्टे व्यथिरादधर्षीत् ॥ उदग्ने तिष्ठ प्रत्यातनुष्व न्यसित्राग्ँ ओषतात्तिग्महेते । यो नो अरातिग् समिधान चक्रे नीचा तंधध्यत सन्नशुष्कम् ॥ ऊर्द्धोभवप्रतिविध्याध्यस्ददावि-ष्कृणुष्व दैव्यान्यग्ने । अवस्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून् ॥ स ते जानाति सुमतिं यविष्ठय ईवते ब्रह्मणे गातुमैरत् ॥ विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो विदुरो अभिद्यौत् ॥ सेदग्ने अस्तु सुभगस्सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः ॥ पिप्रीषतिस्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः । अर्चामिते सुमतिं घोष्यर्वाक्संदेवा वाताजरतामियं गीः ॥ . . . . . .
(अत्र विंशवाक्यलोपः) मदे चिदस्य प्ररुजन्ति भामा न वरन्ते परिबाधो अदेवीः ॥ इत्यन्तम् । (ऋग्वेदे ८ अध्याय ६ वर्ग १६ ऋ. ३-४-५) (चतुरिशखण्डा युवतिस्सुपेशाः । घृतप्रतीका वयुनानिवस्ते) चतुष्कपर्दा युवतिस्सुपेशा घृतप्रतीका वयुनानिवस्ते । तस्यां सुपर्णा वृषणानिषेदतुर्यत्र देवा दधिरे भागधेयम् ॥ एकस्सुपर्णः स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे ॥ तं पाकेन मनसापश्यमन्ति तस्तं मातोरेहिहु स उ रेहि मातरम् । सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं प्रहुधा कल्पयन्ति ॥ छन्दांसि च दधतो अध्वरेषु ग्रहान्त्सोमस्य मिमते द्वादश ॥ यत इन्द्र भयामहे ततो नो अभयं कृधि । मघवन्

छग्धि तव तन्न ऊतये विद्विषो विमृधो जहि । स्वस्तिदा विशस्पति-र्वृत्रहा विमृधो वशी । वृषेन्द्रः पुर एतु नस्स्वास्तिदा अभयङ्करः । महाग् इन्द्रो वज्रबाहुष्षोडशी शर्म यच्छतु । स्वस्तिनो मघवा करोतु हन्तु पाप्मानं योस्मान्द्वेष्टि ॥

लक्ष्मीसूक्तम्.

हरिः ओम् । हिरण्यवर्णाग्ं हरिणीं सुवर्णरजतस्रजाम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह । तां म आवह जातवेदोलक्ष्मीमनप-गामिनीम् । यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् । अश्वपूर्वां रथमध्यां हस्तिनाद(द)प्र(बोधि)नीम् । श्रियंदेवमुपह्वये श्रीर्मादेवी जुष-ताम् । कांसोस्मितां हिरण्यप्राकारामार्द्रांज्वलन्तीं तृप्तां तर्पयन्तीम् । पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् । चन्द्रां प्रभासां यशसाज्वलन्तीं श्रियं लोके देवजुष्टामुदारां । तां पद्मनेमीं शरण(महं) प्रपद्येऽलक्ष्मीर्मे-नश्यतां त्वांवृणे । आदित्यवर्णे तपसोधिजातो वनस्पतिस्तववृक्षोथबिल्वः । तस्य फलानि तपसानुदन्तुमायान्तरायाश्च बाह्या अलक्ष्मीः । उपैतु मां देवसखः कीर्तिश्च मणिना सह । प्रादुर्भूतोस्मि राष्ट्रेस्मिन् कीर्तिमृद्धिं ददातु मे । क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् । अभूतिमस-मृद्धिं च सर्वान्निर्णुदमेगृहात् । गन्धद्वारां धुराधर्षां नित्यपुष्टां करीषिणीं । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं । मनसः काममाकूतं वाचस्सत्य-मशीमहि । पशूनां रूपमन्नस्य मयिश्री श्रयतां यशः । कर्दमेनप्रजा-भूता मयिसंभवकर्दम । श्रियंवासयमेकुले मातरंपद्ममालिनीम् । आप-स्सृजन्तुस्निग्धानिचिक्लीतवसमेगृहे । निचदेवीमातरंश्रियं वासयमेकुले । (आर्द्रां पुष्करिणीं पुष्टिं पिंगळां पद्ममालिनीम्) । चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह । आर्द्रां यः करणीं यष्टिं सुवर्णां हेममालिनीं ।

सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह। तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम्। यश्शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् । श्रियः पञ्चदशर्चञ्च श्रीकामस्सततं जपेत् । पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदळायताक्षि । विश्वप्रिये विष्णुमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व । श्रिये जातश्रिय आनिरियाय श्रियं वयो जनितृभ्यो दधति । श्रियं वसाना अमृतत्वमायन् भवन्ति ससत्यासमिधामित वितघून्। श्रिय एवैनं तच्छ्रियमादधाति । सन्ततमृचा वषट्कृतगँ् सन्धत्तगँ् सन्धीयते प्रजया पशुभिः य एवं वेद। ओं। महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि। तन्नो लक्ष्मीः प्रचोदयात् ॥

वरुणसूक्तम्.

उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमगँ् श्रथाय। अथा वयमादित्यव्रते तवानागसो अदितये स्याम। अस्तभ्नाद्या मृषभो अन्तरिक्ष ममिमीत वरिमाणं पृथिव्या आसीद द्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानि। यत्किञ्चेदं वरुणदैव्ये जनेभिद्रोहं मनुष्याश्चरामसि। अचित्तयत्तव धर्मायुयोपिम मानस्तस्मा देनसो देवरीरिषः। कितवासो यद्रिरिपुर्नदिवि यद्वाघासत्य मुतयन्नविष्म। सर्वाताविष्य शिथिरेव देवाथाते स्याम वरुणप्रियासः। अवते हेडो वरुण नमोभि रवयज्ञेभिरीमहे हविर्भिः। क्षय न्नस्मभ्य मसुरप्रचेतो राज न्नेनागँ्सि शिश्रथः कृतानि। तत्वायामि ब्रह्मणा वन्दमान स्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेहबोध्युरुशगँ् समान आयुः प्रमोषीः ॥

रुद्रसूक्तम्.

रुद्रसूक्तं जपित्वा—ओं परिणो रुद्रस्य हेति र्वृणक्तु । परित्वेषस्य दुर्मति रघायोः । अवस्थिरामघवद्भ्यस्तनुष्वमीढ्व स्तोकाय तनयाय मृडय । स्तुहि श्रुतं गर्त सदं युवानं मृगन्नभिमुपहत्नुमुग्रम् ॥ मृडा जरित्रे रुद्रस्तवानो अन्यन्ते अस्मन्निवपन्तु सेनाः ॥ मीढुष्टमशिवतम शिवो न स्सुमनाभव परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ॥ अर्हन्बिभर्षि सायकानि धन्व । अर्हन्निष्कं यजतं विश्वरूपं ॥ अर्हन्निदं दयसे विश्वमभ्भुवं । नवा ओजीयो रुद्र त्वदस्ति । त्वमग्ने रुद्रो असुरो महोदिवस्त्वगँ् शर्धो मारुतं पृक्ष ईशिषे ॥ त्वं वातैररुणैर्यासि शङ्गयस्त्वं पूषा विधतः पासि नुत्मना ॥ आवो राजानमध्वरस्य रुद्रगँ् होतारँ सत्य यजगँ् रोदस्योः ॥ अग्निं पुरा तनयित्नोरचित्ताद्धिरण्य रूपमवसे कृणुध्वम् ॥

ब्रह्मसूक्तम्.

ब्रह्मजिज्ञानमित्यारभ्य अतृपं यदाव इत्यन्तं ब्रह्मसूक्तं जपित्वा—ओं ब्रह्मजिज्ञानं प्रथमं पुरस्ताद्विनीमतस्सुरचो वेन आवः सबुध्निया उपमा अस्यविष्ठास्सतश्च योनिमसतश्चविवः । पिता विराजा मृषभो रयीणाम् ॥ अन्तरिक्षे विश्वरूप आविवेश । तमर्कैरभ्यर्चन्ति वत्सं ॥ ब्रह्मसन्तं ब्रह्मणा वर्धयन्तः । ब्रह्म देवानजनयत् । ब्रह्म विश्वमिदं जगत् । ब्रह्मणः क्षत्रं निर्मितं ॥ ब्रह्मब्राह्मण आत्मना ॥ अन्तरस्मिन्निमे लोकाः । अन्तर्विश्वमिदं जगत् ॥ ब्रह्मैव भूतानां ज्येष्ठं । तेन कोर्हति स्पर्धितुं ॥ ब्रह्मन् देवास्त्रयस्त्रिग्शत् ॥ ब्रह्मन्निन्द्रप्रजापती ॥ ब्रह्मान्ह विश्वा भूताति । नावी वान्तस्समाहि ता । चतस्र आशाः

प्रचरन्त्वग्नयः । इमन्नो यज्ञान्नयतु प्रजानन्न् । घृतं पिन्वन्नजरगँ् सुवीरम् । ब्रह्मसमिद्धवत्याहुतीनाम् ॥

विष्णुसूक्तं जापत्वा.

ओं । विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजागँसि यो अस्कभायदुत्तरगँ् सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णो-रराटमसि विष्णोः पृष्ठमसि विष्णो श्नप्त्रेस्थो विष्णोस्स्यूरसि विष्णोर्ध्रुव-मसि वैष्णवमसि विष्णवे त्वा । तदस्यप्रियमपिपाथो अश्यान्नरो यत्र देवयवो मदन्ति । उरुक्रमस्य स हि बन्धुरित्था । विष्णोः पदे परमे मध्व उत्सः । प्रतद्विष्णुस्तवते वीर्याय । मृगो नभीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा । परो मात्रया तनुवा वृधान । न ते महित्वमन्वश्नुवन्ति । भे ते विद्म रजसी-पृथिव्या । विष्णो देव त्वं परमस्य वित्से । विचक्रमे पृथिवीमेष एताम् । क्षेत्राय विष्णुर्मनुषे दशस्यन् । ध्रुवासो अस्य कीरयो जनासः । उरु-क्षितिगँ् सुजनिमाचकार । त्रिर्देवः पृथिवीमेषएताम् । विचक्रमे शतर्चसं महित्वा । प्रविष्णुरस्तु तवसस्तवीयान् । त्वेषगँ् ह्यस्य स्थविरस्य नाम । अतो देवा अवन्तुनो यतो विष्णुर्विचक्रमे । पृथिव्यास्सप्तधामभिः । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं । समूढमस्य पागँ्सुरे । त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः । ततो धर्माणि धारयन् । विष्णोः कर्माणि पश्यतयतो व्रतानि पस्पशे । इन्द्रस्य युज्य स्सखा । तद्विष्णोः परमं पदगँ् सदा पश्यन्ति सूरयः । दिवी व चक्षु राततं । तद्विप्रासो विपन्यवो जागृवाँस समिंधते । विष्णोर्यत्परमं पदं ॥

जातवेदसे सुनवाम इति दुर्गासूक्तं जापित्वा ।

जातवेदसे सुनुवाम सोममरातीयतो निजहाति वेदः । स नः

पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः । तामग्निवर्णांतपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टां । दुर्गां देवीगं् शरणमहं प्रपद्ये सुतरसि तरसे नमः । अग्ने त्वं पारया नव्यो अस्मा न्स्वस्ति भिरिति दुर्गाणि विश्वा । पूश्च पृथ्वी बहुलान उर्वी भवा तोकाय तनयाय शंयोः । विश्वानिनो दुर्गहा जातवेदस्सिन्धु न्ननावा दुरितातिपार्षि । अग्ने अत्रिप न्मनसा गृणानोऽस्माकं भू त्वविता तनूनाम् । पूतनाजितगँ सहमानमग्नि मुग्रꣳ हुमेव परमात्सधस्थात् । स नः पर्षदतिदुर्गाणि विश्वाक्षाम देवो अतिदुरितात्यग्निः । प्रत्नोषिकमिड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि । स्वाञ्चाग्ने तनुवं पिप्रयस्वास्वास्मभ्य ञ्च सौभगमायजस्व ।

महासूक्तं

ओं महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् । ओं भूमिर्भोम्ना द्यौर्वरिणा न्तरिक्षं महि त्वा । उपस्थे ते देव्य दितेऽग्नि मन्नादमन्नाद्या यादधे । आयं गौः पृश्निरक्रमी दसर न्मातरं पुनः । पितरञ्च प्रयन्त्सुवः । त्रिꣳश द्धाम विराचति वाक्पतंगाय शिश्रिये । प्रत्यस्य वह्द्युभिः । अस्य प्राणादपानत्यन्तश्चरति रोचना । व्यख्यन्महिष स्सुवः । यत्वा क्रुद्धः परो वप मन्युना यदवर्त्य । सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि । यत्ते मन्युपरोप्तस्य पृथिवीमनुदध्वसे । आदित्या विश्वे तद्देवा वसवश्च समाभरन् । मेदिनी देवी वसुन्धरास्याद्वसुधा देवी वासवी । ब्रह्मवर्चसः पितृणां श्रोत्रं चक्षुर्मनः देवीहिरण्यगर्भिणी श्वेवी प्रसूवरी सदने सत्यायने सीद । समुद्रवती सावित्री । हनो देवी मह्यंगी । महीधारिणी मही व्यधिष्ठा । शृंगेशृंग यज्ञेयज्ञे विभीषिणी । इन्द्रपत्नी व्यापिनी सुरसारि दिह वायुमती जलश-

यिनी स्वयं धाराजा सत्यंघो परिमेदिनीश्वो परिधत्तं गाय । विष्णुपत्नं महीं देवीं माधवीं माधवप्रियां । लक्ष्मी प्रियसखीं देवीं नमाम्युच्युतवल्लभाम् । धनुर्धराय विद्महे सर्वसिद्धयै च धीमहि । तन्नो धरा प्रचोदयात् ॥

आयुष्यं वर्चस्यगँ् सुवीर्यगँ् रायस्पोषमौद्भिद्यं इदगँ् हिरण्यं जैत्रयाया विशतां मां उच्चैर्वादिपृतनाजिसत्रासाहं धनञ्जयम् । सर्वास्समृद्धीर् ऋद्धयो हिरण्ये ऽस्मिन् थ्समाहिताः । शुनमहꣳ हिरण्यस्य पितुरिव नामाग्रभैषम् । तं मा हिरण्यवर्चसं पूरुषु प्रियं कुरु । प्रियं मा देवेषु कुरु प्रियं मा ब्रह्मणे कुरु । प्रियं विश्येषु शूद्रेषुप्रियगँ्राजसु माकुरु । या तिरश्ची निपद्यसे हं विधरणी इति । तां त्वा घृतस्य धारया यजेसगँ् राधनी महं । सगँ् राधन्यै देव्यै स्वाहा प्रसाधन्यै देव्यै स्वाहा । संराजं च विराजं चाभिशीर्या च नो गृहे । लक्ष्मी राष्ट्रस्य यामुखे तया मा सगँ् सृजामसि । एतान्मन्त्रान् जपित्वा ॥

घृतसूक्तम्.

तत आचार्यः । यो ब्रह्मा ब्रह्मण उज्जभार प्राणेश्वरः कृत्तिवासाः पिनाकी । ईशानो देवस्सन आयुर्दधातु तस्मै जुहोमि हविषा घृतेन । विभ्राजमानस्सरिरस्य मध्या द्रोचमानो घर्मरुचिर्यआगात् । समृत्युपाशादपनुत्य घोरानिहायुषे वर्धयामो घृतेन । ब्रह्मज्योतिर्ब्रह्मपत्नीषु गर्भं यमावधात्पुरुरूपं जयन्तम् । सुवर्णरं भग्रहमर्कमर्चं तमायुषे वर्धयामो घृतेन । श्रियं लक्ष्मी मौपलामम्बिकां गां षष्ठीं जयामिन्द्रसेनेत्युदाहुः । तां विद्यां ब्रह्मयोनिगँ् सरूपामिहायुषे तर्पयामो घृतेन । दाक्षायण्यस्सर्वयोन्यस्सुयोन्यः सहस्रशोविश्वरूपा विरूपाः । ससूनवस्सपतयस्सयूथ्या इहायुषेणो घृतामिदं जुषन्ताम् । दिव्या गणा बहुरूपाः पुराणा

आयुच्छिदो नः प्रमथन्तु वीरान्। तेभ्यो जुहोमि हविषा घृतेन मानः प्रजागँ रीरिषो मोतवीरान्। एकः पुरस्ताद्य इदं बभूव यतो बभूव भुवनस्य गोप्ता। यमप्येति भुवनगं सांपराये सनोहविर्धृतमिहायुषेत्तु देवः। वसून् रुद्रानादित्यान् मरुतोह (थ)साध्यान्। ऋभून् यक्षान् गन्धर्वांगंश्च भृगूंश्च विश्वान् घृतं हुत्वा स्वायुष्याम आयाम शश्वत्। विष्णोत्वन्नो अन्तमश्शर्मयच्छसहन्त्य। प्रते धारामधुश्च्युत उत्संधु हृते अक्षितम्॥ इति सूक्तं पठन् कूर्चेन कलशस्थजलं संगृह्य प्रतिसरं प्रोक्षयेत्॥

ओं अस्त्राय हेतिराजाय हुंफट्, इति मन्त्रेण संरक्ष्य सघृतेन हरिद्राचूर्णेन, त्रियंबकं यजामहे सुगंधिं पुष्टिवर्धनम्। उर्वारुकमिव-बन्धनान्मृत्योर्मुक्षयिमामृतात्॥ इति मन्त्रेण प्रतिसरं त्रिवारमभिमृश्य वासुकिं ध्यात्वा, ततो यजमानः आचार्यादिसर्वेषां ऋत्विजां तांबूल श्रीफलपूरितहस्तानां, "बृहत्सामक्षत्रभृद्वृद्धवृष्णियं त्रिष्टुभौजश्शुभित-मुग्रवीरं। इन्द्रस्तोमेन पञ्चदशेन मध्यमिदं वातेन सगरेण रक्ष॥ इति मन्त्रेण दक्षिणहस्ते रक्षाकङ्कणं बध्नीयात्॥

तत आचार्यः पूर्वोक्तरीत्या यजमानहस्ते कङ्कणं बध्नीयात्। तत आचार्यः भगवद्बिम्बपूजापात्राणि च गङ्गामृत्तिकाभिः कदळीभस्मगोमयतिंत्रिणीसहिताभिर्द्वात्रिंशद्वारं भगवन्नामस्मरणपूर्वकं शुद्ध जलेन शोधयेत्। अनन्तरं चतुर्दिक्षु चतुःकलशान् स्थापयेत्। तेषु भूर्भुवस्सुवरिति सुगन्धिजलं पूरयित्वा, तेषु वज्रवैडूर्यपुष्यरागमौक्तिक-नीलमण्याख्यपञ्चरत्नानि निक्षिप्य वटाश्वत्थौदुम्बराम्रप्लक्षपञ्चपल्लवान्निक्षि-प्य, कुशदूर्वाक्षततिलचन्दनगौरसर्षपाहिरण्यैकविंशतिदर्भानिर्मितकूर्चतुल-सीदलपूगींफलश्रीफलानि निक्षिप्य, नववाससाच्छादयेत्। ओं अस्त्राय

हेतिर्राजाय हुंफट् इति मन्त्रयुतां सौदर्शनीं मुद्रां तेषु दर्शयेत्। मूलमन्त्रेण प्रत्येकं शतसंख्ययाऽभिमन्त्र्य ॥

पुण्याहमन्त्रः.

आपोहिष्ठा मयो भुवस्ता न ऊर्जे दधातन। महेरणाय चक्षसे। यो वश्चितमो रसस्तस्य भाजयते हँ नः। उशतीरिव मातरः। तस्मा अरंगमामवो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः ॥ हिरण्यवर्णाश्शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः। अग्निं या गर्भं दधिरे विरूपास्ता न आपश्शग्गँ स्योना भवन्तु। यासाꣳ राजा वरुणो याति मध्ये सत्यानृते अवपश्यन् जनानाम्। मधुश्चुतश्शुचयो याः पावकास्ता न आपश्शग्गँ स्योनाँ भवन्तु। यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति। याः पृथिवीं पयसोन्दन्ति शुक्रास्ता न आपश्शग्गँ स्योना भवन्तु शिवेन मा चक्षुषा पश्यतापशिवया तनुवोपस्पृशत त्वचं मे। सर्वाꣳ अग्नीꣳ रप्सुषदो हुवेवो मयि वर्चो बलमोजो निधत्त ॥ पवमानस्सुवर्जनः। पवित्रेण विचर्षणिः। यः पोता स पुनातु मा। पुनन्तु मा देवजनाः। पुनन्तु मनवो धिया। पुनन्तु विश्व आयवः। जातवेदः पवित्रवत्। पवित्रेण पुनाहि मा। शुक्रेण देव दीद्यत्। अग्ने क्रत्वा क्रतूꣳ रनु ॥ १ ॥ यत्ते पवित्रमर्चिषि। अग्ने विततमन्तरा। ब्रह्म तेन पुनीमहे। उभाभ्यां देव सवितः। पवित्रेण सवेन च। इदं ब्रह्म पुनीमहे ॥ २ ॥ वैश्वदेवी पुनती देव्या गात्। यस्यै बह्वीस्तनुवो वीतपृष्ठाः। तयामदन्त सधमाद्येषु। वयꣳ स्याम पतयो रयीणाम् ॥ वैश्वानरो रश्मिभिर्मा पुनातु। वातः प्राणेनेषि रोमयो भूः। द्यावापृथिवी पयसा पयोभिः। ऋतावरी यज्ञिये मा पुनीताम्। बृहद्भिस्सवितस्तृभिः। वर्षिष्ठैर्देवमन्मभिः। अग्ने दक्षैः पुनाहि मा। येन

देवा अपुनत । येनापो दिव्यं कशः । तेन दिव्येन ब्रह्मणा ॥ ३ ॥ इदं ब्रह्म पुनीमहे । यः पावमानीरध्येति । ऋषिभिस्सम्भृतꣳ रसम् । स्सर्वꣳ सपूतमश्नाति । स्वदितं मातरिश्वना । पावमानीर्यो अध्येति । ऋषिभिस्संभृतꣳ रसं । तस्मै सरस्वती दुहे । क्षीरꣳ सर्पिर्मधूपकम् । पावमानी स्वस्त्ययनीः ॥ ४ ॥ सुदुघा हि पयस्वतीः । ऋषिभिस्संभृतो रसः । ब्राह्मणेष्वमृतꣳ हितम् । पावमानीर्दिशन्तु नः । इमं लोकमथो अमुम् । कामान्समर्धयन्तु नः । देवीर्देवैस्समाभृताः । पावमानीस्स्वस्त्ययनीः । सुदुघा हि घृतश्च्युतः । ऋषिभिस्संभृतो रसः ॥ ५ ॥ ब्राह्मणेष्वमृतꣳ हितम् । येन देवाः पवित्रेण । आत्मानं पुनते सदा । तेन सहस्रधारेण । पावमान्यः पुनन्तु मा । प्राजापत्यं पवित्रम् । शतो द्यामꣳ हिरण्मयम् । तेन ब्रह्मविदो वयम् । पूतं ब्रह्म पुनीमहे । इन्द्रस्सुनीती सह मा पुनातु । सोम स्वस्त्या वरुणस्समीच्या । यमो राजा प्रमृणाभिः पुनातु मा । जातवेदा मोर्जयन्त्या पुनातु ॥

विष्णुसूक्तम्.

विष्णोर्नुकमित्यारभ्य . . . . . यत्परमं पदम् इत्यन्तम् । एभिर्मन्त्रैः कलशानभिमन्त्रयेत् ॥

पञ्चगव्यक्रमः.

श्रियासहितं बिंबं पीठे निवेश्य नूतनवस्त्रेण सुदर्भेण संवेष्ट्य तण्डुलैश्चतुरश्रं स्थण्डिलं कल्पयित्वा, कुशमूलेन प्राचीरुदीचीस्तिस्रस्तिस्रो रेखा लिखित्वा पूर्वे पलमेकं गोमूत्रं दक्षिणे अङ्गुष्ठार्धं गोमयं, पश्चिमे सप्तपलं क्षीरं, उत्तरे त्रिपलं दधि । तन्मध्ये त्रिपलमाज्यम्, ईशान्ये पलमेकं कुशोदकम्, विन्यसेत् ॥

अत्र प्रमाणवचनम्.

गोमूत्रं विन्यसेत्पूर्वं गोमयं दक्षिणे न्यसेत् ।
क्षीरन्तु पश्चिमे न्यस्य उत्तरे दधि विन्यसेत् ॥
तन्मध्ये विन्यसेत्सर्पिरीशान्ये तु कुशोदकम् ॥ इति ॥

एवं क्रमेण गव्यानि स्थापयित्वा पुण्याहजलेन तानि द्रव्याणि प्रोक्ष्य, गोमूत्रे ओं विष्णवे नमः । गोमये ओं ब्रह्मणे नमः । क्षीरे ओं अच्युताय नमः । दध्नि ओं शुक्राय नमः । घृते ओं कृष्णाय नमः । कुशोदके, ओं सवित्रे नमः । प्रणवादिनमोन्तैस्तत्तन्नामभिरावाहनार्घ्यपाद्याचमनस्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणाभिरभ्यर्च्य, ओं नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् । इति गोमूत्रं । ओं गन्धद्वारां दुरादर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीगं् सर्वभूतानां त्वामिहोपह्वये श्रियम् । इति गोमयम् । आप्यायस्व समेतु ते विश्वतस्सोम वृष्णियम् । भवा वाजस्य सन्धवे इति क्षीरम् । दधिक्रावण्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभिनो मुखाकरत् । प्रणआयूगं्षि तारिषत् । इति दधि । शुक्रमसि ज्योतिरसि तेजोसि देवोवस्सवितो त्पुनात्वच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभिः इति घृतम् । देवस्य त्वा सवितुः प्रसवे श्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ॥ इति कुशोदकम् ॥

शुभे नूतने मृत्पात्रे संगृह्य प्रणवेनाभिमन्त्र्य मूलमन्त्रेण भगवन्तं स्नापयेत् ॥

अथ पञ्चामृताभिषेकक्रमः.

आप्यायस्वेति मन्त्रेण पयसा स्नापयेत्ततः ।
दधिक्रावण्णेति मन्त्रेण दध्ना चैव ततः परम् ॥

शुक्रमसीत्येव मन्त्रेण सर्पिषा स्नापयेत्सुधीः ।
मधुवातेति मधुना ताश्शर्करेति च शर्करैः ॥
पञ्चामृताभिषेकन्तु कुर्यादेवं विधानतः ।

आप्यायस्व समेतुते विश्वत स्सोमवृष्णियम् । भवा वाजस्य सन्धवे । इति मन्त्रेण पयसा स्नापयेत् । दधिक्राव्ण्णेत्यादि—तारिषदित्यन्तेन मन्त्रेण दध्ना स्नापयेत् । शुक्रमसि—रश्मिभिरित्यन्तेन मन्त्रेण सर्पिषा स्नापयेत् । मधुवाताऋतायते मधुक्षरन्ति सिन्धवः । माध्वीर्नस्सन्त्वौषधीः । मधुनक्तमुतोषसि मधुमत्पार्थिवग्ं रजः । मधु द्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमाग्ं अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः । इति मन्त्रेण मधुना स्नापयेत् । ताश्शर्करा अभवन् । तच्छर्कराणाग्ं शर्करत्वम् । व्रजोवै शर्कराः । पशुरग्निः । यच्छर्कराभिरग्निं परिमिणोति । वज्रेणै वा स्मै पशून्परिगृह्णाति । इति मन्त्रेण शर्कराभिस्स्नापयेत् । अनन्तरम्, चतुःकलशजलेन 'विष्णोर्नुकम्

. . . . विष्णवेत्वा । इति मन्त्रेण स्नापयेत् । अनन्तरं नववस्त्रेण भगवन्तं संवेष्टयित्वा पुण्याहजलैर्मूलमन्त्रेण भगवन्तं प्रोक्ष्य गोघृतपूरितान्दीपां श्चतुर्दिषु स्थाप्य ॥

अर्घ्यादिपात्रपरिष्कारक्रमः.

अग्निकोणे अर्घ्यपात्रम्, नैऋत्यां पाद्यम्, वायव्यामाचमनीयम्, ऐशान्यां स्नानीयपात्रम्, मध्ये शुद्धोदकपात्रम् संस्थाप्य, अर्घ्यपात्रसमीपे कुम्भं स्थाप्य, ओं भूर्भुवस्सुवरिति तस्मिन्सुगन्धिजलं पूरयित्वा । ओं यं देहं शोषयामि । ओं रं दाहयामि । ओं वं प्लावयामि । इति शोषणदाहनप्लावनानि कृत्वा । दशकृत्वः मूलमन्त्रेणाभिमन्त्र्य, गन्धपुष्पतुलसीदळानि निक्षिप्य । सुराभिमुद्रां प्रदर्श्य, तेन

जलेनार्घ्यादिपात्राणि पूरयित्वा शोषणदाहनप्लावनानि मूलेन कृत्वा मूलेनाभिमन्त्र्य, सिद्धार्थाक्षतकुशाग्रातिलयवगन्धफलपुष्पाणि अर्घ्यपात्रे निक्षिपेत्। दूर्वा विष्णुपर्णी श्यामाकपद्मानि पाद्यपात्रे निक्षिपेत्। एलालवंगजातीतक्कोलानि आचमनपात्रे निक्षिपेत्। कोष्ठमञ्जिष्ठद्विहरिद्रा-मुराशैलेयचंपकवचाकचोरमुस्तानि स्नानपात्रे निक्षिपेत्। ततः पञ्चपात्रेषु गन्धपुष्पतुळसदिळानि निक्षिपेत्। सुराभिमुद्रां प्रदर्श्य। अस्त्राय हेतिराजाय हुंफट्। इति मन्त्रेण पञ्चपात्ररक्षां कृत्वा। उद्धरिण्याऽ-र्घ्यजलमादाय श्रीमते नारायणायनमः। अर्घ्यं समर्पयामीत्यर्घ्यं दत्वा पाद्याचमनीयादिकं च दत्वा तत्तच्छेषं तत्तद्धृहे निक्षिपेत्। आं श्रियै नमः इति मन्त्रेण देव्या अर्घ्यादि दत्वा, मधुपर्कं निवेद्य ॥

मधुपर्कलक्षणम्

घृतस्येकपलं ग्राह्यं दधि त्रिपलमुच्यते।
मधुनः पलमेकं च मधुपर्कस्स उच्यते ॥

मधुपिण्याकेन नेत्रे पिधाय मण्डपस्याग्नेयभागे इष्टकाभिः कूर्म-पृष्ठसमोन्नतं गोमयेनोपलिप्तं हस्तमात्रं चतुरश्रं कुर्यात् ॥

औपासनादिहोमक्रमः

तत्र तण्डुलान्प्रकीर्य पश्चिमत आरभ्य प्राक्पर्यन्तं दक्षिणत आरभ्य उत्तरपर्यन्तं तिस्रास्तिस्रो रेखा लिखित्वा तत्र दर्भं न्यस्य अद्भिरभ्युक्ष्य तृणं स्थण्डिले निक्षिप्य। भूर्भुवस्सुवरोमित्यग्निंप्रतिष्ठाप्य याज्ञिकैरिन्धनैः प्रज्वाल्य। चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य। त्रिधा बद्धो वृषभोरोरवीति महो देवो मर्त्याँ आविवेश ॥ इति मन्त्रेण जलाक्षतानग्नेः पश्चिमतः प्रतिष्ठाप्य, एष हि देवः प्रदिशोनुसर्वाः पूर्वो हि जात स्स उ गर्भे अन्तः। स विजाय-

मानस्सजानिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतो मुखः । प्राङ्मुखो-देव अग्ने ममाभिमुखोभव । इत्यग्निं प्रार्थ्य अग्निमलंकृत्य ओं अग्नये नमः । जातवेदसे नमः । सहोजसे नमः । अजिराप्रभवे नमः । वैश्वानराय नमः । नर्यापसे नमः । पङ्क्तिराधसे नमः । विसर्पिणे नमः । श्रीयज्ञपुरुषाय नमः । इति मन्त्रैः प्रागाद्यष्टदिक्षु अक्षतान्निक्षिप्य आत्मनेनम इति स्वमूर्ध्निसर्वेभ्यश्श्रीवैष्णवेभ्यो नम इति वैष्णवोपरि चाक्षतान्निक्षिपेत् । अदितेऽनुमन्यस्वेति दक्षिणतः प्राचीनम् । अनुमतेऽनुमन्यस्वेति दक्षिणत उदीचीनम् । सरस्वतेऽनुमन्यस्वेत्युत्तरतः प्राचीनम् । देवसवितुः प्रसुवेति समन्ततोऽग्निं परिषिच्य परिषेचनक्रमेण प्रागुदगग्रैर्दर्भैराग्निं परिस्तीर्य अग्नेरुत्तरतः प्रागग्रान् दर्भान्सगृस्तीर्य दर्व्याज्यस्थाल्यौ प्रोक्षणीपूर्णपात्रे इध्मस्रुवौ च दर्भपङ्क्तिद्वये अधोमुखान् निक्षिप्य, समौ द्वौ दर्भौ प्रादेशमात्रौ पवित्रीकृत्य अद्भिरनुमृज्य प्रोक्षणीपात्रे निधाय, पवित्रान्तर्हिते प्रोक्षणीपात्रे अक्षतसहिता अप आनीय, अग्नेः प्रदक्षिणतो निनीय मुखसमुद्धृत्य स्वस्य पुरतस्स्थाप्य हस्तयोरङ्गुष्ठकनिष्ठिकाभ्यामुदगग्रे पवित्रे गृहीत्वा प्राक्त्रिरुत्पूय पात्राण्युत्तानानि कृत्वा इध्मञ्च विस्रस्य सपवित्रेण हस्तेन त्रिः प्रोक्ष्य प्रोक्षणपात्रस्थपवित्रे पूर्णपात्रे-निधाय हस्तयोरङ्गुष्ठकनिष्ठिकाभ्यामुदगग्रे पवित्रे गृहीत्वा प्राक्त्रिरुत्पूय अग्नेः प्रदक्षिणतो निनीय, मुखसमुद्धृत्य, अग्नेरुत्तरतो दर्भानास्तीर्य तेषु निक्षिप्य दर्भैराच्छादयेत् । दक्षिणत स्त्रिभिर्दर्भैर्ब्रह्मासनमास्तीर्य, ओं ब्रह्मणेनम इति मन्त्रेण ब्रह्माणमावाह्य ओं ब्रह्मणेनम इति मन्त्रेणा-सनार्घ्यपाद्याचमनस्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणाभि-र्ब्रह्माणमभ्यर्च्य, पूर्णपात्रस्थपवित्रे आज्यपात्रे निधाय, अग्नेः पश्चिमतः पवित्रान्तर्हितायामाज्यस्थाल्यामाज्यं निरूप्य । उदीच्यामङ्गारेषु निधाय

प्रज्वलितैर्दर्भाग्रैस्संदीप्य द्वे दर्भाग्रे प्रच्छिद्य प्रक्षाळ्य आज्यपात्रे प्रत्यस्य ज्वलता दर्भेण त्रीरग्निं प्रदक्षिणीकृत्य तं दर्भमीशान्यां निक्षिप्य आज्यमानीय स्वस्य पुरतस्स्थाप्य हस्तयोरङ्गुष्ठकनिष्ठिकाभ्यामुदगग्रे गृहीत्वा आज्यं पश्चात्त्रिरुत्पूय पवित्रग्रन्थि विस्रस्य पवित्रमद्भिरभ्युक्ष्य प्रागग्रे पवित्रे अग्नौ प्रहरति । स्रुवमग्नौ प्रतितप्य दर्भाग्रैस्स्रुवाग्रं दर्भमूलैस्स्रुवमूलं दर्भमध्येस्रुवमध्यं, एवं त्रिः पुनः प्रतितप्य प्रोक्ष्योत्योत्तरतो निधाय दर्भानद्भिसगँस्पृश्याऽग्नौ प्रहरति । परिस्तरणोपर्यन्योन्यसंस्पृष्टान्परिधीन्परिदधाति । स्थविष्ठमुत्तराग्रं परिधिमग्नेः पश्चिमतो निक्षिप्याग्नेर्दक्षिणत अणीयांसं परिधिं पूर्वाग्रं निधाय, उत्तराग्रमग्नेः पश्चिमतो निहितं मध्यमं परिधिमुपस्पृश्याग्नेः पुरस्ताद्दक्षिणोत्तरक्रमेण प्राग्द्वये इतरे द्वे आधारसमिधावादधाति । सव्येन पात्रं स्पृशन् दक्षिणेन हस्तेन परिध्यन्तः परिस्तरणोपरि अदितेऽन्वमगंस्था इति दक्षिणतः प्राचीनम् । अनुमतेऽन्वमगंस्था इति दक्षिणत उदीचीनम् । सरस्वतेऽन्वमगंस्था इत्युरतः प्राचीनम् । देवसवितःप्रसुवेति समन्ततः प्रागारभ्य प्रदक्षिणं परिषिच्य । इध्ममाज्येनाभ्यज्य, अस्मिन् भगवत्प्रतिष्ठाहोमकर्मणि ब्रह्मन् इध्म माधास्य इति ब्रह्माणं प्रति ब्रूयात् । ओं आधत्स्वेति प्रतिवचनम् । प्रजापतिं मनसा ध्यायन् तूष्णीं घृताक्ताः पञ्चदश समिधो वह्नौ प्रक्षिपेत् । दर्व्या आज्यमादाय, अग्नयेस्वाहा अग्नय इदं न मम । इत्यग्नेर्दक्षिणभागे जुहुयात् । सोमायस्वाहा सोमायेदं नममेत्यग्नेरुत्तरभागे जुहुयात् । ओम् इन्द्रायस्वाहा इन्द्रायेदं न मम । ओम् प्रजापतये स्वाहा प्रजापतय इदं न मम । इत्यग्निमध्ये जुहुयात् ॥

अग्निध्यानम्

द्विशीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकम् ।
वरदं शक्तिपाणिञ्च बिभ्राणं स्रुक्स्रुवौ तथा ॥

इत्याग्निं ध्यात्वा : श्रीभगवदाज्ञया भगवत्प्रीत्यर्थं गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणकर्णवेधनोपनिष्क्रमणडोलारोहणान्नप्राशनचौलोपनयनवेदव्रतस्नानविवाहसंस्कारसिद्ध्यर्थं तिलैराज्यैश्च वासुदेवद्वादशाक्षरेण होमं करिष्ये । ओम् नमो भगवते वासुदेवाय स्वाहा । वासुदेवायेदं न मम । इत्यष्टोत्तरशताहुतीर्जुहुयात् ॥

श्रीभगवतश्शान्तिहोमः

श्रीभगवदाज्ञया भगवत्प्रीत्यर्थं बिम्बस्य मानोन्मानादिन्यूनातिरिक्तप्रायश्चित्तार्थं शान्तिहोमं करिष्ये । शमीपल्लवाक्षतानि सप्तव्याहृतिभिः प्रत्येकं शतं जुहुयात् । ओं भूस्वाहा । भूरिदं न मम । ओं भुवः स्वाहा । भुव इदं न मम । ओं सुवस्वाहा । सुव इदं न मम । ओं महः स्वाहा । महस इदं न मम । ओं जनः स्वाहा । जनायेदं न मम । ओं तपः स्वाहा । तपस इदं न मम । ओगँ् सत्यं स्वाहा । सत्यायेदं न मम । एवं सप्ताहुतीरेकीकृत्य एवं भूताश्शताहुतीर्जुहुयात् । ततः पुरुषसूक्तेन ससर्पिषा पायसान्नेन षोडशाहुतीर्जुहुयात् ॥

पुरुषसूक्तेन षोडशाहुति क्रमः

ओं सहस्रशीर्षापुरुषः । सहस्राक्षस्सहस्रपात् । स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् । पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम ॥ १ ॥ पुरुषएवेदगँ् . . . . यदन्नेनातिरोहति पुरुषाय . . . . न मम ॥ २ ॥ एतावानस्य महिमा . . . . त्रिपादस्यामृतं दिवि । पुरुषाय न मम ॥ ३ ॥ त्रिपादूर्ध्व उदैत्पुरुषः . . . . साशनानशने अभि । पुरुषाय न मम ॥ ४ ॥ तस्माद्विराळजायत . . . . पश्चाद्भूमिमथो पुरः । पुरुषाय—न मम ॥ ५ ॥ यत्पुरुषेण हविषा . . . . ग्रीष्म

इध्मश्शरद्धविः । पुरुषाय–न मम ॥ ६ ॥ सप्तास्यासन् परिधयः . . . . अबध्नन् पुरुषं पशुम् । पुरुषाय–न मम ॥ ७ ॥ तं यज्ञं बर्हिषिप्रौक्षन् . . . . साध्या ऋषयश्चये । पुरुषाय–न मम ॥ ८ ॥ तस्माद्यज्ञात्सर्वहुतः . . . . आरण्यान् ग्राम्या श्चये । पुरुषाय–न मम ॥ ९ ॥ तस्माद्यज्ञात्सर्व हुतः . . . . यजुस्तस्मादजायत । पुरुषाय–न मम ॥ १० ॥ तस्मादश्वा अजायन्त . . . . तस्माज्जाता अजावयः । पुरुषाय न मम ॥ ११ ॥ यत्पुरुषं व्यदधुः . . . . कावूरूपादा वुच्येते । पुरुषाय न मम ॥ १२ ॥ ब्राह्मणोऽस्य मुखमासीत् . . . . पद्भ्यागूँशूद्रे अजायत । पुरुषाय-न मम ॥ १३ ॥ चन्द्रमा मनसो जातः . . . . प्राणाद्वायुरजायत । पुरुषाय–न मम ॥ १४ ॥ नाभ्या आसीदन्तरिक्षं . . . . तथा लोकागूँ अकल्पयन् । पुरुषाय–न मम ॥ १५ ॥ वेदाहमेतं पुरुषं महान्तम् . . . . नान्यः पन्था. अयनाय विद्यते । पुरुषाय–न मम ॥ १६ ॥

ततः पञ्चोपनिषन्मन्त्रैरष्टोत्तरशतं हुत्वा—

ओं षौं नमः पराय परमेष्ठ्यात्मने नमः स्वाहा । परमेष्ठ्यात्मन इदं न मम । ओं यां नमः पराय पुरुषात्मने स्वाहा । पुरुषात्मन इदं न मम । ओं रां नमः पराय विश्वात्मने स्वाहा । विश्वात्मन इदं न मम । ओं वां नमः पराय निवृत्यात्मने स्वाहा । निवृत्यात्मन इदं न मम । ओं लां नमः पराय सर्वात्मने स्वाहा । सर्वात्मन इदं न मम। ओं नारायणाय विद्महे वासुदेवाय धीमहि । तन्नोविष्णुः प्रचोदयात् । सप्तपते अमे समिधस्सप्तजिह्वास्सप्तर्षयस्सप्तधाम प्रियाणि । सप्तहोत्रा-

सप्तधा त्वा यजन्ति । सप्तयोनीरापृणस्वा घृतेन स्वाहा । अग्नये सप्त-वत इदं न मम । इत्यनेन पूर्णाहुतिं जुहुयात् ॥ तत आचार्यः—

नमस्तुभ्यं भगवते जातवेदस्वरूपिणे
नरायणाय हव्यस्य भोक्त्रे यज्ञस्वरूपिणे ॥
इष्टदैवाय देवानामात्मने परमात्मने ।
सन्निधत्स्व चिरं देव प्रतिमायां हिताय नः ॥

इति भगवन्तं विज्ञापयेत् । ततस्सदर्भेण नववस्त्रेण प्रतिमां मूलमन्त्रे-णाच्छाद्य, उत्तरीयमपि दत्त्वा, ओं नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात्" इति विष्णुगायत्र्या अर्घ्यपाद्या-चमनगन्धपुष्पधूपदीपनैवेद्याक्षतान्विष्णवे दत्वा । ओं श्रियैनमः । इति श्रीमन्त्रेणार्घ्यपाद्याचमनगन्धपुष्पधूपदीपनैवेद्याक्षतान्महालक्ष्म्यै दत्त्वा । मूलेन सप्तकृत्वोभिमन्त्रितं सूत्रं मूलेन भगवतो दक्षिणहस्ते महालक्ष्म्या वामहस्ते बध्वा, श्लो. जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन । नमस्तेस्तु हृषीकेश महापुरुष पूर्वज ॥ इति महापुरुषविद्यया सर्षपदूर्वा हरिद्राद्रव्येण भगवन्तं संस्पृशेत् । अनन्तरं वृत्ताकारं शालिभारं कृत्वा तदर्धं तण्डु-लान् तदुपरि विन्यस्य तदुपरितदर्धं तिलान्निक्षिप्य तस्मिन् पद्मं विलिख्य प्रागग्रान् कुशानास्तीर्य नूतनपटेनाच्छाद्य, तदुपरि सिंहा-सनं विधाय, पुण्याहजलैः प्रोक्षयेत् । मूलमन्त्रोच्चारणपूर्वकं सुप्रतिष्ठो-भवेति मन्त्रेण तस्मिन् पीठे देवमारोपयेत् । स्वागतम् । तत आचार्यः—

स्वागतं देवदेवेश विश्वरूप नमास्तुते ।
शुद्धेऽपि त्वदधिष्ठाने शुद्धिं कुर्मस्सहस्वताम् ॥

इति भगवन्तं ध्यात्वा । श्रीमते नारायणाय नम इति मन्त्रेण भगवते । ओं श्रियै नम इति मन्त्रेण महालक्ष्मै एकवारमर्घ्यं

द्विवारं पाद्यं त्रिवारं आचमनीयं दत्वा। मधुपर्कं निवेद्य, नीराजनं कुर्यात्। बिम्बस्य पुरतः भारपरिमितं तण्डुलं चतुरश्रं कृत्वा, तदुपरि चतुर्दिक्षु चतुः कलशान् स्थापयेत्। तेषु भूर्भुवस्सुवरिति सुगन्धिजलं पूरयित्वा, तेषु वज्रवैडूर्यपुष्यरागमौक्तिकनीलमणीन् पञ्चरत्नानि निक्षिप्य, वटाश्वत्थोदुम्बराम्रप्लक्षपञ्चपल्लवानि निक्षिप्य, कुशदूर्वाक्षततिलचन्दन-गौरसर्षपहिरण्यएकविंशतिदर्भनिर्मितकूर्चतुलसीदलपूगीफलश्रीफलानि निक्षिप्य नववाससाच्छादयेत्। ओं अस्त्राय हेतिराजाय हुंफडिते मन्त्रसंयुतां सौदर्शिनीं मुद्रां तेषु दर्शयेत्। मूलमन्त्रेण प्रत्येकं शत सङ्ख्यया भिमन्त्रय—

स्वागतं दैवदेवेश विश्वरूप नमोस्तुते।
शुद्धेऽपि त्वदधिष्ठाने शुद्धिं कुर्मस्सहस्वताम्॥

इति भगवन्तं प्रार्थ्य, श्रीमते नारायणाय नम इति मन्त्रेण भगवते, ओं श्रियै नम इति मन्त्रेण महालक्ष्मै च, एकैकवारमर्घ्यं त्रिस्तिवार-माचमनीयं दत्वा। चतुःकलशजलेन, विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाग्ंसि यो अस्कभाय दुत्तरग्ं सदस्थं विचक्र-माणस्त्रेधोरुगायो विष्णो रराटमसि, विष्णोः पृष्ठमसि विष्णोश्नसूस्थो विष्णास्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा। इति मन्त्रेण स्नापयेत्। ततो देवस्य पुरतो गजा नश्वान् नरवाहनान् रथान् संस्थाप्य गजाद्यभावे रथाश्वानेव, तेषूपरि भगवन्तमारोप्य वीथीं सञ्चार्य उत्सवानन्तरमाचार्याय तद्वाहनं दद्यात्। नववस्त्रेण प्रतिमां संवेष्टय यानमारोप्य वीथीं सञ्चारयित्वा॥

नारायणसूक्तम्

ओं सहस्रशीर्षं देवं विश्वाक्षं विश्वशं भुवम्। विश्वं नारायणं देवमक्षरं परमं प्रभुम्॥ १॥ विश्वतः परमं नित्यं विश्वं नारायणग्ं

हरिम् । विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति ॥ २ ॥ पतिं विश्वस्यात्मेश्वरं शाश्वतगं् शिवमच्युतम् । नारायणं महाज्ञेयं विश्वात्मानं परायणम् ॥३॥ नारायणपरं ब्रह्म तत्त्वं नारायणः परः । नरायणपरो ज्योतिरात्मा नारायणः परः ॥ ४ ॥ यच्च किञ्चिज्जगत्यस्मिन्दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणस्थितः ॥ ५ ॥ अनन्तमव्ययं कविगं् समुद्रेन्तं विश्वशम्भुवम् । पद्मकोशप्रतीकाशगं् हृदयञ्चाप्यधोमुखम् । अधो निष्ट्या वितस्त्यान्तुनाभ्यामुपरि तिष्ठति । हृदयं तद्विजानीयाद्विश्वस्यायतनं महत् ॥ ७ ॥ सन्ततगं् सिराभिस्तुलं बत्य कोशसन्निभम् । तस्यान्ते सुषिरगं् सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितम् ॥ ८ ॥ तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतो मुखः । सोग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः ॥ ९ ॥ सन्तापयति स्वं देहमापादतलमस्तकम् । तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः । नीवारशूकवत्तन्वी पीता भा स्यात्तनूपमा । तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः ॥ ११ ॥ स ब्रह्मा स शिवस्सेन्द्रस्सोऽक्षरः परमस्स्वराट् । ऋतगं् सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः । ओं नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥ इति नारायणसूक्तं पठन्त आचार्यादयः जलाधिवासस्थानमागच्छेयुः ॥

जलाधिवासस्थाने विधिक्रमः

तत्र जलाधिवासार्थं कल्पितं चतुरश्रं कुण्डं पात्रं वा वस्त्रपुष्पमाल्यादिभिरलंकृत्य चतुर्दिक्षु कदळीस्तम्भानादीप्य शुद्धैर्गन्धोदकैः पूरयित्वा सर्वौषधीर्निक्षिप्य अष्टाविंशतिदर्भनिर्मितकूर्चं तस्मिन् जले निक्षिप्य तस्मिन् कूर्चे 'हरये नम' इति मन्त्रेण गन्धपुष्पधूपदीपनैवेद्यैर्हरिं सम्पूज्य ओं षौन्नमः पराय परमेष्ठ्यात्मने नमः । ओं

यान्नमः पराय पुरुषात्मने नमः । ओं रान्नमः पराय विश्वात्मने नमः । ओं वान्नमः पराय निवृत्यात्मने नमः । ओं लान्नमः पराय सर्वात्मने नमः । इति पञ्चोपनिषन्मन्त्रान् भगवतो महालक्ष्म्याश्च शिरोनासाग्र-हृदयगुह्यपादेषु क्रमेण विन्यसेत् । ततस्सुदर्शनाय हेतिराजाय हुंफट्" इति मन्त्रेण जलाधिवासपात्रे चक्रमुद्रां प्रदर्श्य । अनन्तरं पूगीफल-पुष्पतुलसीसहितान् सुगन्धिजलपूरितान् एकविंशतिदर्भनिर्मितकूर्च-सहितान् श्रीफलाम्रपल्लवपिहितमुखान् नववस्त्राच्छादितान् चतुरः कुम्भान् धान्योपरि स्थापयेत् । तेषु ब्रह्मणे नम इति मन्त्रेण गन्धपुष्प-धूपदीपनैवेद्यैर्ब्रह्माणं पूजयेत् । ततः कुम्भसमीपे पूगीफलपुष्पतुलसी-सहितं सुगन्धिजलपूरितं एकविंशतिदर्भनिर्मितकूर्चसहितं श्रीफलाम्र-पल्लवपिहितमुखं नववस्त्राच्छादितं करकं स्थापयित्वा तस्मिन् सुदर्शनाय नम इति मन्त्रेण गन्धपुष्पधूपदीपनैवैद्यैस्सुदर्शनं पूजयेत् । ततोऽष्टदिक्षु स्थापितेषु पूगीफलपुष्पतुलसीसहितेषु सुगन्धिजलपूरितेषु एकविंशति-दर्भनिर्मितकूर्चसहितेषु श्रीफलाम्रपल्लवविहितमुखेषु नववस्त्राच्छादितेषु अष्टकलशेषु । इन्द्राय नमः । अग्नये नमः । यमाय नमः । निर्ऋतये नमः । वरुणाय नमः । वायवे नमः । सोमाय नमः । ईशानाय नमः । एभिर्मन्त्रैरिन्द्राग्नियमनैर्ऋतवरुणवायुसोमेशान् गन्धपुष्पधूपदीपनैवेद्यैः पूजयेत् । अनन्तरं जलाधिवासपात्रे सुगन्धिजलपूरिते गन्धपुष्पतुलसी-दलानि निक्षिप्य । ओं यं शोषयामि । ओं रं दाहयामि । ओं वं प्लावयामि । इति शोषणदाहनप्लावनानि कृत्वा सुरभिमुद्रां प्रदर्श्य शतकृत्वः मूलमन्त्रेणाभिमन्त्र्य मूलमन्त्रोच्चारणपूर्वकं सुप्रतिष्ठो भवेति मन्त्रेण भगवन्तं देव्या सहितं उदङ्मुखं प्राक्शिरसं जलद्रोण्यां स्थाप-येत् । नववस्त्रेणाच्छिद्रमाच्छाद्य, तत आचार्यः ऋत्विग्भिस्सह विष्णु-

सूक्तं पठित्वा पवमानस्सुवर्चनः . . . . जातवेदा मोर्जयन्त्या पुनातु" इतन्तं पुण्याहमन्त्रं पठित्वा ॥

पवमानसूक्तम् (सगृंहिता कां. ६ प्र. ६).

ओं अश्मन्नूर्जं पर्वते शिश्रियाणां वाते पर्जन्ये वरुणस्य शुष्मे । अद्भ्य ओषधीभ्यो वनस्पतिभ्योधिसम्भृतान्नः इषमूर्जं धत्त मरुतस्सगृंराणाः । अश्मग्गंस्ते क्षुदमुं ते शु गृच्छतु यं द्विष्मः । समुद्रस्य त्वा वाकयाग्ने परिव्ययामसि । पावको अस्मभ्यगं् शिवो भव । हिमस्य त्वा जरायुणाग्ने परिव्ययामसि ॥ पावको अस्मभ्यगं् शिवो भव । उप ॥ ९ ॥ ज्मन्नुप वेतसेऽवत्तरं नदीष्वा॥ अग्ने पित्तमपामसि । मण्डूकिताभिरागहि सेमं नो यज्ञम् । पावकवर्णगं् शिवं कृधि । पावक आचितयन्त्या कृपा । क्षामन्नुरुच उषसो न भानुना ॥ तूर्वन्नयामन्नेतशस्य नूरण आयो घृणे । नततृषाणो अजिरः । अग्ने पावकरोचिषा मन्द्रया देवजिह्वया । आदेवान्वक्षि यक्षि च । स नः पावक दीदिवोग्ने देवागं् इहावह । उपयज्ञगं् हविश्च नः । अपामिदं न्ययनगं् समुद्रस्य निवेशनम् । अन्यं ते अस्मत्तपन्तु हेतयः पावको असभ्यगं् शिवो भव । नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे । अन्यं ते अस्मत्तपन्तु हेतयः । पावको अस्मभ्यगं् शिवो भव । नृषदे वट् ॥ ३ ॥ अप्सुषदे वड्वनसदे वड्बर्हिषदे वट्थ्सुवर्विदे पट् । ये देवा देवानां यज्ञिया यज्ञियानागं् संवत्सरीणमुपभागमासते । अहुतादो हविषो यज्ञे अस्मिन्थ्स्वयं जुहुध्वं मधु नो घृतस्य । ये देवा देवेष्वधिदेवत्वमायन् ये ब्रह्मणः पुर एतारो अस्य । येभ्यो नर्ते पवते धाम किंचन न ते

दिवो न पृथिव्या अधिस्नुषु । प्राणदाः ॥ ४ ॥ अपानदा व्यानदा-श्चक्षुर्दा वर्चोदा वरिवोदाः । अन्यं ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यग्ं शिवो भव ॥ अग्निस्तिग्मेन शोचिषा यग्ं सद्विश्वं न्यत्रिणं ॥ अग्निर्नोवग्ं स ते रयिं । सैनानीकेन सुविदत्रो अस्मै यष्टा देवाग्ं आयजिष्ट स्वस्ति । अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुतरेवद्दिदीहि ॥ ५ ॥ इति विष्णुसूक्तं पवमानसूक्तं च जपेत्॥ अनन्तरं जलस्थं भगवन्तं देव्या सहितं गन्धपुष्पधूपदीपनैवेद्यैः पूजयित्वा नीराजनं कुर्यात् ॥ चतुर्दिक्षु अनिर्वाणान् दीपान् स्थापयित्वा, हरिद्रापीताक्षतगौरसर्षपान्परितो विकीर्य, रक्षोहण इति मन्त्रेण रक्षां कुर्यात् ॥ तै. सं. कां. ३ प्रश्ने—ओं रक्षोहणो वलगहनो वैष्णवान् खनामीदमहं तं वलगमुद्वपामि यन्नस्समानो यम-समानो निचखानेदमेनमधरं करोमि यो नस्समानो यो समानो रातीयति गायत्रेण छन्दसावबाढो वलगः किमत्र भद्रं तन्नौस्सह विराडसि सपत्नहा संराडसि भ्रातृव्यहा स्वराडस्यभिमातिहा विश्वा-राडसि विश्वासां नाष्ट्राणाग्ं हन्ता ॥ ३ ॥

सुदर्शनाय हेतिराजाय हुं फडिति मन्त्रेण च सर्वतो रक्षां कुर्यात् ॥ अनन्तरं प्राणानायम्य सङ्कल्पं कुर्यात् ॥ अस्मिन् भगवत्प्रतिष्ठारूपकर्मणि सर्वतो रक्षार्थं चण्डदीनावाहयिष्ये ॥ ततः, चण्डाय नमः प्रचण्डाय नमः । इति मन्त्रेण प्राग्द्वारे गन्धपुष्प-धूपदीपनैवेद्यैश्चण्डप्रचण्डौ पूजयेत् । दक्षिणद्वारे भद्राय नमः । सुभ-द्राय नमः इति मन्त्रद्वयेन भद्रसुभद्रौ । प्रतच्यिां जयाय नमः विजयाय नमः इति मन्त्रद्वयेन जयविजयौ । उदीच्यां —धात्रे नमः ।

विधात्रे नमः । इति धातृविधातारौ । गन्धपुष्पधूपदीपनैवेद्यैः पूजयेत् ॥ ततः प्राग्द्वारे । कुमुदाय नमः । कुमुदाक्षाय नमः । इति मन्त्रद्वयेन कुमुदकुमुदाक्षौ । दक्षिणे—पुण्डरीकाय नमः वामनाय नमः । इति मन्त्रद्वयेन पुण्डरीकवामनौ ॥ प्रतीच्यां—शङ्कुकर्णाय नमः । सर्वनेत्राय नमः । इति मन्त्रद्वयेन शङ्कुकर्णसर्वनेत्रौ ॥ उत्तरे—सुमुखाय नमः सुप्रतिष्ठिताय नमः ॥ इति सुमुखसुप्रतिष्ठितौ गन्धपुष्पधूपदीपनैवेद्यैः पूजयेत् ॥ अनन्तरं प्राच्याम्—ओं विमलायै चामरहस्तायै नमः इति मन्त्रेण विमलम् ॥ आग्नेय्यां—ओं, उत्कर्षिण्यै चामरहस्तायै नम इति मन्त्रेण उत्कर्षिणीम् ॥ दक्षिणस्यां—ओं ज्ञानायै चामरहस्तायै नम इति मन्त्रेण ज्ञानाम् ॥ नैर्ऋते—ओं क्रियायै चामरचामरहस्तायै नम इति मन्त्रेण क्रियाम् । पश्चिमायां—ओं प्रह्वै चामरहस्तायै नम इति मन्त्रेण प्रह्वीम् । वायव्ये—सत्यायै चामरहस्तायै नम इति मन्त्रेण सत्याम् । उत्तरे—ओं ईशानायै चामरहस्तायै नम इति मन्त्रेणेशानाम् । ईशान्यां—ओं योगायै चामरहस्तायै नम इति मन्त्रेण योगाम् । भगवत्पुरत—ओं अनुग्रहायै चामरहस्तायै नम इति मन्त्रेण अनुग्रहां च गन्धपुष्पधूपदीपनैवेद्यैः पूजयेत् । अनन्ताय नागराजाय नमः । इति पूर्वे अनन्तम् । विहगेशाय नम इत्याग्नेय्यां विहगेशम् । विष्वक्सेनाय नम इति दक्षिणे विष्वक्सेनम् । ओं सुदर्शनाय हेतिराजाय नम इति नैर्ऋते सुदर्शनम् । ओं पाञ्चजन्याय शङ्खाधिपतये नम इति पश्चिमे पाञ्चजन्यम् । ओं कौमोदक्यै गदाधिपतये नम इति वायव्ये कौमोदकीम् । ओं नन्दकाय खड्गाधिपतये नम इत्युत्तरे नन्दकम् । ओं शार्ङ्गाय चापाधिपतये नम इतीशाने शार्ङ्गं गन्धपुष्पधूपदीपनैवेद्यैः पूजयेत् । अनन्तरं बलीन् दद्यात् ॥

बलिक्रमः.

फललाजदधिसक्तूनां चतुरः पिण्डान् कृत्वा तेष्वेकं हस्ते गृहीत्वा—

आद्याश्च कर्मजाश्चैव ये भूताः प्राग्दिशि स्थिताः ।
प्रसन्नाः परितुष्टास्ते गृह्णन्तु बलिकांक्षिणः ॥

इति पूर्वं बलिं दद्यात् ॥ द्वितीयं पिण्डं गृहीत्वा—

वृक्षेषु पर्वताग्रेषु ये विदिक्षु च संस्थिताः ।
भूमौ व्योम्नि स्थिता ये च बलिं गृह्णन्तु तेऽपि च ॥

इति दक्षिणे बलिं दद्यात् ॥ तृतीयपिण्डं हस्ते गृहीत्वा —

विनायकाः क्षेत्रपालाः येचान्ये बलिकांक्षिणः ।
पूषाद्याः पार्षदाश्चैव प्रतिगृह्णतु मे बलिम् ॥

इति पश्चिमे बलिं दद्यात् ॥ चतुर्थं पिण्डं हस्ते गृहीत्वा—

चण्डाद्याः कुमुदाद्याश्च ये भूतास्सर्वतस्थिताः ।
आगच्छन्तु च ते सर्वे गृह्णन्तु तमिमं बलिम् ॥

इति उत्तरे बलिं दद्यात् ॥

तत आचार्यः हस्तपादादौ प्रक्षाळ्य आचम्य पवित्रपाणिः प्राणानायम्य शुद्धात्मा ध्यायेद्ब्रह्मसनातनम् । अनन्तरं प्रहरे प्रहरे श्रीमते नारायणाय नम इति मन्त्रेण भगवन्तम् । ओं श्रियै नम इति महालक्ष्मीम् । अर्घ्यपाद्याचमनगन्धपुष्पधूपदीपनैवेद्यैः पूजयेत् । तत आचार्य ऋत्विग्भिस्सह मूलमन्त्रं द्वयं रामकृष्णवासुदेवादि मन्त्रं च जपं कुर्यात् । चतुर्द्वारेषु चतुरो वेदान् धर्मशास्त्रेतिहासपुराणश्रीभाष्यादीन् पाठयेत् । एवं नृत्तगीतवाद्यवेदघोषपूर्वकं रात्रौ जागरणं कुर्यात् । एवमुत्सवः कर्तव्यः ॥

एकरात्रं द्विरात्रं वा जलमध्येऽधिवासयेत् ।
यामं यामार्धकं वापि जलवासं समाचरेत् ॥ १ ॥

गृहार्चास्थापने काले सद्य एव समाचरेत् ।
प्रदोषेष्वधिवासस्य शयनं तु महानिशि ॥ २ ॥

प्रतिष्ठाञ्च दिवा कुर्यान्मुहूर्ते कालचोदिते ।
नद्याद्यभावे बिम्बस्य जलाधिवसनं भवेत् ॥ ३ ॥

जलद्रोणीं कटाहं वा समुद्धृत्य महाजलम् ।
यथासम्भवमन्यस्मिन् मृन्मयादौ तदिष्यते ॥ ४ ॥

सद्यो वा तोयवासं च पुरस्तादधिवासनात् ।
अल्पतोये स्मशानान्ते लवणोदकदूषिते ॥ ५ ॥

चैत्यवृक्षसमीपे च नीचैरध्यासिते तथा ।
कषाये कटुके चैव त्यक्ते फेनैश्च दूषिते ॥ ६ ॥

ऊषरे शैवलयुते वर्णान्तरयुते तथा ।
एवमादिषु दुष्टेषु प्रतिमां नाधिवासयेत् ॥ ७ ॥

नदीषु दीर्घिकायां वा तटाके निर्झरेऽपि वा ।
जलाधिवसनं कुर्यात् प्रसन्नसलिलेऽपि वा ॥ ८ ॥

जलाधिवसने चैव तथानयनमोक्षणे ।
शयने वेदिकायां च न कालः कमलासन ॥ ९ ॥

यस्याः प्रतिकृते स्साक्षान्नाधिवासो जले भवेत् ।
तस्याश्छायाधिवासोऽयं कथितः कमलासन ॥ १० ॥

दारुलोहशिलामेध्याः प्रतिमायाः पृथग्विधाः ।
तासां जलाधिवसनं साक्षादेव विधीयते ॥ ११ ॥
लोहजप्रतिमानां तु पूर्वं वार्यधिवासनात् ।

इति जलाधिवासः.

अथ द्वितीयदिवसोत्सवः.

ततो द्वितीयेऽह्नि आचार्यो ऋत्विजश्च सर्वे कृतस्नानाः धृतोर्ध्व-पुण्ड्राः नवाम्बरधारिणो नवभूषणालङ्कृताः यागशालां प्रविशेयुः । त्रुट्यनन्तरं आचार्यः पुण्याहजलेन यागमण्डपं प्रोक्ष्य, श्रीमते नारायणाय नम इति मन्त्रेण भगवन्तम् । ओं श्रियै नम इति महालक्ष्मीं अर्घ्यपाद्याचमनवस्त्रगन्धपुष्पधूपदीपनैवेद्यनीराजनैः पूजयेत् ॥

अथ भगवदुत्थापनम्.

ओं उत्तिष्ठ ब्रह्मणस्पते । देवयन्तस्त्वेमहे । उपप्रयन्तु मरुतस्सु-दानवः । इन्द्रप्राशूर्भवासचा । प्रैतु ब्रह्मणस्पतिः । प्रदेव्ये तु सूनृता । अच्छावीरं नर्यं पङ्क्तिराधसम् । देवा यज्ञं नयन्तु नः । देवी द्यावापृथिवी अनुमेमगं् साथाम् । ऋध्यासमद्य । मखस्य शिरः ॥ २ ॥ मखाय त्वा । मखस्य त्वा शीर्ष्णे । इयत्यग्र आसीः । ऋध्यासमद्य । मखस्य शिरः । मखाय त्वा । मखस्य त्वा शीर्ष्णे । देवीर्ब्रह्मीरस्य भूतस्य प्रथमजा ऋतावरीः । ऋध्यासमद्य । मखस्य शिरः ॥ ३ ॥ मखाय त्वा । मखस्य त्वा शीर्ष्णे । इन्द्रस्यौजोसि । ऋध्यासमद्य । मखस्य शिरः । मखाय त्वा । मखस्य त्वा शीर्ष्णे । अग्निजा असि प्रजापते रेतः । ऋध्यासमद्य । मखस्य शिरः ॥ ४ ॥ मखाय त्वा । मखस्यत्वा शीर्ष्णे । आयुर्धेहि प्राणं धेहि । अपानं धेहि व्यानं धेहि । चक्षुर्धेहि

श्रोत्रं धेहि । मनो धेहि वाचं धेहि । आत्मानं धेहि प्रतिष्ठां धेहि । मां धेहि मयि धेहि । मधु त्वा मधुला करोतु । मखस्य शिरोऽसि ॥ ५ ॥ यज्ञस्य पदे स्थः । गायत्रेण त्वा छन्दसा करोमि । त्रैष्टुभेन त्वा छन्दसा करोमि । जागतेन त्वा छन्दसा करोमि । मखस्य रास्नासि । अदितिस्ते बिलं गृह्णातु । पाङ्क्तेन छन्दसा । सूर्यस्य हरसाश्राय । मखोऽसि ॥ ६ ॥ इति मन्त्रेण भगवन्तमुत्थाप्य, स्नानपीठे निवेश्य तिन्त्रिणी-फलोदकैस्संशोध्य शुद्धोदकेन प्रक्षाळ्य सदर्भेण नववस्त्रेणाच्छाद्य, देवस्य पुरतः सूत्रवेष्टितान् पूगीफलपुष्पतुलसीसहितान् सुगन्धिजल-पूरितान् एकविंशतिदर्भनिर्मितकूर्चसहितान् श्रीफलाम्रपल्लवापिहित-मुखान् नववस्त्राच्छादितान् अष्टादशसङ्ख्याकान् कलशान् धान्य-राशिषु संस्थाप्य सुरभिमुद्रां प्रदर्श्य मूलमन्त्रेणाभिमन्त्र्य ततस्तण्डुलै-श्चतुरश्रं स्थण्डिलं कृत्वा कुशमूलेन प्राचीरुदीचीस्तिस्रो रेखा लिखित्वा—

पञ्चगव्यमेलनक्रमः.

पूर्वे पलमेकं गोमूत्रं दक्षिणेऽङ्गुष्ठार्धं गोमयम् । पश्चिमे सप्त-पलं क्षीरं । उत्तरे त्रिपलं दधि ॥ मध्ये पलमेकमाज्यम् । ईशान्ये पलमेकं कुशोदकम् ॥ एवं क्रमेण गव्यानि स्थापयित्वा, पुण्याहजलेन तानि द्रव्याणि प्रोक्ष्य ॥ गोमूत्रे—ओं विष्णवे नमः । गोमये—ओं ब्रह्मणे नमः । क्षीरे—ओं अच्युताय नमः । दध्नि—ओं शुक्राय नमः । घृते—ओं कृष्णाय नमः । कुशोदके—ओं सवित्रे नमः । प्रणवादिनमोन्ततंत्तन्नामभिरावाहनार्घ्यपाद्याचमनस्नानवस्त्रोपवीतगन्धपुष्प-धूपदीपनैवेद्यताम्बूलदक्षिणाभिरभ्यर्च्य, ओं नारायणाय विद्महे वासु-देवाय धीमहि । तन्नो विष्णुः प्रचोदयात् । इति **गोमूत्रम्** । ओं गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीगं् सर्वभूतानां

त्वामिहोपह्वये श्रिय" मिति **गोमयम्**। आप्यायस्व समेतु ते विश्वत-स्सोमवृष्णियम्। भवा वाजस्य सन्दधे। इति **क्षीरम्**। दधि क्राव्ण्णो अकारिषम्। जिष्णो रश्वस्य वाजिनः। सुरभिनो मुखाकरत्। प्रण आयूगूंषि तारिषत्। इति **दधि**। शुक्रमसि ज्योतिरसि तेजोसि देवो वस्सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभि" रिति **घृतम्**। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे" इति **कुशोदकम्**॥ शुभे नूतने मृत्पात्रे सङ्गृह्य प्रणवेनाभिमन्त्र्य मूलेन भगवन्तं स्नापयेत्॥

अथ पञ्चगव्यादि स्नानक्रमः (तत्र तैलाभ्यञ्जनम्).

ततो "वामदेव्यमभिगायत उध्रियमाणे। अन्तरिक्षं वै वाम-देव्यम्। अन्तरिक्षमेवैनं प्रतिष्ठितमाधत्ते॥ अथो क्षान्तिर्वै वाम-देव्यः॥ इति मन्त्रेण तैलाभ्यञ्जनं कुर्यात्॥

अथ आमलकोदकस्नापनम्.

यज्ञा यज्ञियं पुच्छं छन्दागूंस्यङ्गानि धिष्णियाश्शफा यजूगूंषि नाम। सुपर्णोसि गरुत्मान् दिवं गच्छ सुवः पत॥ इति मन्त्रेण आमल-कोदकेन स्नापयेत्॥

अथ माषमुद्गहरिद्राचूर्णैरुद्वर्तनम्.

कया नश्चित्र आभुव दूती सदा वृधस्सखा। कया शचिष्टया वृता॥ इति माषमुद्गहरिदाचूर्णैरुद्वर्तनं कुर्यात्॥

अथोष्णवारिस्नापनम्.

मानस्तोके तनये मान आयुषि मानो गोषु मानो अश्वेषु रीरिषः। वीरान्मानो रुद्रभामितो वधीर्हविष्मन्तो नमसा विधेम ते॥ इत्युष्णवारिणा स्नापयेत्॥

अथ पयस्स्नापनम्.

ओं आप्यायस्व समेतु ते विश्वतस्सोम वृष्णियम्। भवा वाजस्य सन्दधे ॥ इति पयसा स्नापयेत् ॥

अथ दध्ना स्नापनम्.

ओं दधिक्राव्णो अकारिषम्। जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखाकरत्। प्रण आयूगूंषि तारिषत् ॥ इति मन्त्रेण दध्ना स्नापयेत् ॥

सर्पिषा.

ओं शुक्रमसि ज्योतिरसि तेजोऽसि। देवोव्वस्सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोस्सूर्यस्य राश्मिभिः ॥ इति मन्त्रेण सर्पिषा स्नापयेत् ॥

मधुना.

ओं मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नस्सन्त्वोषधीः ॥ मधु नक्तमुतोषसि मधुमत्पार्थिवगूं रजः। मधु द्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमागूं अस्तु सूर्यः ॥ माध्वीर्गावो भवन्तु नः ॥ इति मन्त्रेण मधुना स्नापयेत् ॥

शर्करया.

ओं ताश्शर्करा अभवन्। तच्छर्कराणागूं शर्करत्वम्। वज्रो-वै शर्कराः पशुरग्निः। यच्छर्कराभिरग्निं परिमिणोति। वज्रेणैवास्मै पशून्परिगृह्णाति ॥ इति शर्करया स्नापयेत् ॥

फलोदकेन.

ओं याः फलिनीर्या अफला" इति फलोदकेन स्नापयेत् ॥

पुष्पोदकेन.

ओं अपुष्पा याश्च पुष्पिणीः ॥ इति पुष्पोदकेन स्नापयेत् ॥

लोहोदकेन.

ओं हिरण्यगर्भस्समवर्तताग्रेभूतस्य जातः पतिरेक आसीत्। सदाधारपृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ इति लोहोदकेन स्नापयेत् ॥

अक्षताम्बुना.

ओं त्रातारमिन्द्रमवितारमिन्द्रग्ं हवे हवे सुहवग्ं शूरमिन्द्रं । हुवे नु शक्रं पुरुहूतमिन्द्रग्ं स्वस्ति नो मघवा धात्विन्द्रः ॥ इत्यक्षताम्बुना स्नापयेत् ॥

यवोदकेन.

ओं इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्यपाग्ं सुरे ॥ इति यवोदकेन स्नापयेत् ॥

गन्धोदकेन.

ओं गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणिम्। ईश्वरीग्ं सर्वभूतानां त्वामिहोपह्वये श्रियम्॥ इति गन्धोदकेन स्नापयेत् ॥

हरिद्रया.

ओं हिरण्यवर्णाग्ं हरिणीं सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह इति हरिद्रया स्नापयेत् ॥

रत्नोदकेन.

वषट् ते विष्णवास आकृणोमि तन्मे जुषस्व शिपिविष्ट हव्य" मिति रत्नोदकेन स्नापयेत् ॥

नारिकेळोदकेन.

देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्। पूष्णो हस्ताभ्यामाददे ॥ इति नारिकेळोदकेन स्नापयेत् ॥

ततः पूर्वस्थापित अष्टादशकलशोदकेन—पवमानस्सुवर्जनः—जातवेदा मोर्जयन्त्या पुनातु" इत्यन्तेन पुण्याहमन्त्रेण स्नापयेत्। ततो नववस्त्रयुग्मेनाच्छादयेत्। ततश्श्रीमते नारायणाय नम इति मन्त्रेण भगवन्तं ओं श्रियै नम इति महालक्ष्मीञ्च अर्घ्यपाद्याचमनगन्धपुष्पधूपदीपनैवेद्यनीराजनैरभ्यर्चयेत्॥

द्वितीयवारं बलिक्रमः.

ततो बलिं दद्यात्। फललाजदधिसक्तूनां चतुरः पिण्डान् कृत्वा एकं हस्ते गृहीत्वा—

आद्याश्च कर्मजाश्चैव ये भूताः प्राग्दिशि स्थिताः।
प्रसन्नाः परितुष्टास्ते गृह्णन्तु बलिकांक्षिणः॥

इति पूर्वे॥

द्वितीयं पिण्डं गृहीत्वा. (दक्षिणे)

वृक्षेषु पर्वताग्रेषु ये विदिक्षु च संस्थिताः।
भूमौ व्योम्नि स्थिता ये च बलिं गृह्णन्तु तेऽपि च॥

इति दक्षिणे॥

तृतीयं पिण्डं गृहीत्वा. (पश्चिमे)

विनायकाः क्षेत्रपालाः ये चान्ये बलिकांक्षिणः।
पूषाद्याः पार्षदाश्चैव प्रतिगृह्णन्तु मे बलिम्॥

इति पश्चिमे॥

चतुर्थं पिण्डं गृहीत्वा. (उत्तरे)

चण्डाद्याः कुमुदाद्याश्च ये भूतास्सर्वतस्स्थिताः।
आगच्छन्तु च ते सर्वे गृह्णन्तु तमिमं बलिम्॥

इत्युत्तरे बलिं दद्यात्॥

पुनर्यानारोहणम्.

ततो भगवन्तं यानमारोप्य तूर्यघोषनृत्यगीतपुरस्सरं छत्रचामर-पुरस्सरं आचार्यादिभिः—

शकुनसूक्तम्.

अनुहवं परिहवं परीवादं परिक्षिपम् । दुस्स्वप्नं दुरुदितं तद्विषद्भ्यो दिशाम्यहम् । अनुहूतं परिहूतगुं शकुनेर्यदशाकुनम् । मृगस्य सूतमक्ष्णया तद्विषद्भ्यो दिशाम्यहम् । आरात्ते अग्निरस्त्वारात्परशुरस्तु ते । निवाते त्वाभिवर्षतु स्वस्ति तेऽस्तु वनस्पते स्वस्ति मेऽस्तु वनस्पते । नमश्शकृत्सदे रुद्राय नमो रुद्राय शकृत्सदे । गोष्ठमसि नमस्ते अस्तु मामाहिगुंसीस्सिगासिनासि वज्रो नमस्ते अस्तु मामाहिगुंसीः । उद्गातेव शकुने सासगायसि ब्रह्मपुत्र इव सवनेषु शगुंससि । स्वस्ति नश्शकुने अस्तु प्रतिनस्सुमना भव ॥ इति शाकुनसूक्तमधीयानैः ऋत्विग्भिस्सह वीथ्यां सप्रदक्षिणमुत्सवं कृत्वा, यागशालां पुनरागत्य पीठमध्ये शय्यां कल्पयेत् । ओं नमो भगवते वासुदेवायेति मन्त्रेण वेदिं प्रोक्ष्य तस्यां प्रागग्रान्दर्भानास्तीर्य तेषु चतुर्भारान् शालीन् चतुरश्रमास्तीर्य तदुपरि द्विभारान् तण्डुलानास्तीर्य तदुपर्येकभारतिलानास्तीर्य वस्त्रेणाच्छाद्य तदुपरि प्रागग्रान्कुशानास्तीर्य तदुपरि व्याघ्रचर्म आस्तीर्य तदुपरि तूलिकायुतं मृद्वास्तरणमास्तीर्य क्षौमं चित्रवस्त्राणि शुक्लवस्त्राणि च उदर्युपर्यास्तीर्य उपधानानि त्रीणि कल्पयित्वा कस्तूरिकादिसुगन्धद्रव्यैः सुगन्धिपुष्पैश्च संयुतां शय्यां कारयेत् ॥ तत आचार्यो वेदघोषैस्सह पूर्वोक्तेन "उत्तिष्ठ ब्रह्मणस्पते । इत्यादिमखोसीत्यन्तेन मन्त्रेण बिंबं यानादवतार्य कुण्डशय्यावेदीं प्राग्दक्षिणेन नीत्वा " इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपागुंसुरे।

विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात् । संबाहुभ्यां नमति संपतत्रैर्द्यावापृथिवी जनयन् देव एकः । यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः । हिरण्यगर्भं पश्यत जायमानगं् स नो देवश्शुभया स्मृत्या संयुनक्तु ।" इति मन्त्रेण प्राक्शिरो दक्षिणवक्त्रं मन्दिराभिमुखं वा दक्षिणशिरसं वा भगवन्तं शाययित्वा । "युवा सुवासाः परिवीतः । आगात्स उ श्रेयान् भवति जायमानः । तं धीरासः कवय उन्नयन्ति स्वाधयो मनसा देवयन्तः ।" इति मन्त्रेण कम्बलैर्वस्त्रैर्वा आच्छादयेत् । ततश्चतुर्दिक्षु अनिर्वाणान् दीपान् संस्थापयेत् ॥

तत आचार्यः श्रीमते नारायणाय नम इति मन्त्रेण भगवते । ओं श्रियै नम इति महालक्ष्म्यै अर्घ्यपाद्याचमनगन्धपुष्पधूपदीपनैवेद्यनीराजिनानि दत्वा भगवतः पुरतः सुवर्णरजताताम्रानिर्मितं सूत्रवेष्टितं कलशं "ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः । स बुध्न्या उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः ।" इति मन्त्रेण पश्चिमोत्तरदेशे धान्योपरि प्रतिष्ठाप्य । तस्मिन् सुगन्धिजलं "आपो वा इदगं् सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽमृतमापोऽन्नमापस्संम्राडापो विराडापस्स्वराडापश्चन्दागंष्यापो ज्योतीगंष्यापस्सत्यमापस्सर्वा देवता आपो बूर्भुवस्सुवराप ओम् ॥ इति मन्त्रेण निक्षिप्य, वटाश्वत्थोदुम्बराम्रप्लक्षाणां पल्लवानि (दत्वा) तुलसीदलं पूगीफलं सर्वौषधिगणञ्च मूलेन निक्षिपेत् ॥

कुष्ठां मांसीं हरिद्रे द्वे वचाचन्दनशैलजाः ।
कर्पूरा रोचना मुस्ता सर्वौषध्यो दश स्मृताः ॥

एलालवङ्गकर्पूरं जातीतक्कोलचन्दनम् ।
पुष्पाण्येतानि निक्षिप्य मन्त्ररत्नेन कूर्चकम् ॥
कूर्चाग्रे राक्षसान् घोरान् भिन्धि कर्मविघातिनः ।
त्वामर्पयामि कुम्भेऽस्मिन् साफल्यं कुरु कर्मसु ॥

इति मन्त्रेण एकविंशतिदर्भनिर्मितमूर्ध्वाग्रं कूर्चं निधाय—

वृक्षराजसमुद्भूताश्शाखायाः पल्लवत्वचः ।
युष्मान् कुम्भेष्वर्पयामि सर्वपापापनुत्तये ॥

इति मन्त्रेण पल्लवं निधाय—

नारिकेलसमुद्भूतत्रिनेत्रहरसम्मत ।
शिखया दुरितं सर्वं पापं पीडाञ्च मे नुद ॥

इत्यूर्ध्वशिखं नारिकेरं निधाय । नववस्त्रेणाच्छाद्य । बूर्भुवस्सुवरोमित्यक्षतान्निक्षिप्य, गन्धपुष्पैरलङ्कृत्य । ओं यं शोषयामि । ओं रं दाहयामि । ओं वं प्लावयामि । इति शोषणदाहनप्लावनानि कृत्वा दर्भैः प्रच्छाद्य मूलमन्त्रेण मन्त्ररत्नेन च अष्टोत्तरसहस्रवारं शतवारं वा अभिमन्त्र्य । सुदर्शनाय हेतिराजाय हुं फडिति मन्त्रेण चक्रमुद्रां प्रदर्श्य ॥

रक्षोहणो वलगहनो वैष्णवान्खनामीदमहन्तं वलगमुद्वपामि यं नस्समानो यमसमानो निचखानेदमेनमधरं करोमि यो नस्समानो यो समानोरातीयति गायत्रेण छन्दसाऽवबाढोवलगः किमत्र भद्रं तन्नौ सह बिराडसि सपत्नहा सम्राडसि भ्रातृव्यहा स्वराडस्यभिमातिहा विश्वाराडसि विश्वासां नाष्ट्राणाग् हन्ता" इति मन्त्रेण रक्षां कुर्यात् । अनन्तरं शय्यावेद्या अष्टदिक्षु सूत्रवेष्टितान् सुगन्धिजलपरिपूरितान् वज्रवैडूर्यपुष्यरागमौक्तिकनीलमणीन् वटाश्वत्थोदुम्बराम्रप्लक्षपल्लवत्वक्स-

हितान् कुष्ठमांसीहरिद्राद्वितयवचाचन्दनशैलजकर्पूररोचनमुस्ताएलालवङ्ग-कर्पूरजातीचम्पकपुष्पपूगीफलतुलसीसहितान् एकविंशतिदर्भनिर्मितकूर्च-सहितान् श्रीफलाम्रपल्लवापिहितमुखान् नववस्त्राच्छादितान् अष्टकलशान् धान्यराशिषु संस्थाप्य तेषु भूर्भुवस्स्वरित्यक्षतान्निक्षिप्य, ओं यं शोष-यामि । ओं रं दाहयामि । ओं वं प्लावयामि । इति शोषणदाहन-प्लावनानि कृत्वा, गन्धपुष्पैरलंकृत्य दर्भैः प्रच्छाद्य सुरभिमुद्रां प्रदर्श्य मूलेनाभिमन्त्रय, सुदर्शनाय हेतिराजाय हुं फडिति मन्त्रेण रक्षां कुर्यात् ॥

सर्वतो रक्षणीयचण्डाद्यावाहनम् .

अस्मिन् भगवत्प्रतिष्ठारूपकर्मणि सर्वतो रक्षणार्थं चण्डादीना-वाहयिष्ये । ततश्चण्डाय नमः । प्रचण्डाय नमः । इति मन्त्रद्वयेन प्राग्द्वारे गन्धपुष्पधूपदीपनैवेद्यैश्चण्डप्रचण्डौ पूजयेत् ॥ भद्राय नमः । सुभद्राय नम इति मन्त्रद्वयेन दक्षिणद्वारे भद्रसुभद्रौ गन्धादिभिरर्चयेत् ॥ जयाय नमः । विजयाय नम इति मन्त्रद्वयेन प्रतीच्यां जयविजयौ । धात्रे नमः । विधात्रे नम इति मन्त्रद्वयेन उदीच्यां धातृविधातारौ । गन्धापुष्पादिभिः पूजयेत् । ततः कुमुदाय नमः । कुमुदाक्षाय नमः इति मन्त्रद्वयेन प्राग्द्वारे कुमुदकुमुदाक्षौ । पुण्डरीकाक्षाय नमः । वामनाय नम इति मन्त्रद्वयेन दक्षिणद्वारे पुण्डरीकवामनौ ॥ शङ्कुकर्णाय नमः । सर्वनेत्राय नम इति मन्त्रद्वयेन पश्चिमे शङ्कुकर्णसर्वनेत्रौ ॥ सुमुखाय नमः । सुप्रतिष्ठिताय नम" इति मन्त्रद्वयेन उत्तरे सुमुखसुप्रतिष्ठितौ। गन्धपुष्पादिभिरभ्यर्चयेत् ॥

अनन्तरं ओं विमलायै चामरहस्तायै नम इति मन्त्रेण प्राच्यां विमलाम् । ओं उत्कर्षिण्यै चामरहस्तायै नम इति मन्त्रेणाग्नेय्यां

उत्कर्षिणीम् । ओं ज्ञानायै चामरहस्तायै नम इति मन्त्रेण दक्षिणे ज्ञानाम् । ओं क्रियायै चामरहस्तायै नम इति नैर्ऋते क्रियाम् । ओं प्रह्वयै चामरहस्तायै नम इति मन्त्रेण पश्चिमे प्रह्वीम् । ओं सत्यायै चामरहस्तायै नम इति मन्त्रेण वायव्ये सत्याम् । ओं ईशानायै चामरहस्तायै नम इति मन्त्रेण उत्तरे ईशानाम् । ओं योगायै चामरहस्तायै नम इति मन्त्रेण ईशाने योगाम् । ओं अनुग्रहायै चामरहस्तायै नम इति मन्त्रेण भगवत्पुरतोऽनुग्रहां गन्धादिभिरभ्यर्चयेत् ॥

ओं अनन्ताय नागराजाय नम इति मन्त्रेण पूर्वे अनन्तम् । विहगेशाय नम इति मन्त्रेणाग्नेय्यां विहगेशम् । विष्वक्सेनाय नम शति मन्त्रेण दक्षिणे विश्वक्सेनम् । ओं सुदर्शनाय नम इति मन्त्रेण नैर्ऋते सुदर्शनम् । ओं पाञ्चजन्याय शङ्खाधिपतये नम" इति मन्त्रेण पश्चिमे पाञ्चजन्यम् । ओं कौमोदक्यै गदाधिपतये नम इति मन्त्रेण वायव्ये कौमोदकीम् । ओं नन्दकाय खड्गाधिपतये नम इति मन्त्रेण उत्तरे नन्दकम् । ओम् शार्ङ्गाय चापाधिपतये नम" इति ईशाने शार्ङ्गम् । गन्धादिभिरभ्यर्चयेत् ॥

अनन्तरं बलीन् दद्यात्.

फललाजदधिसक्तूनां चतुरः पिण्डान् कृत्वा तेष्वेकं गृहीत्वा—

आद्याश्च कर्मजाश्चैव ये भूताः प्राग्दिशि स्थिताः ।
प्रसन्नाः परितुष्टास्ते गृह्णन्तु बलिकांक्षिणः ॥

इति पूर्वे बलिं दद्यात् ॥

द्वितीयं गृहीत्वा दक्षिणे—

वृक्षेषु पर्वताग्रेषु ये विदिक्षु च संस्थिताः ।

भूमौ व्योम्नि स्थिता ये च बलिं गृह्णन्तु तेऽपि च ॥

इति बलिं दद्यात् ॥

तृतीयं गृहीत्वा पश्चिमे—

वैनायकाः क्षेत्रपालाः ये चान्ये बलिकांक्षिणः ।

पूषाद्याः पार्षदाश्चैव प्रतिगृह्णन्तु मे बलिम् ॥

इति बलिं दद्यात् ॥

चतुर्थं गृहीत्वा उत्तरे—

चण्डाद्याः कुमुदाद्याश्च ये भूतास्सर्वतस्स्थिताः ।

आगच्छन्तु च ते सर्वे गृह्णन्तु तमिमं बलिम् ॥

इति बलिं दद्यात् ॥

तत आचार्यः हस्तपादौ प्रक्षाळ्य आचम्य पवित्रपाणिः प्राणानायम्य, शुद्धात्मा ध्यायेद्ब्रह्म सनातनम् । अनन्तरं प्रहरे प्रहरे श्रीमते नारायणाय नम इति मन्त्रेण भगवन्तम् । ओं श्रीयै नम इति महालक्ष्मीम् अर्घ्यादिभिरर्चयेत् ॥ तत आचार्यो ऋत्विग्भिस्सह मूलमन्त्रद्वयमन्त्ररामकृष्णवासुदेवादिमन्त्रजपं कुर्यात् । चतुर्द्वारेषु चतुरो वेदान् धर्मशास्त्रेतिहासपुराणश्रीभाष्यादीन् पाठयेत् । एवमाचार्यो यजमानश्च सर्वे ऋत्विजश्च तस्मिन् दिने उपवसेयुः । ततस्साायाह्ने ऋत्विग्यजमानाचार्यास्सर्वे कृतस्नानाः धृतोर्ध्वपुण्ड्राः नवाम्बरधारिणः नवभूषणालङ्कृताः कृतसन्ध्यावन्दनाः प्रदोषान्ते यागमण्डपं प्रविश्य होममारभेयुः ॥ ततो हस्तपादौ च प्रक्षाळ्य आचम्य आचार्यस्तथाभूतः हस्तपादौ प्रक्षाळ्य गोदानं कारयेत् । श्रीगोविन्द गोविन्द गोविन्द अद्य अमुकमासे अमुकपक्षे अमुकतिथौ अमुकगोत्रो अमुकशर्माऽहं करिष्यमाणभगवत्प्रतिष्ठानिमित्तहोमप्रारम्भसिध्यर्थं सुवर्णशृङ्गीं रौप्य-

खुरां ताम्रपृष्ठीं सवत्सकाम् । मुक्तापुच्छीं कांस्यदोहनामिमां गाममुक-गोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमुत्सृज इति जलसहितानक्षतान्ब्राह्मण-हस्ते देवतीर्थेन दद्यात् । कृतैतद्गोदान(प्रतिष्ठार्थं)साद्गुण्यार्थं इदं हिरण्यं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यं नमः" इति ब्राह्मण-हस्ते जलाक्षतसहितं हिरण्यं दद्यात् । ततो विप्रं परिक्रम्य प्रणमेत् ॥

अनन्तरं धान्यराशिषु अष्टोत्तरशतसहस्रकलशान्निक्षिप्य सुगन्धि-जलं पूरयित्वा, वरुणसूक्तपवमानादिभिर्नानासूक्तैरभिमन्त्रयेत् । अनन्तर-माचार्यो ऋत्विजश्च स्वगृह्योक्तप्रकारेण चतुर्षु कुण्डेषु होमं कुर्युः । योनिकुण्डे आचार्यः अन्येष्वन्ये ऋत्विजश्च उपविशेयुः । तत आचार्य आचम्य प्राणानायम्य श्रीभगवदाज्ञया भगवत्प्रीत्यर्थं अस्मिन् बिम्बे परंज्योतिरागमनार्थं नानासूक्तैर्नानामन्त्रैर्होमं होष्यामीति सङ्कल्प्य ब्राह्मणैस्सह नृत्यवाद्यघोषपूर्वकं ताम्बूलपुष्पदक्षिणाविशिष्टं पात्रं हस्ते गृहीत्वा, ओं नमस्सदसे । नमस्सदसस्पतये । नमस्सखीनां पुरोगाणां चक्षुषे । नमो दिवे । नमः पृथिव्यै । सप्रथसभां मे गोपाय । ये च सभ्यास्सभासदः । तानिन्द्रियावतः कुरु । सर्वमायुरुपासताम् । सर्वेभ्यश्श्रीवैष्णवेभ्यो नमः । इत्यक्षतान् श्रीवैष्णवाशिरसि विकीर्य, अशेषे हे परिषत्, भवत्पादमूले मया समर्पितां इमां सौवर्णीं यत्किञ्चि-द्दक्षिणां यथोक्तदक्षिणामिव स्वीकृत्य अस्य भगवतः श्रीभूमिनीळा-समेतस्य ससमस्तपरिवारस्य प्रतिष्ठाङ्गहोमकर्मणः निर्विघ्नपरिसमाप्ति-र्भूयादिति भवन्तो महान्तोऽनुगृह्णन्तु । इति परिषन्मुखेन अनुज्ञां गृह्णीयात् । तथास्विति परिषद्वदेत् । ततो वस्त्रोत्तरीयकर्णाङ्गुल्या-भरणोपवीततुलसीनलिनाक्षमालासनस्थालीकमण्डल्वाचमनपात्रदक्षिणाभि-र्ब्राह्मणान् तोषयेत् । ततो मूलमन्त्रेण कुण्डं वीक्ष्य ॥

कुण्डलक्षणम्.

तत्र तावत्प्रवक्ष्यामि कुण्डस्यावयवं क्रमात् ।
तदैन्द्रे मेखले पादौ सुभुजे दक्षिणोत्तरे ॥ १ ॥
पश्चिमं पृष्ठमित्युक्तं सयोनिश्शिर उच्यते ।
कुण्डवक्त्रं तु वक्त्रं स्यात् अक्षतं दन्तमेव च ॥ २ ॥
तत्पुन्यं दृष्टिरित्युक्तं तदग्रं पक्ष उच्यते ।
उदरं कुक्षिरित्युक्तं पद्मं हृदयमेव च ॥ ३ ॥
तल्पेपनं मदम्भस्यादिन्धनं चास्थिमेव च ।
आज्यं रुधिरमेवोक्तं तद्वन्धं धर्मवाससम् ॥ ४ ॥
अनलं प्राणमेवोक्तं तज्ज्वालामुखजिह्विका ।
सदर्भं केशमित्युक्तं परिधिं बाहुमेव च ॥ ५ ॥ इति ।

औपासनादिहोमक्रमः.

कुण्डावयवं, ओं अस्त्राय फडिति मन्त्रेण प्रोक्ष्य गन्धपुष्पैरलङ्कृत्य, तत्र तण्डुलान्विकीर्य, पश्चिमत आरभ्य, प्राक्पर्यन्तं दक्षिणत आरभ्योत्तरपर्यन्तं स्रुवेण दर्भमूलेन वा तिस्रस्तिस्रो रेखा लिखित्वा तत्र दर्भं न्यस्य, तृणमद्भिरभ्युक्ष्य, तृणं कुण्डे निक्षिप्य, ओं भूर्भुवस्सुवरोमिति मन्त्रेण सूर्यकान्ताश्मजं लौकिकं मथितं मणिजं वा अग्निं प्रतिष्ठाप्य, याज्ञिकैरिन्धनैः प्रज्वाल्य, "चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यांग् आविवेश" इति मन्त्रेण जलाक्षतानग्नेः पश्चिमतः प्रतिष्ठाप्य, एष हि देवः प्रदिशो नु सर्वाः पूर्वो हि जातस्स उ गर्भे अन्तः । स विजायमानस्स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः । हे अग्ने प्राङ्मुखो देव ममाभिमुखो भव । इत्यग्निमलङ्कृत्य, ओं, अग्नये

नमः । जातवेदसे नमः । सहोजसे नमः । अजिराप्रभवे नमः । वैश्वानराय नमः । नर्यापसे नमः । पङ्क्तिराधसे नमः । विसर्पिणे नमः । श्रीयज्ञपुरुषाय नमः" इत्यादिमन्त्रैः प्रागाद्यष्टदिक्षु अक्षतान्निक्षिप्य, "आत्मने नमः" इति स्वमूर्ध्नि । "सर्वेभ्यः श्रीवैष्णवेभ्यो नम" इति श्रीवैष्णवोपरि अक्षतान् निक्षिपेत् । अदितेऽनुमन्यस्वेति दक्षिणतः प्राचीनम् । अनुमतेऽनुमन्यस्वेति दक्षिणत उदीचीनम् । सरस्वतेऽनुमन्यस्वेत्युत्तरतः प्राचीनम् । देव सवितः प्रसुवेति समन्ततोऽग्निं परिषिच्य, परिषेचनक्रमेण प्रागुदगग्रैर्दर्भैरग्निं परिस्तीर्य, अग्नेरुत्तरतः प्रागग्रान् दर्भान् संस्तीर्य, दर्व्याज्यस्थाल्यौ प्रोक्षणीपूर्णपात्रे इध्मस्रुवौ च दर्भपङ्क्तिद्वये निक्षिप्य, अधोमुखानि समौ साग्रौ द्वौ दर्भौ प्रादेशमात्रौ पवित्रीकृत्य अद्भिरनुमृज्य प्रोक्षणीपात्रे निधाय, पवित्रान्तर्हिते प्रोक्षणीपात्रे अक्षतसहिता अप अनीय, अग्नेः प्रदक्षिणतो निनीय, मुखसममुद्धृत्य स्वस्य पुरतः स्थाप्य, हस्तयोरङ्गुष्ठकनिष्ठिकाभ्यां उदगग्रे पवित्रे गृहीत्वा प्राङ्निरुत्पूय पात्राण्युत्तानानि कृत्वा सपवित्रेण हस्तेन त्रिः प्रोक्ष्य, इध्मं च विस्रस्य, त्रिः प्रोक्ष्य प्रोक्षणीपात्रस्थपवित्रे पूर्णपात्रे निधाय हस्तयोरङ्गुष्ठकनिष्ठिकाभ्यां उदगग्रे पवित्रे गृहीत्वा प्राङ्निरुत्पूय, अग्नेः प्रदक्षिणतो निनीय मुखसममुद्धृत्य अग्नेरुत्तरतो दर्भानास्तीर्य तेषु निक्षिप्य दर्भैराच्छादयेत् । दक्षिणतस्त्रिभिर्दर्भैर्ब्रह्मासनमास्तीर्य, ओं ब्रह्मणे नमः । इति ब्रह्माणमावाह्य ओं ब्रह्मणे नम इति मन्त्रेणासनार्घ्यपाद्याचमनस्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणाभि---र्ब्रह्माणमभ्यर्च्य, पूर्णपात्रस्थपवित्रे आज्यपात्रे निधाय, अग्नेः पश्चिमतः पवित्रान्तर्हितायामाज्यस्थाल्यामाज्यं निरूप्य, उदीच्यामङ्गारेषु निधाय,

ज्वलितैर्दर्भाग्रैस्सन्दीप्य द्वे दर्भाग्रे प्रच्छिद्य प्रक्षाळ्य, आज्यपात्रे प्रत्यस्य, ज्वलता दर्भेण त्रिरग्निं प्रदक्षिणीकृत्य, तं दर्भमैशान्यां निक्षिपेत्। आज्यमवतार्य अङ्गारान्वह्नौ निक्षिप्य, आज्यमानीय स्वस्य पुरतः स्थाप्य हस्तयोरङ्गुष्ठकनिष्ठिकाभ्यामुदगग्रे गृहीत्वा, आज्यं पश्चात्तिरुत्पूय, पवित्रग्रन्थि विस्रस्य पवित्रमद्भिरभ्युक्ष्य, प्रागग्रे पवित्रे अग्नौ प्रहरति। स्रुवमग्नौ प्रतिप्य, दर्भाग्रैस्स्रुवमूलं घर्षमध्यैस्स्रुवमध्य सर्वतस्स्रुवबिलं सम्मार्ष्टि, पुनः प्रतिप्य प्रोक्ष्य, उत्तरतो निधाय, दर्भानद्भिस्सग्गं्स्पृश्य, अग्नौ प्रहरति। परिधीन्परिदधाति। स्थविष्ठमुत्तरतः। अग्नेर्दक्षिणत अणीयांसं परिधिं पूर्वाग्रं निधाय, अग्नेरुत्तरतो ह्रस्वं परिधिं पूर्वाग्रं निक्षिप्य, उत्तराग्रमग्नेः पश्चिमतो निहितं मध्यमं परिधिमुपस्पृश्य अग्नेः पुरस्ताद्दक्षिणोत्तरक्रमेण प्रागग्रे इतरे द्वे आधारसमिधावादधाति। सव्येन पात्रं स्पृशन् दक्षिणेन हस्तेन परिध्यन्तः परिस्तरणोपरि। आदितेऽन्वमग्गं्स्थाः इति दक्षिणतः प्राचीनम्। अनुमतेऽन्वमग्गं् स्थाः इति दक्षिणत उदीचीनम्। सरस्वतेऽन्वमग्गं्स्थाः इत्युत्तरतः प्राचीनम्। देव सवितः प्रसुवेति समन्ततः प्रागारभ्य प्रदक्षिणं परिषिच्य, इध्ममाज्येनाभ्यज्य। अस्मिन् भगवत्प्रतिष्ठाहोमकर्मणि ब्रह्मन् इध्ममाधास्ये। इति ब्रह्माणं प्रतिब्रूयात्। ओं आधत्स्वेति प्रतिवचनम्। प्रजापतिं मनसा ध्यायन्, तूष्णीं घृताक्ताः पञ्चदशसमिधोऽग्नौ प्रक्षिपेत्। दर्व्या आज्यमादाय। ओं, अग्नये स्वाहा। अग्नय इदं न मम। इत्यग्नेर्दक्षिणभागे जुहुयात्। सोमाय स्वाहा। सोमायेदं न मम। इत्यग्नेरुत्तरभागे जुहुयात्। इन्द्राय स्वाहा। इन्द्रायेदं न मम। प्रजापतये स्वाहा। प्रजापतय इदं न मम। इत्यग्निमध्ये जुहुयात्॥

द्विर्शीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकम्।

वरदं शक्तिपाणिं च बिभ्राणं स्रुक्स्रुवौ तथा ॥
अभीतिदं चर्मधरं वामे चाज्यधरं करे ॥

इत्यग्निं ध्यात्वा। श्रीमते नारायणाय नम इति भगवन्तम्। ओं श्रियै नम इति महालक्ष्मीम्। वह्नावावाहनार्घ्यपाद्याचमनस्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणादिभिस्सम्पूज्य, अग्निमध्ये ऋतुस्नातया लक्ष्म्या सह भगवतस्संयोगं विचिन्त्य आहितगर्भां लक्ष्मीं विचिन्त्य तस्या अग्नेरुत्पत्तिं विचिन्तयेत्। अनेन विधिना वैष्णवाग्निस्सम्पद्यते। अनन्तरमुत्तरत आरभ्य कुण्डत्रयं मूलमन्त्रेण वीक्ष्य। ओं अस्त्राय फडिति प्रोक्ष्य गन्धपुष्पैरलङ्कृत्य तत्र तण्डुलान्विकीर्य पश्चिमत आरभ्योत्तरपर्यन्तं स्रुवेण दर्भमूलेन वा तिस्रस्तिस्रो रेखा लिखित्वा तत्र दर्भं न्यस्य तृणमद्भिरभ्युक्ष्य तृणं कुण्डत्रये निक्षिप्य, ओं भूर्भुवस्सुवरिति मन्त्रेण प्रधानकुण्डसंस्कृतमग्निं कुण्डत्रये प्रतिष्ठाप्य याज्ञिकैरिन्धनैः प्रज्वाल्य। अग्नये नमः। जातवेदसे नमः। सहोजसे नमः। अजिराप्रभवे नमः। वैश्वानराय नमः। नर्यापसे नमः। पङ्क्तिराधसे नमः। विसर्पिणे नमः। श्रीयज्ञपुरुषाय नमः। इत्यादिमन्त्रैः प्रागाद्यष्टदिक्षु कुण्डत्रये अक्षतान् निक्षिप्य। आत्मने नम इति स्वमूर्ध्नि। सर्वेभ्यश्श्रीवैष्णवेभ्यो नम इति श्रीवैष्णवोपरि अक्षतान्निक्षिपेत्। अदितेऽनुमन्यस्वेति दक्षिणतः प्राचीनम्। अनुमतेऽनुमन्यस्वेति दक्षिणत उदीचीनम्। सरस्वतेऽनुमन्यस्वेत्युत्तरतः प्राचीनम्। देव सवितः प्रसुव इति समन्ततोऽग्निकुण्डत्रये परिषिच्य परिषेचनक्रमेण प्रागुदगग्रैर्दर्भैरग्निकुण्डत्रये पारिस्तीर्य ॥

पुरुषसूक्तेन होमक्रमः.

ततश्च पुरुषसूक्तेन होमं कुर्यात्। ओं सहस्रशीर्षा पुरुषः। सहस्राक्षस्सहस्रपात्। स भूमिं विश्वतो वृत्वा। अत्यतिष्ठद्दशाङ्गुलम्।

पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम ॥ १ ॥ एवं पूर्वोक्तक्रमेण पञ्चदशहोमान् हुत्वा । वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तु पारे । सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाभिवदन् यदास्ते । धाता पुरस्ताद्व्यमुदाजहार । शक्रः प्रविद्वान् प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते । पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम । यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानस्सचन्ते । यत्र पूर्वे साध्यास्सन्ति देवाः । पुरुषाय नारायणाय स्वाहा । पु—न मम ॥ १७ ॥ अद्भ्यस्संभूतः पृथिव्यै रसाच्च । विश्वकर्मणस्समवर्तताधि । तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे । पुरु—स्वाहा । पुरु—न मम । वेदाहमेतं पुरुषं महान्तं । आदित्यवर्णं तमसः परस्तात् । तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय । पुरु—स्वाहा । पुरु—न मम । प्रजापतिश्चरति गर्भे अन्तः । अजायमानो बहुधा विजायते । तस्य धीराः परिजानन्ति योनिम् । मरीचीनां पदमिच्छन्ति वेदसः । पुरु—स्वाहा । पुरु—न मम । यो देवेभ्य आतपति । यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये । पुरु—स्वाहा । पुरु—ना—न मम । रुचं ब्राह्मं जनयन्तः । देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन् वशे । पुरु—स्वाहा । पुरु—ना—न मम । ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् । अश्विनौ व्यात्तम् । इष्टं मनिषाण । अमुं मनिषाण । सर्वं मनिषाण । पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम ॥ २३ ॥ ओं सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम् । विश्वं नारायणं देवमक्षरं

परमं प्रभुम् । पुरुषाय नारायणाय स्वहा । पुरु—न मम ॥ २४ ॥ विश्वतः परमं नित्यं विश्वं नारायणगं् हरिम् । विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति । पु—हा । पु—म ॥ २५ ॥ पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम् । पु—हा । पु—म ॥ २६ ॥ नारायणं महाज्ञेयं विश्वात्मानं परायणम् । नारायणपरं ब्रह्म तत्वं नारायणः परः । पु—हा । पू—म ॥ २७ ॥ नारायणपरो ज्योतिरात्मा नारायणः परः । पू—हा । पू—म ॥ २८ ॥ यच्च किञ्चिज्जगत्यास्मिन् दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणस्स्थितः । पू—हा । पु—म ॥ २९ ॥ अनन्तमव्ययं कविगं् समुद्रेन्तं विश्वशम्भुवम् ॥ पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम् । पु.—हा ॥ पु—म ॥ ३० ॥ अधो निष्ट्या वितस्त्यान्तु नाभ्यामुपरि तिष्ठति । हृदयं तद्विजानीयाद्विश्वस्यायतनं महत् । पु—हा । पु— म ॥ ३१ ॥ संततगं् सिराभिस्तुलंबत्या कोशसन्निभम् । तस्यान्ते सुषिरगं् सूक्ष्मं तस्मिन्त्सर्वं प्रतिष्ठितम् । पु—हा । पु—म ॥ ३२ ॥ तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतो मुखः । सोग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः । पु—हा । पु—म ॥ ३३ ॥ सन्तापयति स्वं देहमापादतलमस्तकम् । तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः । पूरु—हा । पु—म ॥ नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा । नीवारशूकवत्तन्वी पीताभा स्यात्तनूपमा । पुरु—हा । पु—म । तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः । स ब्रह्मा स शिवस्सेन्द्रस्सोक्षरः परमस्स्वराट् । पु—हा । पु—म । ऋतगं् सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गळम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः । ओं नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् । पुरु—हा । पुरु—न मम ॥ २६ ॥

विष्णुसूक्तेन होमक्रमः.

ओं विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाग्ंसि यो अस्कभा यदुत्तरग्ं सधस्थं विचक्रमाणस्त्रेधोरुगा यो विष्णो-रराटमसि विष्णोः पृष्ठमसि विष्णोश्ऱ्यप्त्रेस्स्थो विष्णोस्यूरसि विष्णो-र्ध्रुवमसि वैष्णवमसि विष्णवे त्वा स्वाहा । विष्णव इदन्न मम । तदस्य प्रियमभिपाथो अश्याम् । नरो यत्र देव यवो मदन्ति । उरुक्रमस्य स हि बन्धुरित्था । विष्णोः पदे परमे मध्व उत्सस्स्वाहा । वि—म । प्रतद्विष्णुस्तवते वीर्याय । मृगो न भीमः कुचरो गिरिष्ठाः यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा स्वाहा । विष्णव इदं न मम । परो मात्रया तनुवा वृधा न । न ते महित्वमन्वाश्ऱ्नुवन्ति । उभे ते विद्मरजसी पृथिव्या । विष्णो देवत्वं परमस्य वित्से स्वाहा । वि—म । विचक्रमे पृथिवीमेष एताम् । क्षेत्राय विष्णुर्मनुषे दशस्यन् । ध्रुवासो अस्य कीरयोजनासः । उरुक्षितिग्ं सुजनिमाचकार स्वाहा । वि—म । त्रिर्देवः पृथिवीमेष एताम् । विचक्रमे शतर्चसं महित्वा । प्रविष्णुरस्तु तवसस्तवीयान् । त्वेषग्ं ह्यस्य स्थविरस्य नाम स्वाहा । विष्णव—म । अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे । पृथि-व्यास्सप्तधामभिस्स्वाहा । वि—म । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपाग्ं सुरे स्वाहा । वि—म । त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः । ततो धर्माणि धारयन् स्वाहा । वि—म । विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यस्सखास्स्वाहा । वि—म । तद्विष्णोः परमं पदग्ं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रा सो विपन्यवो जागृवां सस्समिन्धते । विष्णोर्यत्परमं पदं स्वाहा । वि—म ॥

वरुणसूक्तहोमः.

ओम् उदुत्तमं वरुणपाशमस्मदवाधमम् विमध्यमग्गं् श्रधाय। अथावयमादित्यव्रते तवानागसो अदितये स्याम स्वाहा। वरुणायेदं न मम। अवते हेडो वरुण नमोभिरवयज्ञेभि रीमहे हविर्भिः क्षयन्नस्मभ्यमसुरप्रचेतो राजन्नेनागं् सिशिश्रथः कृतानि स्वाहा। वरुणा—न मम। अस्तभ्नाद्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्या आसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानि वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पयो अघ्नियासु हृत्सु स्वाहा। वरु—न मम। इति मन्त्रेण पूर्वकुण्डे आहुतित्रयं दद्यात्। अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे। पृथिव्यास्तस्रधामभिस्स्वाहा। विष्णव इदं न मम। त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः। ततो धर्माणि धारयन् स्वाऽहा। विष्णव इदं न मम। इति मन्त्रत्रयेण दक्षिणकुण्डे आहुतित्रयं दद्यात्। विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजागं्सि यो अस्कभायदुत्तरगं् सधस्थं विचक्रमाणस्त्रे-धोरुगायो विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोश्नप्त्रेस्थो विष्णो-स्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा स्वाहा। विष्णव—म। तदस्य प्रियमभिपाथो अश्याम्। नरो यत्र देव यवो मदन्ति। उरुक्रमस्य स हि बन्धुरित्था। विष्णोःपदे परमे मध्व उत्स स्वाहा। विष्णव—न मम। प्रतद्विष्णुस्तवते वीर्याय। मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेषु। अधिक्षियन्ति भुवनानि विश्वा स्वाहा। वि—म। इति मन्त्रत्रयेण पश्चिमकुण्डे आहुतित्रयं दद्यात्। परो मात्रया तनुवा वृधान। न ते महित्वमन्वश्नुवन्ति। उभे ते विद्मरजसी पृथिव्या। विष्णो देव त्वं परमस्य वित्से स्वाहा। वि—म। विचक्रमे पृथिवीमेष एताम्। क्षेत्राय विष्णुर्मनुषे दशस्यन्।

ध्रुवासो अस्य कीरयोजनासः । उरुक्षितिगं सुजनिमाचकार स्वाहा । वि–म । त्रिर्देवः पृथिवीमेष एताम् । विचक्रमे शतर्चसं महित्वा । प्रविष्णुरस्तु तवसस्तवीयान् । त्वेषगं ह्यस्य स्थविरस्य नाम स्वाहा । वि–म । इति मन्त्रेणोत्तरकुण्डे आहुतित्रयं दद्यात् । ततश्च श्री-सूसूक्ताभ्यां चतुर्ष्वपि कुण्डेषु होमं कुर्युः ॥

श्रीसूक्तेन होमः.

ओम् हिरण्यवर्णां हरिणीम् सुवर्णरजतस्रजाम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह स्वाहा । श्रिया इदं न मम । तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् स्वाहा । श्रिया इदं न मम । अश्वपूर्वां रथमध्यां हस्तिनाथप्रबोधिनीम् । श्रियं देवीमुपह्वये श्रीर्मा देवी जुषतां स्वाहा । श्रिया इदं न मम । कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् । पद्मे स्थितां पद्मवर्णां त्वामिहोपह्वये श्रियम् स्वाहा । श्रिया–म । चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदा-राम् । तां पद्मनेमीगं शरणमहं प्रपद्ये स्वाहा । श्रिया–म । अलक्ष्मीर्मे नश्यतां त्वां वृणे स्वाहा । श्रिया–म । आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः । तस्य फलानि तपसा नुदन्तु मायान्तरा-याश्च बाह्या अलक्ष्मीस्स्वाहा । श्रिया–म । उपैतु मां देवसखः कीर्तिश्च मणिना सह । प्रादुर्भूतोऽस्मि राष्ट्रेस्मिन् कीर्तिमृद्धिं ददातु मे स्वाहा । श्रिया–म । क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् । अभूतिम-समृद्धिञ्च सर्वान्निर्णुद मे गृहात् स्वाहा । श्री–म । गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीगं सर्वभूतानां त्वामिहोपह्वये श्रियम् स्वाहा । श्रि–म । मनसः काममाकूतिं वाचस्सत्यमशीमहि । पशूनागं

रूपमन्नस्य मयि श्रीश्रयतां यशस्स्वाहा । श्रि–म । कर्दमेन प्रजा भूता मयि सम्भव कर्दमा । श्रियं वासय मे कुले मातरं पद्ममालिनीम् स्वाहा । श्रि–म । आपस्सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे । निचदेवीं मातरं श्रियं वासय मे कुले स्वाहा । श्रि–म । आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् । सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो ममावह स्वाहा । श्रि–म । आर्द्रां पु(य)ष्करिणीं पु(य)ष्टिं पिङ्गळां पद्ममालिनीम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह स्वाहा । श्रि–म । तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं प्रभूतं गावो-दास्योश्वान् विन्देयं पुरुषानहम् स्वाहा । श्रिया—न मम ॥

फलश्रुतिः.

यश्शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
श्रियः पञ्चदशर्चञ्च श्रीकामस्सततं जपेत् ॥
पद्मप्रिये पद्मनि पद्महस्ते पद्मालये पद्मदळायताक्षि ।
विश्वप्रिये विष्णुमनोऽनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ।
ओं महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि । तन्नो लक्ष्मीः प्रचोदयात्स्वाहा । श्रिया इदन्न मम ॥

भूसूक्तहोमः.

ओं भूमिर्भूम्ना द्यौर्वरिणान्तरिक्षं महित्वा । उपस्थेते देव्य-दितेऽग्निमन्नादमन्नाद्यायादधे । स्वाहा । भूम्या इदन्न मम । आयं गौः पृश्निरक्रमीदसनन्मातरं पुनः । पितरञ्च प्रयन्त्सुवस्स्वाहा । भूम्या इदन्न मम । त्रिगं् शद्धाम विराजति वाक्पतङ्गाय शिश्रिये । प्रत्यस्य वह द्युभिः स्वाहा । भू–म ॥ अस्य प्राणादपानत्यन्तश्चरति रोचना । व्यख्य-न्महिषस्सुवस्स्वाहा । भू–न मम । यत्वा क्रुद्धः परो वपमन्युना यदवर्त्या ।

सुकल्पमग्ने तत्तवपुनस्त्वोद्दीपयामसि स्वाहा । भू—म । यत्ते मन्युपरोप्तस्य पृथिवीमनुदध्वसे । आदित्या विश्वे तद्देवा वसवश्च समाभरन् स्वाहा । भूम्या—म । मेदिनी देवी वसुन्धरा स्याद्वसुधा देवी वासवी । ब्रह्मवर्चसः पितृणाग्ं श्रोत्रं चक्षुर्मनः । देवी हिरण्यगर्भिणी देवी प्रसूवरी । रसने सत्यायने सीद स्वाहा । भू—म । समुद्रवती सावित्री ह नो देवीमह्यङ्गी । महीधरणी महोव्यधिष्ठा स्वाहा । भू—म । शृङ्गे शृङ्गे यज्ञे यज्ञे विभीषिणी । इन्द्रपत्नी व्यापिनी सुरसरिदिह । वायुमती जलशयिनी स्वाहा । भू—म । सयं धाराजा सत्यन्धोपरि मेदिनी । श्वोपरिधत्तं गाय-स्वाहा । भू—म । विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम् । लक्ष्मी-प्रियसखीं देवीं नमाम्यच्युतवल्लभां स्वाहा । भू—म । ओं धनुर्धरायै विद्महे सर्वसिद्धयै च धीमहि । तन्नो धरा प्रचोदयात्स्वाहा । भूम्या इदं न मम ॥

ओं अग्निमीळे पुरोहितम् । यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमं स्वाहा । ऋग्वेदायेदं न मम । अनेनानुवाकेन पूर्वकुण्डे अष्टोत्तरशताहुतीर्जुहुयात् । इषेत्वोर्जे त्वा वायवस्थोपायवस्थ देवो वस्सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे स्वाहा । युजुर्वेदायेदं न मम । अनेन दक्षिणकुण्डे अष्टोत्तरशताहुतीर्जुहुयात् । अग्न आयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि स्वाहा । सामवेदायेदं न मम । अनेन पश्चिमकुण्डे अष्टोत्तरशताहुतीर्जुहुयात् । शं नो देवीरभिष्टये । आपो भवन्तु पीतये । शं योरभिस्रवन्तु नस्स्वाहा । अथर्वणवेदायेदं न मम । अनेनोत्तरकुण्डे अष्टोत्तरशताहुतीर्जुहुयात् । हिरण्यगर्भस्समवर्त-ताग्रे भूतस्य जातः पतिरेक आसीत् । सदाधारपृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम स्वाहा । हिरण्यगर्भायेदं न मम । अनेन पूर्णकुण्डे

अष्टोत्तरशताहुतीर्जुहुयात्। आभिर्गीर्भिर्यदतो न ऊनमाप्याय हरि वो वर्धमानः। यदा स्तोतृभ्यो महिगोत्रा रुजासि भूयिष्ठभाजो अथ ते स्याम स्वाहा। इन्द्राय हरिवते वर्धमानायेदं न मम। इति मन्त्रेण तिलैर्दक्षिणकुण्डे अष्टोत्तरशताहुतीर्जुहुयात्। नारायणं महाज्ञेयं विश्वात्मानं परायणम्। नारायणपरं ब्रह्म तत्त्वं नारायणः परः। नारायणपरो (ध्याता ध्यानं) ज्योतिरात्मा नारायणः परस्स्वाहा। नारायणायेदं न ममेति मन्त्रेण पश्चिमकुण्डे व्रीहिभिरष्टोत्तरशताहुतीर्जुहुयात्। उत्तिष्ठब्रह्मणस्पते। देव यन्तस्त्वेमहे। उपप्रयन्तु मरुतस्सुदानवः। इन्द्र प्राशूर्भवा सचा स्वाहा। ब्रह्मण इदं न मम। अनेनोत्तरकुण्डे समिद्भिरष्टोत्तरशताहुतीर्जुहुयात्। ततो मूलमन्त्रेण सर्पिषा ओं नमो भगवते वासुदेवाय नम इति मन्त्रेण पश्चिमकुण्डे अष्टोत्तरसहस्राहुतीर्जुहुयात्। ओं केशवाय स्वाहा। केशवायेदं न मम। ओं नारायणाय स्वाहा। नारायणायेदं न मम। ओं माधवाय स्वाहा। माधवायेदं न मम। ओं गोविन्दाय स्वाहा। गोविन्दायेदं न मम। ओं विष्णवे स्वाहा। विष्णव इदं न मम। ओं मधुसूदनाय स्वाहा। मधुसूदनायेदं न मम। ओं त्रिविक्रमाय स्वाहा। त्रिविक्रमायेदं न मम। ओं वामनाय स्वाहा। वामनायेदं न मम। ओं श्रीधराय स्वाहा। श्रीधरायेदं न मम। ओं हृषीकेशाय स्वाहा। हृषीकेशायेदं न मम। ओं पद्मनाभाय स्वाहा। पद्मनाभायेदं न मम। ओं दामोदराय स्वाहा। दमोदरायेदं न मम। ओं वासुदेवाय स्वाहा। वासुदेवायेदं न मम। ओं सङ्कर्षणाय स्वाहा। सङ्कर्षणायेदं न मम। ओं प्रद्युम्नाय स्वाहा। प्रद्युम्नायेदं न मम। ओं अनिरुद्धाय स्वाहा। अनिरुद्धायेदं न मम।—एभिर्मन्त्रैश्चतुर्ष्वपि कुण्डेषु होमं कुर्यात्॥

ततो विष्णुनामसहस्रेण चतुर्ष्वपि कुण्डेषु होमं कुर्यात्। ओं विश्वस्मै स्वाहा। विश्वस्मा इदं न मम। ओं विष्णवे स्वाहा। विष्णव इदं न मम। . . . . . ओं सर्वप्रहरणायुधाय स्वाहा। सर्वप्रहरणायुधायेदं न मम। इत्येवं सहस्रनाम होतव्यम्॥

ततो नित्यमुक्तनामभिश्चतुर्ष्वपि कुण्डेषु होमं कुर्यात्। ओं आधारशक्त्यै स्वाहा। आधारशक्त्या इदं न मम। ओं अखिलजगदाधाराय कूर्मरूपिणे नारायणाय स्वाहा। अखिलजगदाधाराय कूर्मरूपिणे नारायणायेदं न मम। ओं अनन्ताय नागराजाय स्वाहा। अनन्ताय नागराजायेदं न मम। ओं भूं भूम्यै स्वाहा। भूम्या इदं न मम। ओं श्रीवैकुण्ठाय दिव्यलोकाय स्वाहा। श्रीवैकुण्ठाय दिव्यलोकायेदं न मम। ओं श्रीवैकुण्ठाय दिव्यजनपदाय स्वाहा। श्रीवैकुण्ठाय दिव्यजनपदायेदं न मम। ओं श्रीवैकुण्ठाय दिव्यनगराय स्वाहा। श्रीवैकुण्ठाय दिव्यनगरायेदं न मम। ओं श्रीवैकुण्ठाय दिव्यविमानाय स्वाहा। श्रीवैकुण्ठाय दिव्यविमानायेदं न मम। ओं आनन्दमयाय दिव्यमण्टपरत्नाय स्वाहा। दिव्यमण्टपरत्नायेदं न मम। ओं आस्तरणरूपिणे अनन्ताय नागराजाय स्वाहा। अनन्ताय नागराजायेदं न मम। ओं धर्माय पीठपादाय स्वाहा। धर्माय पीठपादायेदं न मम। ओं ज्ञानाय पीठपादाय स्वाहा। ज्ञानाय पीठपादायेदं न मम। ओं वैराग्याय पीठपादाय स्वाहा। वैराग्याय पीठपादायेदं न मम। ओं ऐश्वर्याय पीठपादाय स्वाहा। ऐश्वर्याय पीठपादायेदं न मम। ओं ऋग्वेदाय पठिवाहकाय स्वाहा। ऋग्वेदाय पीठवाहकायेदं न मम। ओं यजुर्वेदाय पीठवाहकाय स्वाहा। यजुर्वेदाय पीठवाहकायेदं न मम। ओं

सामवेदाय पीठवाहकाय स्वाहा । सामवेदाय पीठवाहकायेदं न मम । ओं अथर्वणवेदाय पीठवाहकाय स्वाहा । अथर्वणवेदाय पीठवाहकायेदं न मम । ओं धर्माय पीठगात्राय स्वाहा । धर्माय पीठगात्रायेदं न मम । ओं अधर्माय पीठगात्राय स्वाहा । अधर्माय पीठगात्रायेदं न मम । ओं अज्ञानाय पीठगात्राय स्वाहा । अज्ञानाय पीठगात्रायेदं न मम । ओं अवैराग्याय पीठगात्राय स्वाहा । अवैराग्याय पीठगात्रायेदं न मम । ओं अनैश्वर्याय पीठगात्राय स्वाहा । अनैश्वर्याय पीठगात्रायेदं न मम । ओं एभिः प्ररिच्छिन्नतनवे सदसदात्मकाय स्वाहा । सदसदात्मकायेदं न मम । ओं पीठभूताय नागराजाय स्वहा । पीठभूताय नागराजायेदं न मम । ओं पीठस्योपरि अष्टदलपद्माय स्वाहा । अष्टदलपद्मायेदं न मम । ओं वह्निमण्डलाय स्वाहा । वह्निमण्डलायेदं न मम । ओं सोममण्डलाय स्वाहा । सोममण्डलायेदं न मम । ओं सूर्यमण्डलाय स्वाहा । सूर्यमण्डलायेदं न मम । ओं विमलायै चामरहस्तायै स्वाहा । विमलायै चामरहस्ताया इदन्न मम । ओं उत्कर्षिण्यै चामरहस्तायै स्वाहा । उत्कर्षिण्यै चामरहस्ताया इदन्न मम । ओं ज्ञानायै चामरहस्तायै स्वाहा । ज्ञानाया इदन्न मम । ओं क्रियायै चामरहस्तायै स्वाहा । क्रियाया इदं न मम । ओं प्रह्वयै चामरहस्तायै स्वाहा । प्रह्वया इदं न मम । ओं सत्यायै चामरहस्तायै स्वाहा । सत्याया इदं न मम । ओं ईशानायै चामरहस्तायै स्वाहा । ईशानाया इदं न मम । ओं योगायै चामरहस्तायै स्वाहा । योगाया इदं न मम । ओं अनुग्रहायै चामरहस्तायै स्वाहा । अनुग्रहाया इदं न मम । ओं जगत्प्रकृतये योगपीठवाहकाय स्वाहा । जगत्प्रकृतय इदं न मम । ओं सहस्रशीर्षायानन्ताय नागराजाय स्वाहा । अनन्ताय

नागराजायेदं न मम । ओं पुरतः पादपीठाय स्वाहा । पादपीठायेदं न मम । ओं भगवत्पादुकाभ्यां स्वाहा । भगवत्पादुकाभ्यामिदं न मम । ओं अस्मद्गुरुभ्यस्स्वाहा । अस्मद्गुरुभ्य इदं न मम । अस्मत्परमगुरुभ्यस्स्वाहा । अस्मत्परमगुरुभ्य इदं न मम । ओं अस्मत्सर्वगुरुभ्यस्स्वाहा । सर्वगुरुभ्य इदं न मम । श्रीमते वेदान्तगुरवे स्वाहा । वेदान्तगुरव इदं न मम । ओं श्रीमते रामानुजाय स्वाहा । रामानुजायेदं न मम । ओं श्रीपूर्णमिश्राय स्वाहा । पूर्णमिश्रायेदं न मम । ओं श्रीमद्यामुनमुनये स्वाहा । श्रीमद्यामुनमुनय इदं न मम । ओं श्रीराममिश्राय स्वाहा । राममिश्रायेदं न मम । ओं श्रीपुण्डरीकाक्षाय स्वाहा । श्रीपुण्डरीकाक्षायेदं न मम । ओं श्रीमन्नाथमुनये स्वाहा । नाथमुनय इदं न मम । ओं श्रीशठकोपाय स्वाहा । शठकोपाय इदं न मम । ओं श्रीमते विष्वक्सेनाय स्वाहा । विष्वक्सेनायेदं न मम । ओं पद्मायै स्वाहा । पद्माया इदं न मम । ओं सुदर्शनाय हेतिराजाय स्वाहा । सुदर्शनाय हेतिराजायेदं न मम । ओं पाञ्चजन्याय शङ्खाधिपतये स्वाहा । पाञ्चजन्याय शङ्खाधिपतय इदं न मम । ओं कौमोदक्यै गदाधिपतये स्वाहा । कौमोदक्यै गदाधिपतय इदं न मम । ओं नन्दकाय खड्गाधिपतये स्वाहा । नन्दकाय खड्गाधिपतय इदं न मम । ओं शार्ङ्गाय सशराय चापाधिपतये स्वाहा । शार्ङ्गाय चापाधिपतय इदं न मम । ओं श्रीवत्साय श्रीनिवासाय स्वाहा । श्रीवत्साय श्रीनिवासायेदं न मम । ओं श्रीकौस्तुभाय रत्नाधिपतये स्वाहा । कौस्तुभाय रत्नाधिपतय इदं न मम । ओं वैजयन्त्यै वनमालायै स्वाहा । वैजयन्त्यै वनमालाया इदं न मम । ओं श्रियै स्वाहा । श्रिया इदं न मम । ओं भूम्यै स्वाहा । भूम्या इदं न मम । ओं नीळायै स्वाहा । नीळाया इदं न मम । ओं ह्रां पुष्ट्यै स्वाहा । पुष्ट्या इदं न मम । ओं

इं सरस्वत्यै स्वाहा। सरस्वत्या इदं न मम। ओं द्रां निद्रायै स्वाहा। निद्राया इदं न मम। ओं क्लीं कान्त्यै स्वाहा। कान्त्या इदं न मम। ओं कं पृथिव्यै स्वाहा। पृथिव्या इदं न मम। ओं गं गरुडाय स्वाहा। गरुडायेदं न मम। ओं किरीटाय मकुटाधिपतये स्वाहा। किरीटायेदं न मम। ओं किरीटमालायै आपीडात्मने स्वाहा। आपीडात्मन इदं न मम। ओं दक्षिणकुण्डलाय मकरात्मने स्वाहा। दक्षिणकुण्डलायेदं न मम। ओं वामकुण्डलाय मकरात्मने स्वाहा। वामकुण्डलायेदं न मम। ओं कण्ठिकाभरणाय स्वाहा। कण्ठिकाभरणायेदं न मम। ओं श्रीमत्तुलस्यै स्वाहा। तुलस्या इदं न मम। ओं हाराय सर्वाभरणाधिपतये स्वाहा। हारायेदं न मम। ओं काञ्चीगुणोज्ज्वलाय दिव्यपीताम्बराय स्वाहा। पीताम्बरायेदं न मम। ओं सर्वेभ्यो भगवद्भूषणेभ्यस्स्वाहा। भगवद्भूषणेभ्य इदं न मम। ओं सर्वेभ्यो भगवद्दिव्यायुधेभ्यस्स्वाहा। भगवद्दिव्यायुधेभ्य इदं न मम। ओं सर्वाभ्यो भगवत्पादसंवाहिनीभ्यस्स्वाहा। भगवत्पाद संवाहिनीभ्य इदं न मम। ओं सर्वेभ्यो भगवत्परिकरेभ्यस्स्वाहा। भगवत्परिकरेभ्य इदं न मम। ओं अनन्ताय नागराजाय स्वाहा। अनन्ताय नागराजायेदं न मम। ओं विष्वक्सेनाय स्वाहा। विष्वक्सेनायेदं न मम। ओं सूत्रवत्यै स्वाहा। सूत्रवत्या इदं न मम। ओं जयत्सेनाय स्वाहा। जयत्सेनायेदं न मम। ओं गं गजाननाय स्वाहा। गजाननायेदं न मम। ओं हं हयवक्त्राय स्वाहा। हयवक्त्रायेदं न मम। ओं कं कालप्रकृतिसंज्ञाय स्वाहा। कालप्रकृतिसंज्ञायेदं न मम। ओं सर्वेभ्यो विष्वक्सेनपरिकरेभ्यस्स्वाहा। विष्वक्सेनपरिकरेभ्य इदं न मम। ओं चण्डाय द्वारपालाय स्वाहा। चण्डाय द्वारपालायेदं न मम। ओं प्रचण्डाय द्वारपालाय स्वाहा। प्रचण्डाय द्वारपालायेदं न मम। ओं

भद्राय द्वारपालाय स्वाहा। भद्राय द्वारपालायेदं न मम। ओं सुभद्राय द्वारपालाय स्वाहा। सुभद्राय द्वारपालायेदं न मम। ओं जयाय द्वारपालाय स्वाहा। जयाय द्वारपालायेदं न मम। ओं विजयाय द्वारपालाय स्वाहा। विजयाय द्वारपालायेदं न मम। ओं धात्रे द्वारपालाय स्वाहा। धात्रे द्वारपालायेदं न मम। ओं विधात्रे द्वारपालाय स्वाहा। विधात्रे द्वारयालायेदं न मम। ओं कुमुदाय गणाधिपतये सायुधसवाहनसपरिवारप्रहरणाय स्वाहा। कुमुदायेदं न मम। ओं कुमुदाक्षाय गणाधिपतये सायुधसवाहनसपरिवारप्रहरणाय स्वाहा। कुमुदाक्षायेदं न मम। ओं पुण्डरीकाय गणाधिपतये सायुधसवाहनसपरिवारप्रहरणाय स्वाहा। पुण्डरीकायेदं न मम। ओं वामनाय गणाधिपतये सायुधसवाहनसपरिवारप्रहरणाय स्वाहा। वामनायेदं न मम। ओं शङ्कुकर्णाय गणाधिपतये सायुधसवाहनसपरिवारप्रहरणाय स्वाहा। शङ्कुकर्णायेदं न मम। ओं सर्वनेत्राय गणाधिपतये सायुधसवाहनसपरिवारप्रहरणाय स्वाहा। सर्वनेत्रायेदं न मम। ओं सुमुखाय गणाधिपतये · · · स्वाहा। ओं सुमुखायेदं न मम। ओं सुप्रतिष्ठिताय गणाधिपतये सायुध · · · स्वाहा। सुप्रतिष्ठितायेदं न मम। ओं सर्वेभ्यो भगवद्गणाधिपतिभ्यस्स्वाहा। भगवद्गणाधिपतिभ्य इदं न मम। ओं मुक्तेभ्यस्स्वाहा। मुक्तेभ्य इदन्न मम। ओं समस्तपरिवाराय श्रीमते नारायणाय स्वाहा। नारायणायेदं न मम। श्रीमते रामानुजाय स्वाहा। रामानुजायेदं न मम। ओं श्रीमते वेदान्तगुरवे स्वाहा। वेदान्तगुरव इदं न मम। एवं रात्रौ होमं कृत्वा जागरणं कुर्यात् ॥

इति धान्याधिवासस्सम्पूर्णः.

अनन्तरं रजन्यां व्युष्टायामाचार्यो ऋत्विजश्च सर्वे कृतस्नाना धृतोर्ध्वपुण्ड्रा नवाम्बरधारिणो नवभूषणालङ्कृताः कृतनित्यक्रिया ।।गशालामागच्छेयुः ॥

अथ प्रतिष्ठातृतीयवासरक्रमः.

तत आचार्यः " ओं उत्तिष्ठ ब्रह्मणस्पते । देवयन्तस्त्वेमहे । प्रयन्तु मरुतस्सुदानवः इन्द्रप्राशूर्भवासचा । प्रैतु ब्रह्मणस्पतिः । प्रदेव्येतु सूनृता । अच्छावीरं नर्यं पङ्क्तिराधसम् । देवा यज्ञं नयन्तु नः । देवी द्यावापृथिवी अनुमेमगं् साथां । ऋध्या समद्य । मखस्य शिरः । मखाय त्वा । मखस्य त्वा शीर्ष्णे । देवीर्वभ्रीरस्य भूतस्य प्रथमजा ऋतावरीः । ऋध्या समद्य । मखस्य शिरः । मखाय त्वा । मखस्य त्वा शीर्ष्णे । इन्द्रस्योजोसि । ऋध्या समद्य । मखस्य शिरः । मखाय त्वा । मखस्य त्वा शीर्ष्णे । अग्निजा असि प्रजापतेरेतः । ऋध्या समद्य । मखस्य शिरः । मखाय त्वा । मखस्य त्वा शीर्ष्णे । आयुर्धेहि प्राणं धेहि । अपानं धेहि व्यानं धेहि । चक्षुर्धेहि श्रोत्रं धेहि । मनो धेहि वाचं धेहि । आत्मानं धेहि प्रतिष्ठां देहि । मां धेहि मयि धेहि । मधु त्वा मधुलाकरोतु । मखस्य शिरोसि । यज्ञस्य पदेस्थः । गायत्रेण त्वा छन्दसा करोमि । त्रैष्टुभेन त्वा छन्दसा करोमि । जागतेन त्वा छन्दसा करोमि । मखस्य रास्नासि । अदितिस्ते बिलं गृह्णातु पाङ्क्तेन छन्दसा । सूर्यस्य हरसाश्राय । मखोसि । इति मन्त्रेण भगवन्तमुत्थाप्य प्रधानकुण्डस्योत्तरपार्श्वे नवीनपीठे निवेशयेत् । श्रीमते नारायणाय नमः इति मन्त्रेण भगवते ओं श्रियै नम इति मन्त्रेण महालक्ष्म्यै अर्घ्यपाद्याचामस्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यमधुपर्कनीराजनानि दद्यात् ॥

अथाङ्गहोमः.

तत आज्येन सूर्योदयात्प्रागङ्गहोमं कुर्यात् । आहुत्यन्ते प्रतिमाया अवयवेषु न्यसेत् । ओं मकाराय जीवात्मकाय स्फटिकाकाराय स्वाहा । इति हुत्वा ओं मं नम इति त्यागं कृत्वा शिरसि न्यसेत् । ओं भकाराय सितवर्णाय प्रकृत्यात्मने नमस्स्वाहा । इति हुत्वा भं नम इति त्यागं कृत्वा शिरसि न्यसेत् । ओं बकाराय बुद्धितत्वात्मकाय स्फटिकाकारायस्वाहा । इति हुत्वाबंनम इति त्यागंकृत्वा हृदिन्यसेत् । ओं फकाराय पाटलवर्णाय अहङ्कारात्मने स्वाहा । इति हुत्वा फं नम इति त्यागं कृत्वा हृदिन्यसेत् ॥ ओं पकाराय सितवर्णाय मन आत्मने स्वाहा । इति हुत्वा ओं पं नम इति त्यागं कृत्वा हृदि न्यसेत् । ओं नकाराय शुक्लवर्णाय शब्दतन्मात्रात्मने स्वाहा । इति हुत्वा । ओं नं नम इति त्यागं कृत्वा श्रोत्रयोर्न्यसेत् । ओं धकाराय लोहितवर्णाय स्पर्शतन्मात्रात्मने स्वाहा । इति हुत्वा धं नम इति त्यागं कृत्वा त्वचि न्यसेत् । ओं दकाराय कर्बुरवर्णाय रूपतन्मात्रात्मने स्वाहा । इति हुत्वा दं नम इति त्यागं कृत्वा दृशोर्न्यसेत् । ओं थकाराय पाण्डुरवर्णाय रसतन्मात्रात्मने स्वाहा । इति हुत्वा । थं नम इति त्यागं कृत्वा तालुनि न्यसेत् । ओं तकाराय सितवर्णाय गन्धतन्मात्रात्मने स्वाहेति हुत्वा तं नम इति त्यागं कृत्वा नासिकायाम् । ओं णकाराय पाटलवर्णाय श्रोत्रात्मने स्वाहा । इति हुत्वा णं नम इति त्यागं कृत्वा कर्णयोर्न्यसेत् । ओं ढकाराय हेमवर्णाय त्वगात्मने स्वाहेति हुत्वा ओं ढं नम इति त्यागं कृत्वा त्वचि न्यसेत् । ओं डकाराय कृष्णवर्णाय नेत्रात्मने नमस्स्वाहेति हुत्वा । ओं डं नम इति त्यागं कृत्वा नेत्रयोः । ओं ठकाराय गौरवर्णाय जिह्वात्मने स्वाहेति हुत्वा ओं ठं नम इति त्यागं कृत्वा जिह्वायाम् । ओं टकाराय

असितवर्णाय घ्राणात्मने स्वाहेति हुत्वा। ओं टं नम इति त्यागं कृत्वा घ्राणे। ओं ञकाराय सितवर्णाय वागिन्द्रियात्मने स्वाहेति हुत्वा। ओं ञं नम इति त्यागं कृत्वा वागाधरे। ओं झकाराय रक्तवर्णाय पाणीन्द्रियात्मने स्वाहेति हुत्वा ओं झन्नम इति त्यागं कृत्वा करयोः। ओं जकाराय रक्तवर्णाय पादात्मने स्वाहेति हुत्वा ओं जं नम इति त्यागं कृत्वा पादयोः। ओं छकाराय रक्तवर्णाय पाय्वात्मने स्वाहेति हुत्वा ओं छं नम इति त्यागं कृत्वा पायौ। ओं चकाराय हेमवर्णाय मेहनात्मने स्वाहेति हुत्वा। ओं चं नम इति त्यागं कृत्वा मेहने न्यसेत्। ओं ङकाराय पीतवर्णाय पृथिवीतत्वाय चतुरश्राय स्वाहेति हुत्वा ओं ङं नम इति त्यागं कृत्वा पादादिजानुपर्यन्तं न्यसेत्। ओं घकाराय स्फटिकवर्णाय जलात्मने अर्धचन्द्राकाराय स्वाहेति हुत्वा। घं नम इति त्यागं कृत्वा जान्वादिगुह्यपर्यन्तं न्यसेत्। ओं गकाराय लोहितवर्णाय तेज आत्मने त्रिकोणाय स्वाहेति हुत्वा। ओं गं नम इति त्यागं कृत्वा गुह्यादिनाभ्यन्तम्। ओं खकाराय वेदिकाकाराय धूम्रवर्णाय वाय्वात्मने स्वाहेति हुत्वा खं नम इति त्यागं कृत्वा नाभ्यादिघ्राणान्तं न्यसेत्। ओं ककाराय पृथ्व्यात्मने स्वाहेति हुत्वा ओं कं नम इति त्यागं कृत्वा घ्राणादिकेशपर्यन्तं न्यसेत्। इति तत्वहोमं न्यासं च कृत्वा। दशवायूनां होमं न्यासं च कुर्यात्॥

प्राणाय स्वाहेति हुत्वा प्राणाय नम इति त्यागं कृत्वा हृदि। ओं अपानाय स्वाहेति हुत्वा। अपानाय नम इति त्यागं कृत्वा अपाने न्यसेत्। ओं समानाय स्वाहेति हुत्वा समानाय नम इति त्यागं कृत्वा नाभौ। ओं उदानाय स्वाहेति हुत्वा। उदानाय नम इति त्यागं कृत्वा कण्ठे। ओं व्यानाय स्वाहेति हुत्वा व्यानाय नम इति त्यागं कृत्वा सर्वाङ्गे। ओं नागाय स्वाहेति हुत्वा नागाय नम

इति त्यागं कृत्वा हृदि । ओं कूर्माय स्वाहेति हुत्वा । कूर्माय नम इति त्यागं कृत्वा गुदे । ओं ककलाय स्वाहेति हुत्वा । ककलाय नम इति त्यागं कृत्वा कण्ठे । ओं केसराय स्वाहेति हुत्वा । केसराय नम इति त्यागं कृत्वा नाभौ । ओं धनञ्जयाय स्वाहा । इति हुत्वा । धनञ्जयाय नम इति त्यागं कृत्वा सर्वाङ्गे विन्यसेत् । एवं श्रियादीनामपि न्यसनं कुर्वात् ॥

सुदर्शनाद्यायुधानि वनमालादिकान्यपि ।
न्यस्येद्यथायुधं मन्त्री प्रतिकायञ्च शार्ङ्गिणः ॥

ओं सुदर्शनाय हेतिराजाय स्वाहेति हुत्वा, सुदर्शनाय नम इति दक्षिण-हस्ते ओं पाञ्चचन्याय शंखादिपतये स्वाहेति हुत्वा, ओं पाञ्चजन्याय शंखादिपतये नम इति त्यागं कृत्वा वामहस्ते । ओं कौमोदक्यै गदाधिपतये स्वाहेति हुत्वा, कौमोदक्यै गदाधिपतये नम इति त्यागं कृत्वा वामहस्ते । ओं नन्दकाय खड्गाधिपतये स्वाहेति हुत्वा नन्दकाय खड्गाधिपतये नम इति त्यागं कृत्वा वामकक्ष्याम् ! ओं शार्ङ्गाय चापाधिपतये स्वाहेति हुत्वा, शार्ङ्गाय चापाधिपतये नम इति त्यागं कृत्वा वामहस्ते न्यसेत्। ओं किरीटाय मकुटात्मने स्वाहा इति हुत्वा। किरीटाय मकुटात्मने नम इति त्यागं कृत्वा शिरसि। ओं किरीटमालायै आपीडात्मने स्वाहेति हुत्वा। किरीटमालायै आपीडात्मने नम इति त्यागं कृत्वा अंसयोः। ओं दक्षिणकुण्डलाय मकरात्मने स्वाहा इति हुत्वा, दक्षिणकुण्डलाय मकरात्मने नम इति त्यागं कृत्वा दक्षिणकर्णे। ओं वामकुण्डलाय मकरात्मने स्वाहेति हुत्वा । वामकुण्डलाय मकरात्मने नम इति त्यागं कृत्वा वामकर्णे । ओं वैजयन्त्यै वनमालायै स्वाहा ।

वैजयन्त्यै वनमालाया इदं न मम । इति त्यागं कृत्वा वक्षः-पार्श्वयोः । ओं हाराय सर्वाभरणाधिपतये स्वाहेति हुत्वा । हाराय नम इति त्यागं कृत्वा वक्षःपार्श्वयोः । ओं श्रीवत्साय श्रीनिवासाय स्वाहा इति हुत्वा । श्रीवत्साय नम इति त्यागं कृत्वा दक्षिणोरसि । ओं कौस्तुभाय रत्नाधिपतये स्वाहेति हुत्वा कौस्तुभाय नम इति त्यागं कृत्वा ऊरोर्मध्ये । ओं काञ्चीगुणोज्ज्वलाय दिव्यपीताम्बराय स्वाहेति हुत्वा, पीताम्बराय नम इति त्यागं कृत्वा कट्याम् । ओं दक्षिणनूपुराय स्वाहेति हुत्वा दक्षिणनूपुराय नम इति त्यागं कृत्वा, दक्षिणपादे । ओं वामनूपुराय स्वाहेति हुत्वा वामनूपुराय नम इति त्यागं कृत्वा वामपादे । ओं श्रीमत्तुलस्यै स्वाहेति हुत्वा तुलस्यै नम इति त्यागं कृत्वा पादयोः । ओं श्रीं श्रियै स्वाहेति हुत्वा श्रियै नम इति त्यागं कृत्वा दक्षिणपार्श्वे । ओं ह्रीं पुष्ट्यै स्वाहेति हुत्वा ओं ह्रीं पुष्ट्यै नम इति त्यागं कृत्वा वामपार्श्वे । ओं ऐं सरस्वत्यै स्वाहेति हुत्वा सरस्वत्यै नम इति त्यागं कृत्वा मुखे । ओं द्रां निद्रायै स्वाहेति हुत्वा निद्रायै नम इति त्यागं कृत्वा पश्चाद्भागे । ओं क्लीं कान्त्यै स्वाहेति हुत्वा कान्त्यै नम इति त्यागं कृत्वा ऊर्ध्वदेहे । ओं कं पृथिव्यै स्वाहेति हुत्वा पृथिव्यै नम इति त्यागं कृत्वा पादयोः । ओं गरुडाय स्वाहेति हुत्वा गरुडाय नम इति त्यागं कृत्वा ऊर्वोः । एवं बालार्चायामपि न्यासं कुर्यात् । षोडशन्यासं कुर्यात् ॥

न जङ्गमेषु बिम्बेषु षोडशन्यासमाचरेत् ॥

षोडशन्यासमाह.

प्रणवस्य व्याहृतीनामकाराद्यक्षरस्य च ॥ १ ॥

ऋक्षाणामपि कालस्य वासराद्ययनस्य च ॥

ब्राह्मणादेश्च वर्णस्य तोयस्य निगमस्य च ।
देवतानां विराजश्च क्रतूनां च गुणस्य च ॥
सत्वादेश्चैव मूर्तीनां शक्तीनां षड्गुणस्य च ।
लोकानां न्यसनं कुर्यात् षोडशानामिति क्रमात् ॥

ओं स्वाहा । ओं अं नम इति हृदये । ओं स्वाहा । ओं ओं नम इति दक्षिणपार्श्वे । ओं स्वाहा । ओं नम इति वामपार्श्वे । इति प्रणवन्यासः ॥

अथ व्याहृतीनां न्यासः.

ओं भूस्स्वाहा । भुव इदं न ममेति पादयोः । ओं भुवस्स्वाहा । भुव इदन्न ममेति हृदये । ओं सुवस्स्वाहा । सुव इदं न ममेति शिरसि ॥

अथाकारादिमातृकान्यासः.

ओं अं स्वाहा । ओं अं नम इति त्वचि । ओं आं स्वाहा । ओं आं नम इति मुखे । ओं इं स्वाहा । ओं इं नम इति दक्षिणदृशि । ओं ईं स्वाहा । ओं ईं नम इति वामदृशि । ओं ऋं स्वाहा । ओं ऋं नम इति दक्षिणनेत्रे । ओं ॠं स्वाहा । ओं ॠन्नम इति वामनेत्रे । ओं ऌं स्वाहा । ओं ऌं नम इति अधरे । ओं ॡं स्वाहा । ओं ॡं नम इत्युत्तरे । ओं एं स्वाहा । ओं एं नम इति ऊर्ध्वदन्तपङ्क्तौ । ओं ऐं स्वाहा । ओं ऐं नम इति अधोदन्तपङ्क्तौ । ओं अं स्वाहेत्यास्ये । ओं अः स्वाहा इति शिरसि । ओं यं स्वाहेति-त्वचि । ओं रं स्वाहेति नेत्रयोः । ओं लं स्वाहेति नासिकायाम् । ओं वं स्वाहेति दशनाग्रे । ओं सं स्वाहेति कट्याम् । ओं हं स्वाहेति हृदये । ओं ळं स्वाहेति नाभौ । ओं क्षं स्वाहेति मेहने । ओं कं खं गं

धं ङं स्वाहेति अंगुळीषु। ओं चं छं जं झं ञं स्वाहेति जघनयोः। ओं टं ठं डं ढं णं स्वाहेति त्यागं कृत्वा दक्षिणजङ्घायाम्। ओं तं थं दं धं नं स्वाहेति त्यागं कृत्वा वामजङ्घायाम्। ओं पं फं बं भं मं स्वाहेति हुत्वा भुजयोः॥

अथ नक्षत्रन्यासः.

ओं रोहिण्यै स्वाहा। रोहिण्यै नम इति त्यागं कृत्वा हृदये ओं मृगशिरसे स्वाहा। मृगशिरसे नम इति त्यागं कृत्वा मूर्ध्नि ओं आर्द्रायै स्वाहा नम इति त्यागं कृत्वा। केशेषु। पुनर्वसवे स्वाहा। नम इति त्यागं कृत्वा ललाटे। ओं पुष्याय स्वाहा। नम इति त्यागं कृत्वा वदने। ओं आश्लेषाय स्वाहा। नम इति त्यागं कृत्वा नासिकायाम्। ओं मखायै स्वाहा। नम इति त्यागं कृत्वा दन्तेषु। ओं पूर्वफल्गुन्यै स्वाहा। नम इति त्यागं कृत्वा दक्षिणकर्णे। ओं उत्तरफल्गुन्यै स्वाहा। नम इति त्यागं कृत्वा वामकर्णे। ओं हस्ताय स्वाहा। इति हुत्वा नम इति त्यागं कृत्वा बाह्वोः। ओं चित्रायै स्वाहा नम इति त्यागं कृत्वा दक्षिणकर्णे। ओं स्वात्यै स्वाहा। नम इति त्यागं कृत्वा वामकरे। ओं विशाखायै स्वाहा। नम इति त्यागं कृत्वा दक्षिणस्तने। ओं अनूराधायै स्वाहा। नम इति त्यागं कृत्वा वामहस्ते। ओं ज्येष्ठायै स्वाहा नम इति त्यागं कृत्वा उदरे। ओं मूलायै स्वाहा। नम इति त्यागं कृत्वा, दक्षिण कट्याम्। ओं पूर्वाषाढायै स्वाहा। नम इति त्यागं कृत्वा वामकट्याम्। ओं उत्तराषाढायै स्वाहा नम इति त्यागं कृत्वा मेहने। ओं श्रवणाय स्वाहा। नम इति त्यागं कृत्वा वृषणयोः। दक्षिणभागे। ओं धनिष्ठायै स्वाहा। नम इति त्यागं कृत्वा वृषणयोः। वामभागे। ओं शतभिषजे स्वाहा। नम इति त्यागं।

पादयोः । ओं पूर्वाभाद्रायै स्वाहा । नम इति त्यागं दक्षिणजंघे । ओं उत्तराभाद्रायै स्वाहा । नम इति त्यागम् । वामजंघे । ओं रेवत्यै स्वाहा । नम इति त्यागम् । दक्षिणदेशे । ओं अश्विन्यै स्वाहा । नम इति त्यागम् । वामदेशे । ओं भरण्यै स्वाहा । नम इति त्यागम् । दक्षिण-पादाग्रे । ओं कृत्तिकायै स्वाहा । नम इति त्यागम् । वामपादाग्रे ॥

अथ कालन्यासः.

ओं चैत्रायै स्वाहा । नम इति शिरसि । ओं वैशाखाय स्वाहा । नम इति मुखे । ओं ज्येष्ठाय स्वाहा नम इति हृदये । ओं आषाढाय स्वाहा नम इति स्कन्धयोः । ओं श्रावणाय स्वाहा नम इति स्तनयोः । ओं भाद्रपदाय स्वाहा नम इति उदरे । ओं आश्विनाय स्वाहा नम इति लिङ्गे । ओं कार्तिकाय स्वाहा नम इति कट्याम् । ओं मार्ग-शीर्षाय स्वाहा नम इति ऊरुदेशे । ओं पौषाय स्वाहा । नम इति जान्वोः । ओं माघाय स्वाहा नम इति जंघायाम् । ओं फाल्गु-नाय स्वाहा नम इति पादयोः ॥

अथ ग्रहन्यासः.

ओं आदित्याय स्वाहा । नम इति दक्षिणनेत्रे । ओं चन्द्राय स्वाहा नम इति वामनेत्रे । ओं अङ्गारकाय स्वाहा नम इति शिरसि । ओं बुधाय स्वाहा नम इति भ्रुवोः । ओं बृहस्पतये स्वाहा । नम इति जिह्वायाम् । ओं शुक्राय स्वाहा नम इति लिङ्गे । ओं शनैश्चराय स्वाहा । नम इति ललाटे । ओं राहवे स्वाहा । नम इति दक्षिणपादे । ओं केतुभ्यस्स्वाहा । नम इति वामपादे ॥

अथ वत्सरन्यासः.

ओं संवत्सराय स्वाहा । नम इति दक्षिणभुजे । ओं परिवत्स-राय स्वाहा । नम इति वामभुजे । ओं इदुवत्सराय स्वाहा । नम इति

दक्षिणभुजे । ओं वत्सराय स्वाहा । नम इति वामभुजे । ओं ऋतुभ्यस्स्वाहा । नम इति लिङ्गे । ओं अहोरात्रेभ्यस्स्वाहा । नम इत्यस्थिषु ओं क्षणाय स्वाहा । नम इति रोमकूपे । ओं कृताय स्वाहा । नम इति मुखे । ओं त्रेताय स्वाहा । नम इति त्यागङ्कृत्वा हृदये । ओं द्वापरायस्वाहा । नम इति नितम्बे । ओं कलये स्वाहा । नम इति पादयोः । ओं मन्वन्तरेभ्यस्स्वाहा । नम इति बाह्वोः । ओं पराय स्वाहा । नम इति दक्षिणजङ्घायाम् । ओं परार्धाय स्वाहा इति वामजङ्घायाम् । ओं उदगयनाय स्वाहा । नम इति त्यागं कृत्वा दक्षिणपादे । ओं दक्षिणायनाय स्वाहा । नम इति वामपादे । ओं विषुवते स्वाहा । नम इति सर्वाङ्गुलीषु ॥

अथ वर्णन्यासः.

ओं ब्राह्मणाय स्वाहा । नम इति मुखे । ओं क्षत्रियाय स्वाहा । नम इति बाह्वोः । ओं वैश्याय स्वाहा । नम इति ऊर्वोः । ओं शूद्राय स्वाहा । नम इति पादयोः । ओं सङ्करेभ्यस्स्वाहा । नम इति पादयोश्च । ओं अनुलोमेभ्य स्स्वाहा । नम इति सर्वाङ्गे । ओं गोभ्यस्स्वाहा । नम इति मुखे । ओं अजाभ्यस्स्वाहा । नम इति दक्षिणस्तने । ओं आविकाभ्यस्स्वाहा । नम इति वामस्तने । ओं आमशुभ्यस्स्वाहा । नम इति ऊर्वोः ॥

अथ तोयन्यासः.

ओं मेघेभ्यस्स्वाहा । नम इति केशेषु । ओं अभ्रेभ्यस्स्वाहा । नम इति रोमसु । ओं नदीभ्य स्स्वाहा । नम इति सर्वगात्रेषु । ओं समुद्रेभ्य स्स्वाहा । नम इति कुक्षौ ।

अथ वेदन्यासः.

ओं ऋग्वेदाय स्वाहा। नम इति शिरसि। ओं यजुर्वेदाय स्वाहा। नम इति दक्षिणभुजे। ओं सामवेदाय स्वाहा। नम इति वामभुजे। ओं सर्वोपनिषद्भ्यस्स्वाहा। नम इति हृदये। ओं इतिहासपुराणेभ्यस्स्वाहा। नम इति जङ्घयोः। ओं अथर्वाङ्गिरोभ्यस्वाहा। नम इति नाभौ। ओं कल्पसूत्रभ्यस्स्वाहा। नम इति पादयोः। ओं व्याकरणेभ्यस्स्वाहा। नम इति वक्त्रे। ओं तर्केभ्यस्वाहा। नम इति कण्ठे। ओं मीमांसायै स्वाहा। नम इति हृदि। ओं निरुक्ताय स्वाहा। नम इति हृदि च। ओं छन्दश्शास्त्रेभ्यस्स्वाहा। नम इति दक्षिणनेत्रे। ओं ज्योतिश्शास्त्रेभ्यस्स्वाहा। नम इति वामनेत्रे। ओं गीताशास्त्रेभ्यस्स्वाहा। नम इति वामनेत्रे। ओं आयुर्वेदाय स्वाहा। नम इति दक्षिणभुजे ओं धनुर्वेदाय स्वाहा। नम इति वामभुजे। ओं योगशास्त्रेभ्यस्स्वाहा। नम इति हृदये। ओं नीतिशास्त्रेभ्यस्स्वाहा। नम इति पादयोः। ओं वश्यतन्त्राय स्वाहा। नम इत्योष्ठयोः॥

अथ देवन्यासः.

ओं मत्स्याय स्वाहा। नम इति मूर्ध्नि। ओं कूर्माय स्वाहा। नम इति पादयोः। ओं वराहाय स्वाहा नम इति ललाटे। ओं नृसिंहाय स्वाहा। नम इति जङ्घयोः। ओं वामनाय स्वाहा। नम इति मुखे। ओं परशुरामाय स्वाहा। नम इति हृदि। ओं रामाय स्वाहा। नम इति बाह्वोः। ओं बलरामाय स्वाहा। नम इति हृदि। ओं कृष्णायस्वाहा। नम इति नाभौ। ओं बौद्धाय स्वाहा। नम इति बुद्धौ। ओं कल्किने स्वाहा। नम इति जान्वोः। ओं केशवाय स्वाहा। नम इति शिरसि। ओं नारायणाय स्वाहा। नम इति मुखे। माधवाय

स्वाहा। नम इति ग्रीवायाम्। ओं गोविन्दाय स्वाहा। नम इति बाह्वोः। ओं विष्णवे स्वाहा। नम इति हृदि। ओं मधुसूदनाय स्वाहा। नम इति पृष्ठे। त्रीविक्रमाय स्वाहा। नम इति कट्याम्। ओं वामनाय स्वाहा। नम इति जठरे। ओं श्रीधराय स्वाहा। नम इति हृदि। ओं हृषीकेशाय स्वाहा। नम इति जङ्घयोः। ओं पद्मनाभाय स्वाहा। नम इति जान्वोः। ओं दामोदराय स्वाहा। नम इति पादयोः॥

अथ वैराजन्यासः.

ओं देवेभ्यस्स्वाहा। नम इति मूर्ध्नि। ओं मरुद्भ्यस्स्वाहा। नम इति प्राणे। ओं वसुभ्यस्स्वाहा। नम इति कण्ठे। ओं रुद्रेभ्यस्स्वाहा। नम इति दन्तपङ्क्तौ। ओं सरस्वत्यै स्वाहा। नम इति जिह्वायाम्। ओं इन्द्राय स्वहा। नम इति दक्षिणभुजे। ओं बलये स्वाहा। नम इति वामभुजे। ओं प्रह्लादाय स्वाहा। नम इति दक्षिणहस्ते। ओं विश्वकर्मणे स्वाहा। नम इति वामहस्ते। ओं नारदाय स्वाहा। नम इति दक्षिणकुक्षौ। ओं अतन्तादिनागेभ्यस्स्वाहा। नम इति वामकुक्षौ। वरुणाय स्वाहा। नम इति स्तनयोः। मित्राय स्वाहा। नम इति पादयोः। ओं विश्वेदेवेभ्यस्स्वाहा। नम इति ऊर्वोः। ओं पितृभ्यस्स्वाहा। नम इति जान्वोः। ओं पक्षेभ्यस्स्वाहा। नम इति जङ्घयोः। ओं राक्षसेभ्यस्स्वाहा। नम इति गुल्फयोः। ओं पिशाचेभ्यस्स्वाहा। नम इति पादयोः। ओं असुरेभ्यस्स्वाहा। नम इति पादाङ्गुलीषु। ओं विद्याधरेभ्यस्स्वाहा। नम इति पार्श्वयोः। ओं ग्राहेभ्यस्स्वाहा। नम इति पादतलयोः। ओं कार्तिकेयाय स्वाहा। नम इति दक्षिणकटिपार्श्वे। ओं गणेशाय स्वाहा। नम इति वामकटिपार्श्वे॥

अथ क्रतुन्यासः.

ओं अश्वमेधाय स्वाहा । नम इति मूर्ध्नि । ओं नरमेधाय स्वाहा । नम इति ललाटे । ओं राजसूयाय स्वाहा । नम इति मुखे । ओं गोसवाय स्वाहा । नम इति कण्ठे । ओं द्वादशाहाय स्वाहा । नम इति हृदि । ओं अहेभ्यस्स्वाहा । नम इति नाभौ । ओं सर्पजनेभ्य-स्स्वाहा । नम इति दक्षिणकट्याम् । ओं सर्वमेधाय स्वाहा । नम इति वामकट्याम् । ओं अग्निष्टोमाय स्वाहा । नम इति लिङ्गे । ओं अतिरात्राय स्वाहा । नम इति वृषणयोः । ओं अप्तोर्यामाय स्वाहा । नम इत्यूर्वोः । ओं षोडश्यै स्वाहा । नम इति जान्वोः । ओं उक्थाय स्वाहा । नम इति दक्षिणजङ्घायाम् । ओं वाजपेयाय स्वाहा । नम इति वामजङ्घायाम् । ओं अग्निष्टोमाय स्वाहा । नम इति दक्षिणबाहौ । ओं चातुर्मास्येभ्यस्स्वाहा । नम इति वामबाहौ । ओं सौत्रामण्यै स्वाहा । नम इति हस्तयोः । ओं पशुयज्ञाय स्वाहा । नम इत्यङ्गु-लीषु । ओं दर्शाय स्वाहा । नम इति दक्षिणस्तने । ओं पौर्णमासाय स्वाहा । नम इति वामस्तने । ओं पञ्चमहायज्ञेभ्यस्स्वाहा । नम इति पादाङ्गुलीषु । ओं आहवनीयाय स्वाहा । नम इति मुखे । ओं बार्हस्पत्याय स्वाहा । नम इति हृदये । ओं दक्षिणाग्नये स्वाहा । नम इति नाभौ । ओं वैद्यै स्वाहा । नम इत्युदरे । ओं प्रवर्ग्याय स्वाहा । नम इति भूषणेषु । ओं सवनेभ्यस्स्वाहा । नम इति पादयोः । ओं धर्मेभ्यस्स्वाहा । नम इति बाह्वोः । ओं दर्शेभ्यस्स्वाहा । नम इति केशेषु ॥

अथ गुणन्यासः.

ओं सत्वाय स्वाहा। सत्वाय नम इति हृदये। ओं रजसे-स्वाहा। नम इति शिरसि। ओं तमसे स्वाहा। नम इति शिखायाम्॥

अथ ज्ञानादिगुणन्यासः.

ओं ज्ञानाय स्वाहा। नम इति हृदये। ओं ऐश्वर्याय स्वाहा। नम इति शिरसि। ओं शक्त्यै स्वाहा। नम इति शिखायाम्। ओं बलाय स्वाहा। नम इति बाह्वोः। ओं तेजसे स्वाहा। नम इति नेत्रयोः। ओं वीर्याय स्वाहा नम इति करयोः॥

अथ लोकन्यासः.

ओं पाताळाय स्वाहा। नम इति पादमूले। ओं रसातलाय स्वाहा। नम इति पार्ष्णिदेशे। ओं महातलाय स्वाहा। नम इति गुल्फौ। ओं तलातलाय स्वाहा। नम इति जङ्घयोः। ओं सुतलाय स्वाहा। नम इति जान्वोः। ओं वितलाय स्वाहा। नम इति ऊर्वोरधोभागे। ओं अतलाय स्वाहा। नम इत्यूर्वोरूर्ध्वभागे। ओं महीतलाय स्वाहा। नम इति जघने। ओं नभस्थलाय स्वाहा। नम इति नाभौ। ओं स्वर्गाय स्वाहा। नम इति वक्षस्थले। ओं महर्लोकाय स्वाहा। नम इति ग्रीवायाम्। ओं जनलोकाय स्वाहा। नम इति वदने। ओं तपोलोकाय स्वाहा। नम इति ललाटे। ओं सत्यलोकाय स्वाहा। नम इति शिरसि। एवं षोडशन्यासं कृत्वा। श्रीयादीनामाग्रे चतुर्षु कुण्डेषु व्याहृतिभिश्शान्ति-होमं कुर्यात्। प्राच्यां कुण्डे मधुना भूरिति शताहुतीर्हुत्वा पादौ स्पृशेत्। याम्यकुण्डे पयसा भुवरिति शताहुतीर्हुत्वा जठरं स्पृशेत्। प्रतीच्यां

कुण्डे दध्ना सुवरिति शताहुतीर्हुत्वा वक्त्रं स्पृशेत्। उदीच्यां कुण्डे भूर्भुवस्सुवरिति शताहुतीर्हुत्वा शिरः स्पृशेत्। प्राच्यां कुण्डे आज्येन भूर्भुवस्सुवरिति शताहुतीर्हुत्वा सर्वाङ्गं स्पृशेत्। विष्णुगायत्र्या शताहुतीर्हुत्वा मुखं स्पृशेत्। एवं शान्तिहोमं कृत्वा चतुर्ष्वपि कुण्डेषु जयादिहोमं कुर्यात्॥

अथ जयादिहोमः.

ओं चित्तं च स्वाहा। चित्तायेदं न मम। ओं चित्तिश्च स्वाहा। चित्या इदं न मम। आकूताय स्वाहा। अकूतायेदं न मम। आकूतिश्च स्वाहा। आकूत्या इदं न मम। विज्ञातं च स्वाहा। विज्ञातायेदं न मम। विज्ञानं च स्वाहा। विज्ञानायेदं न मम। मनश्च स्वाहा। मनस इदं न मम। शक्करीश्च स्वाहा। शक्करीभ्य इदं न मम। दर्शश्च स्वाहा। दर्शायेदं न मम। पौर्णमासश्च स्वाहा। पौर्णमासायेदं न मम। बृहच्च स्वाहा। बृहत इदं न मम। रथन्तरं च स्वाहा। रथन्तरायेदं न मम। प्रजाप्रतिर्जयानिद्राय वृष्णे प्रायाच्छदुग्रः पृतनाज्येषु तस्मै विशस्समनमन्तसर्वास्स उग्रस्स हि हव्यो बभूव स्वाहा। प्रजापतय इदं न मम। अग्निर्भूतानामधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यागं् स्वाहा। अग्नये (भूतानामधिपतय) इदं न मम। इन्द्रो ज्येष्ठानामधिपतिस्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्यागं् स्वाहा। इन्द्राय ज्येष्ठानामधिपतय इदं न मम। यमः पृथिव्या अधिपतयस्समावत्वस्मिन्। .....स्वाहा। यमाय पृथिव्या अधिपतय इदं न मम। वायुरन्तरिक्षस्याधिपतिस्समावतु स्वाहा। वायवे अन्तरिक्षस्याधिपतय इदं न मम। सूर्यो दिवोधिपति-

स्समावतु—स्वाहा। सूर्याय दिवोधिपतय इदं न मम। चन्द्रमा नक्षत्राणामधिपति—स्वाहा। चन्द्रमसे नक्षत्राणामधिपतय इदं न मम। बृहस्पतिर्ब्रह्मणोऽधिपतिस्समावत्वस्मिन्—स्वाहा। बृहस्पतये ब्रह्मणोधिपतय इदं न मम। मित्रस्सत्यानामधिपतिः—स्वाहा। मित्राय सत्यानामधिपतय इदं न मम। वरुणोपामधिपतिस्स—स्वाहा। वरुणाय अपामधिपतय इदं न मम। समुद्रस्रोत्यानामधिपति—स्वाहा। समुद्राय स्रोत्यानामधिपतय इदं न मम। अन्नगं साम्राज्यानामधिपति—स्वाहा। अन्नाय साम्राज्यानामधिपतय इदं न मम। सोम ओषधीनामधिपतिस्तन्मावत्वस्मि—स्वाहा। सोमाय ओषधिवनस्पतय इदं न मम। सविता प्रसवनामधि—स्वाहा। सवित्रे प्रसवानामधिपतय इदं न मम। रुद्रः पशूनामधिपतिस्समावत्वस्मिन्—स्वाहा। रुद्राय पशुपतय इदं न मम। अप उपस्पृश्य। त्वष्टा रूपणामधिपतिस्समावतु—स्वाहा। त्वष्ट्रे रूपाणामधिपतय इदं न मम। विष्णुः पर्वतानामधिपतिस्समा—स्वाहा। विष्णवे पर्वतानामधिपतय इदं न मम। मरुतो गणानामधिपतयस्तेमावन्त्वस्मिन्— स्वहा। मरुद्भ्यो गणानामधिपतिभ्य इदं न मम। पितरः पितामहाः परेवरे ततास्तता महा इह मावत अस्मिन्—स्वाहा। पितृभ्यः पितामहेभ्यः परेभ्योऽवरेभ्यस्ततेभ्यस्ततामहेभ्य इदं न मम। (जीवत्पितृकस्य) पितामहा अवरे ततामहा इह मावत्वस्मिन्—स्वाहा। पितामहेभ्योऽवरेभ्यस्ततामहेभ्य इदं न मम। (जीवत्पितृपितामहस्य च एतद्धोमलोपः)। इति हुत्वा। अप उपस्पृश्य। ऋतासाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोप्सरस ऊर्जो नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। ऋतासाहे ऋतधाम्ने अग्नये गन्धर्वाय इदं न मम। ओं ताभ्यस्स्वाहा। ओषधीभ्योऽप्सरोभ्य ऊर्भ्य इदं न मम। सगं्हितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम स इदं

ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा । सगृंहिताय विश्वसाम्ने सूर्याय गन्धर्वायेदं न मम । ताभ्यस्स्वाहा । मरीचिभ्योऽप्सरोभ्यआयुभ्य इदं न मम । सुषुम्नस्सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसोभे कुरयो नाम स इदं ब्रह्मक्षत्रं—स्वाहा । सुषुम्नाय सूर्यरश्मये चन्द्रमसे गन्धर्वाय इदं न मम । ओं ताभ्यस्स्वाहा । नक्षत्रेभ्योप्सरोभ्य भेकुरिभ्य इदं न मम । भुज्युस्सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणाअप्सरसस्तवानाम स इदं—स्वाहा । भुज्यवे सुपर्णाय यज्ञाय गन्धर्वायेदं न मम । ताभ्यस्स्वाहा । दक्षिणाभ्योप्सरोभ्यस्तवाभ्य इदं न मम । प्रजापतिर्विश्वकर्मा मनोगन्धर्वस्तस्यर्क्सामान्यप्सरसो वह्वयो नाम स इदं ब्रह्मक्षत्रं—स्वाहा । प्रजापतये विश्वकर्मणे मनसे गन्धर्वायेदं न मम । ओं ताभ्यस्स्वाहा । ऋक्सामेभ्यो अप्सरोभ्यो वह्निभ्य इदं न मम । इषिरो विश्वव्यचावातो गन्धर्वस्तस्यापोप्सरसो मुदा नाम स इदं ब्रह्मक्षत्रं—स्वाहा । इषिराय विश्वव्यचसे वाताय गन्धर्वायेदं न मम । ओं ताभ्यस्वाहा । अद्भ्योऽप्सरोभ्यो मुदाभ्य इदं न मम । भुवनस्य पते यस्यत उपरिगृहा इह च । स नो रास्वाज्यानिगं् रायस्पोषगं् सुवीर्यगं् संवत्सरीणागं् स्वस्तिगं स्वाहा । भुवनस्पत्य इदं न मम । परमेष्ठ्यधिपतिमृत्युर्गन्धर्वस्तस्य विश्वमप्सरसो भुवो नाम स इदं—स्वाहा । परमेष्ठिने अधिपतये मृत्यवे गन्धर्वायेदं न मम । ओं ताभ्यस्स्वाहा । विश्वस्मा अप्सरोभ्योभूभ्य इदं न मम । सुक्षितिस्सुभूतिर्भद्रकृत्सुपर्वान्पर्जन्यो गंन्धर्वसस्यविद्युतोऽप्सरसो रुचो नाम स इदं—स्वाहा । सुक्षितये सुभूतये भद्रकृते—सुपर्वते पर्जन्याय गन्धर्वायेदं न मम । ओं ताभ्यस्स्वाहा विद्युद्भ्योऽप्सरेभ्यो रुग्भ्य इदं न मम । दूरेहेतिरमृडयो मृत्युर्गन्धर्वस्तस्य प्रजा अप्सरसो भीरुवो नाम स इदं—स्वाहा । दूरे हेतये अमृडये मृत्यवे गन्धर्वायेदं न मम । ओं ताभ्यस्स्वाहा । प्रजाभ्योऽप्सरेभ्यो-

भीरुभ्य इदं न मम। चारुः कृपणकाशी कामो गन्धर्वस्तस्याघयोप्सरस-श्शोचयन्तीर्नाम स इदं—स्वाहा। चारवे कृपणकाशिने कामाय गन्दर्वायेदं न मम। ओं ताभ्यस्स्वाहा। आदिभ्योप्सरोभ्यश्शोचयन्तीभ्य इदं न मम। स नो; भुवनस्य पते यस्य त उपरिगृहा इह च। उरु ब्रह्मणेऽस्मै क्षत्राय महिशर्म यच्छ स्वाहा। भुवनस्य पत्यै ब्रह्मण इदं न मम। प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयगंस्याम पतयो रयीणां स्वाहा। प्रजापतय इदं न मम। ओं भूस्स्वाहा। अग्नय इदं न मम। ओं भुव-स्वाहा। वायव इदं न मम। ओं सुवस्स्वाहा। सूर्यायेदं न मम। ओं भूर्भुवस्सुवस्स्वाहा। प्रजापतय इदं न मम। अत्र; वा समित्सन्नहने अग्नावपि दध्यात्। तथा प्रयोगसरण्याम्—यद्यस्य मन्त्रानुपरोधस्स्यात् जयादिहोमादनन्तरं वा स्यात् समिच्चसन्नहनं च दद्यादितोन्यथा न कालो दृष्टः। यदस्य कर्मणोत्यरीरिचम्। यद्वान्यूनमिहाकरम्। अग्निष्टत्स्विष्ट-कृद्विद्वान्। सर्वग्गं स्विष्टगं सुहुतं करोतु स्वाहा। अग्नये स्विष्टकृत इदं न मम। इति हुत्वा॥

अनाज्ञातादिहोमः.

अस्मिन् भगवत्प्रतिष्ठाहोमकर्माणि ज्ञाताज्ञातदोषनिर्हरणार्थं अनाज्ञातत्रयम्। कर्मान्तरं कर्मविपर्यासप्रायाश्चित्तार्थं, आभिर्गीर्भिरिति ऋग्वाज्ञय प्रायश्चित्तार्थं यद्विद्वांस इति पदाक्षरवर्णलोपप्रायश्चित्तार्थं इदं विष्णुः त्रयम्बकमिति सर्वोपघातप्रायश्चित्तार्थं पुनस्त्वादित्या इति सर्वप्रायश्चित्तार्थं भूर्भुवरित्येतैर्मन्त्रैराज्याहुतीर्होष्यामीत्युक्त्वा—

ओं अनाज्ञातं यदाज्ञातम्। यज्ञस्य क्रियते मिथु। अग्ने वदम्य कल्पय। त्वगं हि वेत्थ यथातथं स्वाहा। अग्नय इदं न मम।

पुरुषसम्मितो यज्ञो यज्ञः पुरुषसम्मितः । अग्ने तदस्य कल्पय । त्वग् हि वेत्थ यथातथं स्वाहा । अग्नय इदं न मम । यत्पाकत्रा मनसा दीनदक्षा न । यज्ञस्य मन्वते मर्तासः । अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवाग् ऋतुशो यजाति स्वाहा । अग्नय इदं न मम । त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडोऽवयासि सीष्ठाः । यजिष्ठो वह्नितमश्शोशुचानो विश्वाद्वेषाग्ंसि प्रमुमुग्ध्यस्मत्स्वाहा । अग्नीवरुणाभ्यामिदं न मम । स त्वन्नो अग्नेऽवमोभवोती नेदिष्ठो अस्या उषसो व्युष्टौ । अवयक्ष्मनो वरुणग् रराणो वीहि मृडीकग् सुहवो न एधि स्वाहा । अग्नीवरुणाभ्यामिदं न मम । त्वमग्ने अयास्य यासन्मनसा हितः । अयासन्हव्यमूहिषेऽया नो धेहि भेषजं स्वाहा । अग्नीवरुणाभ्यामिदं न मम । आभिर्गीभिर्यदतो न ऊनमाप्यायय हरिवो वर्धमानः । यदा स्तोतृभ्यो महिगोत्रारुजासि भूयिष्ठभाजो अथ ते स्याम स्वाहा । इन्द्राय हरिवत इदं न मम । यद्विद्वांसो यदविद्वांसो मुग्धाः कुर्वन्नृत्विजः । अग्निर्मातस्मादेनसः श्रद्धादेवी च मुचता स्वाहा । अग्नये श्रद्धादेव्या इदं न मम । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपाग् सुरे स्वाहा । विष्णव इदं न मम । त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्स्वाहा । त्र्यम्बकायेदं न मम । पुनस्त्वादित्या रुद्रावसवस्समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन त्वं तनुवो वर्धयस्व सत्यास्सन्तु यजमानस्य कामास्स्वाहा । अग्नये वसुनीथायेदं न मम । ओं भूर्भुवस्सुवस्स्वाहा । प्रजापतय इदं न मम ॥

कर्मसाद्गुण्यार्थं केशवादिद्वादशहोमं होष्यामि.

ओं केशवाय स्वाहा केशवायेदं न मम । . . . . .

ओं दामोदराय स्वाहा । दामोदरायेदं न मम । ओं श्रीविष्णवे स्वाहा ।

श्रीविष्णवे परमात्मन इदं न मम। स्रुवेण स्रुच्याज्यमादाय तस्मिन् पूगीफलसहितं श्रीफलं निधाय नववस्त्रेणाच्छाद्य रक्तपीततन्तुभिरावेष्ट्य पुनराज्येनाभ्यज्य, सप्तते अग्ने समिधस्सप्तजिह्वास्सप्तर्षयस्सप्तधामप्रियाणि। सप्तहोत्रास्सप्तधात्वा यजन्ति सप्तयोनीरापृणस्वाघृतेन स्वाहा। अग्नये सप्तवत इदं न मम। पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय। तस्यां देवा अधिसंवसन्त उत्तमे नाक इह मादयन्ताम्। यत्ते देवा अदधुर्भागधेयममावास्ये संवसन्तो महि त्वा। सा नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरं स्वाहा। अग्नये (पूर्णाहुतय) इदं न मम। इति पूर्णाहुतिं हुत्वा—

पूर्णाहुतिं च जुहुयुस्स्वस्वकुण्डेषु मूर्तिपाः।
पद्मोत्पलवदामोदो धूमो हुतभुजो यदि॥
रक्तश्श्वेतस्तथा पीतो धूमस्स्याच्छुभदो भवेत्।
ज्वालाश्च दक्षिणावर्ताश्शुभं शंसन्ति निश्चितम्॥
सूर्यमण्डलनिर्घोषैर्ब्रह्मघोषैश्च मङ्गलैः
यापयेत्तां निशां सर्वे यजमानो गुरुश्च तौ॥

परिधीनाघारसमिधौ अपसार्याग्नौ प्रहरति। ततः परिषेचनं कुर्यात्। अदितेन्वमग्ग्स्थाः। इति दक्षिणतः प्राचीनम्। अनुमतेन्वमग्ग्स्थाः। इति पश्चादुदीचीनम्। सरस्वतेन्वमग्ग्स्थाः। इत्युत्तरतः प्राचीनम्। देव सवितः प्रासावीरिति प्रागारभ्य प्रदक्षिणं परिषेचयेत्। प्रणीतपात्रं पुरस्स्वस्य निधाय, सदसि सन्मे भूयाः पूर्णमसि पूर्णम्मे भूयाः अक्षितमसि मा मेक्षेष्ठाः। इति मन्त्रेण प्रणीतपात्रे अन्यज्जलं निनीय, प्राच्यां दिशि देवा ऋत्विजो मार्जयन्ताम्। इति मन्त्रेण तज्जलं प्राच्यां निरस्य। दक्षिणायां दिशि भासाः पितरो मार्जयन्ताम् इति मन्त्रेण दक्षिणायां दिशि निरस्य। प्रतीच्यां दिशि ग्रहाः पशवो मार्जयन्ताम्

इति मन्त्रेण प्रतीच्यां तज्जलं निरस्य, उदीच्यां दिश्याप ओषधयो वनस्पतयो मार्जयन्तामिति मन्त्रेणोदीच्यां दिशि तज्जलं निरस्य, ऊर्ध्वायां दिशि यज्ञस्संवत्सरो यज्ञपतिर्मार्जयन्तामित्यनेनोर्ध्वायां दिशि तज्जलं निरस्य पुरस्तान्निस्सारितेन आत्मानं प्रोक्ष्य, समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत अरिष्टा अस्माकं वीरामापरासेचिमत्पयः, इति मन्त्रेण शेषमुदकं पत्न्यञ्जलौ निनयेत् । पत्न्यभावे यजमानश्शिरो मार्जयेत् । दक्षिणतो निषण्णं ब्राह्मणं गन्धपुष्पधूपदीपदक्षिणाभिस्सम्पूज्य । उत्तिष्ठ ब्रह्मणस्पते । देवयन्तस्त्वेमहे । उपप्रयन्तु मरुतस्सुदानवः । इन्द्रप्राशूर्भवासचा । इति मन्त्रेण ब्राह्मणमुद्वासयेत् ॥

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्म जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं विधेम इति मन्त्रेणाग्निमुपस्थाय प्रणम्याभिवादयेत् ॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन ।
युद्धुतन्तु मया देव परिपूर्णं तदस्तु मे ॥
प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै ।
यानि तेषामशेषाणां श्रीकृष्णानुस्मरणं परम् ॥
यस्य स्मृत्या च नामोक्त्या जपहोमक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोस्सम्पूर्णं स्यादिति श्रुतिः ॥

इति पठित्वा स्वशेषभूतेन मया स्वीयैस्सर्वपरिच्छदैः । विधातुं प्रीतमात्मानं देवः प्रक्रमते स्वयम् । इति भगवदर्पणं कृत्वा, अनेन होमेन यज्ञस्वरूपी भगवान् प्रीयतां वासुदेव इति जलाक्षतान् भूमौ निक्षिपेत् । अनन्तरं महाभिषेकं कुर्यात् ॥

महाभिषेकपञ्चामृताभिषेकक्रमः.

श्रीमते नारायणाय नम इति मन्त्रेण भगवते, ओं श्रियै नम इति महालक्ष्म्यै अर्घ्यपाद्याचमनगन्धपुष्पधूपदीपनैवेद्यनीराजनानि दद्यात्। अनन्तरमाप्यायस्व समेतु ते विश्वतस्सोमवृष्णियं भवा वाजस्य सन्दधे। अनेन पयसा स्नापयेत्। दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखाकरत्। प्रण आयूगंषि तारिषत्। अनेन दध्ना स्नापयेत्। शुक्रमसि ज्योतिरसि तेजोऽसि देवो वस्सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभिः। अनेन सर्पिषा स्नापयेत्। मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नस्सन्त्वौषधीः। मधु नक्तमुतोषसि मधुमत्पार्थिवगं रजः। मधु द्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्मधुमागं अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः। अनेन मधुना स्नापयेत्। ताश्शर्करा अभवन्। तच्छर्कराणां शर्करत्वम्। वज्रो वै शर्कराः। पशुराग्निः। यच्छर्कराभिरग्निं परिमिणोति। वज्रेणैवास्मै पशून्परिगृह्णाति। अनेन शर्करया स्नापयेत्। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे। इति मन्त्रेण शुद्धजलेन स्नापयेत्। शुभवस्त्रेणाच्छाद्य, तास्सवितुर्वरेण्यस्य चित्रामाहं वृणे सुमतिं विश्वजन्याम्। यामस्य कण्वो अदुहत्प्रपीनागं सहस्रधारां पयसा महीं गाम्। इति मन्त्रेण भगवदुपरि सहस्रधाराकलशं स्नापयेत्। अनन्तरं पूर्वप्रतिष्ठापिताष्टोत्तरशतसहस्रकलशोदकैः पञ्चसूक्तैरभिषेचयेत्॥

ओं सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम्। विश्वं नारायणं देवमक्षरं परमं प्रभुम्। . . . . . तन्नो विष्णुः प्रचोददयात्। इति नारायणसूक्तम्। विष्णोर्नुकं वीर्याणि प्रवोचम्। . . . . विष्णोर्यत्परमं पदमित्यन्तं विष्णुसूक्तम्। श्रीसूक्तम्। हिरण्यवर्णा-

मित्यारभ्य तन्नो लक्ष्मीः प्रचोदयादित्यन्तम् । भूसूक्तम् । ओं भूमि-र्भूम्ना—तन्नो धरा प्रेचादयात् । इत्यन्तं जपित्वा ॥

नीळासूक्तम्.

ओं शृण्वन्ति श्रोणाममृतस्य गोपाम् । पुण्यामस्या उपशृणोमि वाचम् । महीं देवीं विष्णुपत्नीमजूर्याम् । प्रतीचीमेनाग्ं हविषा यजामह । त्रेधा विष्णुरुरुगायो विचक्रमे । महीं दिवं पृथिवीमन्तरिक्षम् । तच्छ्रोणैतिश्रव इच्छमाना । पुण्यग्ं श्लोकं यजमानाय कृण्वती । स्योना पृथिवी भवा नृक्षरा निवेशिनी । यच्छानः शर्मसप्रथाः । अदि-तिर्देवा गन्धर्वा मनुष्याः पितरो सुरास्तेषाग्ं सर्वभूतानां माता मेदिनी महती मही सावित्री गायत्री जगत्युर्वी पृथ्वी बहुला विश्वाभूता कतमाका-यासासत्येत्यमृतेति वसिष्ठः । नीळान्देवीग्ं शरणमहं प्रपद्ये । गृणाहि । घृतवती सावितराधिपत्यै । पयस्वतीरन्तिराशानो अस्तु । ध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशाना सहसोयामनोता । बृहस्पतिर्मातरिश्वोतवायु-स्सन्तुवाना वाता अभिनो गृणन्तु । विष्कम्भो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी ।—ओं विष्णुपत्न्यै च विद्महे भूमिसरूप्यै च धीमहि । तन्नो नीळा प्रचोदयात् ॥

अनन्तरं शय्यावेद्याः प्रागाद्यष्टदिक्षु पूर्वस्थापिताष्टकलशोदकैः पुरुषसूक्तऋग्भिरभिषेचयेत् । ओं सहस्रशीर्षापुरुषः । . . . . सर्वं मनिषाण । इत्यन्तमुच्चार्य । अनन्तरमाचार्यः प्राणप्रतिष्ठाकलशोद-केन आम्रपल्लवेन मूलमन्त्रमन्त्ररत्नाभ्यामष्टोत्तरशतवारं शिरो नासाग्रहृदय-गुह्यपादेषु प्रोक्ष्य मूलमन्त्रेणाभिषेचयेत् । अनन्तरं शुभ्रवस्त्रेण प्रतिमां सम्मृज्य तिरस्करिणीमन्तरा अलङ्कारासन उपवेश्य, श्रीमते नारायणाय नम इति भगवते । श्रियै नम इति माहालक्ष्म्यै अर्घ्यपाद्याचमनानि दत्वा

वस्त्राणि मूलमन्त्रेण प्रोक्ष्य, यं शोषयामि । रं दाहयामि । वं प्लावयामीति विशोध्य । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो-हस्ताभ्यां माददे । इति मन्त्रेण वस्त्रमादाय । उदुत्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यं" इति मन्त्रेणादित्याय प्रदर्श्य । आवहन्ती वितन्वाना । कुर्वाणा चीरमात्मनः । वासाग्ंसि मम गावश्च । अन्नपाने च सर्वदा । ततो मे श्रियमावह "इत्यनेन वासांसि भगवन्तं परिधापयेत् । भगवतो महालक्ष्म्याश्च हरिद्राचूर्णसहितमूर्ध्वपुण्ड्रं विलिखेत् । आयुष्यं वर्चस्यं सुवीर्यं रायस्पोषमौद्विद्यम् । इदग्ं हिरण्यं जैत्रयाया विशतां मां । उच्चैर्वाजि पृतनाजि सत्रासाहं धनंजयं सर्वास्समृद्धीर् ऋद्धयो हिरण्येऽस्मिन् समाहिताः । अनेन मन्त्रेण भगवन्तं भूषणानि परिधारयेत् । अपाशोऽस्यु रोमे मासग्ं शारीश्शिवो मोपतिष्ठस्व दीर्घायुत्वाय शतशारदाय । शतग् शरद्भ्य आयुषे वर्चसे जीवात्वै पुण्याय । रेवतीस्त्वान्यक्ष्णन्नित्येता इत्यनेन मालां समर्पयेत् । श्रीमते नारायणाय नम इति मन्त्रेण भगवते । ओं श्रियै नम इति महालक्ष्म्यै अर्घ्यपाद्याचमनानि दद्यात् । ततो भगवतः पुरतः सवत्सां सोपस्करां गां कन्यां वस्त्रभूषणालङ्कृतां स्थापयेत् । सुवर्णरजतदूर्वा-हरिद्रामधुघृताक्षतगौरसर्षपशङ्खचक्रपताकाभेरीदर्पणमण्डलवैनतेय मत्स्य-युग्मकुम्भशङ्खचक्रगदापद्ममुसलगदाखड्गधनुर्वनमालायवगोधूममुद्गतिल - माषप्रियंगुकुळुत्थश्यामाकव्रीहीनेतान् संभारान्महति ताम्रपात्रे कृत्वा स्थापयेत् अन्यानपसार्य आचार्यः नेत्रोन्मीलनं कुर्यात् । आचार्यः भगवतः पृष्ठभागे आसने उपविश्य प्राणानायम्य,

लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

इति गुरुपरम्परानुसन्धानपूर्वकं, भगवन्तं ध्यात्वा, अद्याहं नेत्रोन्मीलनं करिष्य इति सङ्कल्प्य, अष्टाङ्गुलपरिमितां दृढसुवर्णशलाकां, "मधु-वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नस्सन्त्वौषधीः । इत्य-नेनाभिमन्त्र्य । मध्वक्तया सुवर्णशलाकया "चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्राद्यावापृथिवी अन्तरिक्षगं् सूर्य आत्मा जगतस्तस्थुषश्च । इत्यनेन दक्षिणनेत्रं विलिखेत् । घृताक्तया सुवर्ण-शलाकया । तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदश्शतम् । जीवेम शरदश्शतम् । नन्दाम शरदश्शतम् । इत्यनेन वामनेत्रं विलिखेत् । यदाञ्जनं त्रैककुदंजातग् हिमवत उपरि । तेन वामां जेतेजसे भगाय च इत्यनेन नेत्रयोरञ्जनं दद्यात् । एवं देव्यादीनामपि दद्यात् । ततस्तिरस्करिणीं दूरीकृत्य पूर्वावस्थापितमङ्गलानि दर्शयेत् । ततो गन्धपुष्पधूपदीपनीराजनानि दद्यात् । अनन्तरं रत्नसिंहासनोपरि उत्तरपार्श्वे निधिं निक्षिप्य नृत्यगीतवाद्यदुंदुभिवाद्यवेदघोषैर्मन्दिरं विचित्रं कृत्वा पुण्याहजलेन "ओं नमो भगवते वासुदेवाय" इत्यनेन अष्टोत्तरशतवारमभिमन्त्र्य सुरभिमुद्रां प्रदर्श्य रत्नसिंहासनादधस्ता-त्तण्डुलोपरि सुगन्धिजलपूरितं श्रीफलाम्रपल्लवपिहितमुखं नववस्त्रा-च्छादितं कलशद्वयं स्थाप्य सिंहासनोपरि अष्टदलं पद्मं विलिख्य सुखास्तरणं कुर्यात् । पीताक्षतगौरसर्षपान्विकीर्य "रक्षोहणोवलगहनो वैष्णवान्खनामीदमहं तं वलगमुद्वपामि यन्नस्समानो यमसमानो निचखाने-दमेनमधरं करोमि योनस्स मानो यो समानोरातीयतिगायत्रेण छन्दसाव-बाडो वलगः किमत्र भद्रं तन्नौ सह विराडसि सपत्नहा संम्राडसि भ्रातृव्यहा स्वराडस्यभिमातिहा विश्वाराडसि विश्वासान्नाष्ट्राणाग् हन्ता" इति मन्त्रेण रक्षां कुर्यात् । ततो भगवन्तं यानमारोप्य नृत्यवाद्यघोषपूर्वकं "अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे । पृथिव्यास्सप्तधामभिः ।

अनेन लक्ष्मीपूर्वकं भगवन्तं निजं मन्दिरं प्रवेशयेत् । ततो ध्रुवन्ते राजा वरुणो ध्रुवं देवो बृहस्पतिः । ध्रुवन्त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् । पर्वत इवा विचाचलिः । इन्द्र इवेह ध्रुवस्तिष्ठ । इह राष्ट्रमुधारय । अभितिष्ठ पृतन्यतः । अधरे सन्तु शत्रवः । इन्द्र इव वृत्रहा तिष्ठ । इति मन्त्रेण रत्नसिंहासनोपरि सुस्थिरं प्रासादाभिमुखं भगवन्तं वामभागे देव्या सहितं स्थापयेत् । ततः प्रजापतेश्शरणमसि । ब्रह्मणश्छदिर्विश्वजनस्य छायासि सर्वतो मा पाहि । इति मन्त्रेण छत्रं समर्पयेत् । ततो यजमानहस्तेन गोदानं कारयेत् । ततो गन्धपुष्पधूपदीपैः पूजितां गामानीय सङ्कल्पं कुर्यात् । श्रीगोविंद—अमुकपक्षे अमुकतिथौ अमुकगोत्रो अमुकशर्मा अहं कृतैतद्भगवत्प्रतिष्ठासिध्यर्थं सुवर्णशृङ्गी रौप्यखुरीं ताम्रपृष्ठीं प्रवालोष्ठीं मुक्तापुच्छीं सवत्सां कांस्यदोहनामिमां गां अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यं संप्रददे इति जलसहितानक्षतान् ब्राह्मणहस्ते देवतीर्थेन दद्यात् । कृतैतद्गोदान (प्रतिष्ठार्थं) साद्गुर्णार्थमिदं हिरण्यममुकगोत्रायामुकशर्मणे सम्प्रददे इति पूर्ववद्दद्यात् । ततो विप्रं परिक्रम्य प्रणमेत् । समागतेभ्यो ब्राह्मणेभ्यो भूयसीं दक्षिणां दद्यात् । तत आचार्य उपविश्य मूलमन्त्रेण भूमिं प्रोक्ष्य, ओं यं शोषयामि । ओं रं दाहयादि । ओं वं प्लावयामि" इति विशोध्य भूतशुद्धिं कुर्यात् ॥

भूतशुद्धिप्रमाणवचनानि.

भूतशुद्धिं विना कर्तुर्जपहोमार्चनक्रियाः ।
भवन्ति निष्फलास्सर्वाः प्रकारेणाप्यनुष्ठिताः ॥ १ ॥
शिर आरभ्य पादान्तो देहेप्युत्पत्तिसंज्ञकः ।
संहारो विपरीतोऽन्यो मूर्धाङ्गे स्थितनाभिगः ॥ २ ॥

स्थितिन्यासो गृहस्थस्य संहारो वनिनो यतेः ।
ब्रह्मचारिण उत्पत्तिस्त्रियश्शूद्रस्य चेष्टदः ॥ ३ ॥
इति समर्चनचन्द्रिकायाम् ॥

भूतशुद्धिप्रकारः.

ओं लां नमः पराय सर्वात्मने नमः इति पादयोर्न्यस्य, घ्राण-वायुभ्यां गन्धतन्मात्रया सह पञ्चगुणां पृथ्वीमप्सु विलापयामीत्यप्सु-विलाप्य । ओं वां नमः पराय निवृत्यात्मने नम इत्युपस्थे न्यस्य जिह्वोपस्थाभ्यां रसतन्मात्रया सह चतुर्गुणमिपस्तेजसि विलापयामीति तेजसि विलाप्य । ओं रां नमः पराय विश्वात्मने नम इत्ति हृदये न्यस्य चतुष्पादाभ्यां रूपतन्मात्रया सह त्रिगुणं वायौ विलापयामीति वायौ विलाप्य । ओं यां नमः पराय पुरुषात्मने नम इति नासाग्रे न्यस्य, त्वक्पाणिभ्यां स्पर्शतन्मात्रया सह द्विगुणं वायुमाकाशे विलापयामीत्या-काशे विलाप्य । ओं षौन्नमः पराय परमेष्ठ्यात्मने नम इति मूर्ध्नि न्यस्य श्रोत्रवाग्भ्यां शब्दतन्मात्रया सह एकगुणं मनस्सहितमाकाश-महङ्कारे विलापयामीत्यहङ्कारे विलाप्य । अहङ्कारं महति विलापया-मीति महति विलाप्य, महान्तं प्रकृतौ विलापयामीति प्रकृतौ विलाप्य, प्रकृतिं तमसि विलापयामीति तमसि विलाप्य, तमः परमात्मनि विला-पयामीति तमः परमात्मनि विलाप्य । प्राणायामैनैकेन मूलमन्त्रं नाभौ न्यस्य, मन्त्रोद्भूतचण्डवाय्वाप्यायितनाभिदेशस्थवायुना शरीरमन्तर्बहिश्च शोषयामीति शोषयित्वा, पुनः प्राणायामेनैकेन मूलमन्त्रं हृदये न्यस्य मन्त्रो-द्भूतचक्राग्निज्वालोपब्रह्मितजाठराग्निना शरीरं तत्तत्वक्रमेण दाहयामीति दग्ध्वा, बद्धाञ्जलिः शरीरभस्मनोद्भूतं उद्यद्भास्करसङ्काशं जीवात्मानं मूर्धोपरि स्थिताष्टदळकमलासनासीनभगवद्रामपादाङ्गुष्ठे प्रवेशयामीति प्रविष्टं ध्यात्वा । पुनः प्राणायामेनैकेन मूलमन्त्रं मूर्ध्नि न्यस्य मन्त्रोद्भूत-

मूर्धोपरिस्थिताष्टदलकमलासनासीनभगवद्रामपादाङ्गुष्ठनखशीतांशुमण्डल - गळद्दिव्यामृतधारयाऽत्मानमभिषिच्य भगवद्रामपादाङ्गुष्ठादधस्थात्स्थापयित्वा, तद्धारया शरीरभस्मप्लावयामीति प्लावयित्वा, भगवन् त्वत्कैङ्कर्ययोग्यं दिव्यशरीरं मे देहीति भगवन्तं प्रार्थ्य, भगवत्कृपया दिव्यशरीरं लब्धं ध्यात्वा सृष्टिचिन्तनं कुर्यात् । ओं परायात्मने नमः । परमात्मनः प्रकृतिमुत्पादयामि । ओं, प्रकृत्यै नमः । प्रकृतेर्महान्तमुत्पादयामि । ओं महते नमः । महतः अहङ्कारमुत्पादयामि । ओं अहङ्काराय नमः । अहङ्काराच्छ्रोत्रवाग्भ्यां शब्दतन्मात्रया सह मनस्सहितमेक-(शब्द) गुणकमाकाशमुत्पादयामि । बद्धाञ्जलिर्ध्यात्वा, ओं षौन्नमः पराय परमेष्ठ्यात्मने नमः । इति मूर्ध्नि न्यस्य । ओं आकाशाय नमः । आकाशात्त्वक्पाणिभ्यां स्पर्शतन्मात्रया सह द्विगुणं वायुमुत्पादयामि । ओं यां नमः पराय पुरुषात्मने नम इति नासाग्रे न्यस्य ओं वायवे नमः । वायोश्चक्षुःपादाभ्यां रूपतन्मात्रया सह त्रिगुणं तेज उत्पादयामि । ओं रानमः पराय विश्वात्मने नम इति हृदये न्यस्य । ओं तेजसे नमः तेजसा जिह्वोपस्थाभ्यां रसतन्मात्रया सह चतुर्गुणा अप उत्पादयामि । ओं वां नमः पराय निवृत्यात्मने नमः इत्युपस्थे न्यस्य, ओं तोयाय नमः । अद्भ्यः घ्राणपायुभ्यां गन्धतन्मात्रया सह पञ्चगुणां पृथिवीमुत्पादयामि । ओं लां नमः पराय सर्वात्मने नम इति पादयोर्न्यस्य, ओं पृथिव्यै नम इति भूतसृष्टिं विचिन्त्य, पुनः प्राणायामेनैकेन मूलमन्त्रं मूर्ध्नि न्यस्य, मन्त्रोद्भूतमूर्धोपरिस्थिताष्टदळकमलासनासीनभगवद्रामपादाङ्गुष्ठनखशीतां - शुमण्डलगळद्दिव्यामृतधारया शरीरमन्तर्बहिश्च प्लावयामीति प्लावयित्वा परमात्मानं जीवात्मना सह हृदयकमले प्रविष्टं ध्यात्वा धृतोर्ध्वपुण्ड्रः धृतशङ्खचक्रलाञ्छनोऽस्मीति भावयित्वा, भगवानेव सर्वं कारयतीनुसन्धानं कुर्यात् । ओं षौं नमः पराय परमेष्ठ्यात्मने वासुदेवाय नम

इति शिरसि । ओं यां नमः पराय पुरुषात्मने सङ्कर्षणाय नम इत्यास्ये । ओं रां नमः पराय विश्वात्मने प्रद्युम्नाय नम इति हृदये । ओं वां नमः पराय निवृत्यात्मने अनिरुद्धाय नम इति गुह्ये । ओं लां नमः पराय सर्वात्मने नम इति पादयोः । एवं पञ्चोपनिषन्यासं कृत्वा भगवन्तं ध्यायेत् ॥

भगवद्ध्यानपूर्वकभगवदाराधनक्रमः.

वासुदेवमजं शान्तमुज्ज्वलं सन्ततोदितम् ।
अनादिमध्यनिधनमेकञ्चाप्यचलं स्थिरम् ॥ १ ॥
चिद्घनं परमानन्दं तमसः परमव्यम् ।
ज्ञानशक्तिबलैश्वर्यवीर्यतेजस्समन्वितम् ॥ २ ॥
अपाणिपादमस्पृश्यमचक्षुश्श्रवणादिकम् ।
सर्वतः करवाक्पादं सर्वतोऽक्षि शिरोमुखम् ॥ ३ ॥
गतागतविनिर्मुक्तं रविकोटिसमप्रभम् ।
चैतन्यं सर्वगं नित्यं व्योमातीतं तदद्भुतम् ॥ ४ ॥
चित्सामान्यं जगत्यस्मिन् मूलम (ष्टाक्षरं) त्रात्मकं परम् ।
एवं विधं सदाविष्णुमाह्लादं प्रणवात्मकम् ॥ ५ ॥
तं नियुज्य महाविष्णुं तद्विष्णौ विनियोजयेत् ।
विष्णुञ्च हृदये पद्मे समावाह्यार्चयेत्क्रमात् ॥ ६ ॥

देवस्य दक्षिणे पार्श्वे स्वस्य वामपार्श्वे पात्राणि पीठोपरि निवेश्य पूर्णकुम्भेषु गन्धजलं परिपूर्य तुलसीगन्धपुष्पाणि मूलेन निक्षिप्य यं शोषयामि । वं प्लावयामीति विशोध्य मूलमन्त्रेण सप्तकृत्वोऽभिमन्त्र्य अमृतमयं तोयमुत्पाद्य, अस्त्राय फडिति मन्त्रेण रक्षां कृत्वा सुरभिमुद्रां प्रदर्श्य अन्यानि पूजाद्रव्याणि स्वदक्षिणपार्श्वे निधाय प्रोक्ष्य शोषणादिभिर्विशोध्य आत्मनः पुरतः स्वास्तीर्णे पीठे आग्नेयमारभ्य प्रदक्षिण-

क्रमेण अर्घ्यपाद्याचमनस्नानीयपात्राणि निक्षिप्य तेषां मध्ये शुद्धोदक-पात्रं न्यसेत् । मूलमन्त्रेण प्रक्षाळ्य, यं शोषयामि । रं दाहयामि । वं प्लावयामीति प्रत्येकं विशोध्य, तानि संस्कृतेन पूर्णकुम्भतोयेन मूलेन पूरयित्वा तेषु गन्धपुष्पतुलसीदलानि निक्षिपेत् । सिद्धार्थाक्षत-कुशाग्रतिलगन्धयवपुष्पाण्यर्घ्यपात्रे विनिक्षिपेत् । दूर्वाविष्णुपर्णीश्यामाक-पद्मानि पाद्ये निक्षिपेत् । एलालवङ्गकङ्कोलजातीराचमनीयके निक्षिपेत् । कोष्ठमञ्जिष्ठहारिद्रमुराशेलेयचंपकवचाकचोरलामज्जानि स्नानीयपात्रे निक्षिपेत् । तदभावे मूलमन्त्रोच्चारणपूर्वकं तुलसीदलं निक्षिपेत् । अर्घ्यादिपञ्चपात्राणि स्पृशन् मूलमन्त्रेणाभिमन्त्रयेत् । ओं नमो भगवते अर्घ्यं परिकल्पयामि । ओं नमो भगवते पाद्यं परिकल्पयामि । ओं नमो भगवते आचमनीयं परिकल्पयामि। ओं नमो भगवते स्नानीयं परिकल्प-यामि । ओं नमो भगवते शुद्धोदकं परिकल्पयामि। इति पात्राणि परिकल्प्य, अर्घ्यपात्रादुद्धरिण्या जलमादाय, तुलसीगन्धपुष्पयुतं कृत्वा मुखसममुद्धृत्य तस्मिन् ओं विरजायै नम इति विरजामावाह्य, तज्जलं, अर्घ्यादिपञ्च-पात्रेषु कुम्भे च किंञ्चित्किञ्चित्प्रक्षिप्य शेषेण भगवद्विग्रहं सर्वाणि याग-द्रव्याणि आत्मानञ्च सम्प्रोक्ष्य आसनं परिकल्पयेत् । ओं आधार-शक्तये नमः । ओं प्रकृत्यै नमः । ओं अखिलजगदाधाराय कूर्मरूपिणे नारायणाय नमः । ओं भगवते अनन्ताय नागराजाय नमः । ओं भूम्यै नमः । इति पूर्वपूर्वस्योपरि उत्तरोत्तरं यथास्थानं ध्यात्वा गन्ध-पुष्पैरभ्यर्च्य प्रणमेत् । श्रीवैकुण्ठाय दिव्यलोकाय नमः । श्रीवैकुण्ठाय दिव्यजनपदाय नमः । श्रीवैकुण्ठाय दिव्यनगराय नमः । श्रीवैकुण्ठाय दिव्यविमानाय नमः । इति श्रीदिव्यवैकुण्ठचतुष्टयं ध्यात्वा गन्धपुष्पै-रभ्यर्च्य प्रणमेत् । वैकुण्ठे ओं आनन्दमयाय दिव्यमण्डपरत्नाय नमः । इति दिव्यमण्डपरत्नं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । तस्मिन् मण्डपे

ओं अनन्ताय नागराजाय आस्तरणभूताय नम इत्यनन्तं ध्यात्वा गन्ध-पुष्पैरभ्यर्च्य प्रणमेत् । अनन्तोपरि, धर्माय नमः । इत्याग्नेय्यां पीठपादं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं ज्ञानाय नम इति नैर्ऋत्यां विन्यस्तपीठपादं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं वैराग्याय नम इति वायव्यां विन्यस्तपीठपादं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं ऐश्वर्याय नम इति ईशान्यां विन्यस्तपीठपादं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं धर्माय पीठगात्राय नम इति प्राच्यां विन्यस्तपीठगात्रं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं अवैराग्याय पीठगात्राय नम इति पश्चिमायां दिशि विन्यस्तपीठगात्रं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं, अनैश्वर्याय पीठगात्राय नम इत्युत्तरस्यां दिशि विन्यस्तपीठगात्रं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं ऋग्वेदाय पीठवाहकाय नमः । ओं यजुर्वेदाय पीठवाहकाय नमः । ओं सामवेदाय पीठवाहकाय नमः । ओं अथर्वणवेदाय पीठवाहकाय नमः । इति पीठगात्रेषु विन्यस्तं वेदचतुष्टयरूपं पीठवाहकं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । पीठवाहकोपरि, ओं एभिः परिच्छिन्नतनवे पीठभूताय सदात्मकाय अनन्ताय नागराजाय नम इति पीठरूपेण विन्यस्तमनन्तं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । अनन्तोपरि ओं अष्टदळपद्माय नम इति विन्यस्तं पद्मं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । पद्मदलकेसरेषु । ओं वह्निमण्डलाय नमः । ओं सोममण्डलाय नमः । ओं सूर्यमण्डलाय नमः । इति मण्डलत्रयं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । पद्मस्य पूर्वपार्श्वस्थदले ओं विमलायै चामरहस्तायै नमः । इति विन्यस्तां चामरहस्तां ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । पद्मस्य आग्नेयकोणस्थले ओं उत्कर्षिण्यै चामरहस्तायै नम इति विन्यस्तां चामरहस्तां ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । पद्मस्य दक्षिणतले । ओं ज्ञानायै चामर-

हस्तायै नम इति विन्यस्तां चामरहस्तां ध्यात्वा गन्धपुष्पै—प्रणमेत् । पद्मस्य नैर्ऋत्यकोणदले क्रियायै चामरहस्तायै नम इति विन्यस्तां चामरहस्तां क्रियां ध्यात्वा गन्धपुष्पै ····· प्रणमेत् । पद्मस्य पश्चिमदले ओं योगायै चामरहस्तायै नम इति न्यस्तां चामरहस्तां ध्यात्वा गन्ध ····· प्रणमेत् । पद्मस्य वायव्यदले । प्रह्वायै चामरहस्तायै नम इति विन्यस्तां चामरहस्तां ध्यात्वा गन्ध ···· प्रणमेत् । पद्मस्योत्तरदले । ओं सत्यायै चामरहस्तायै नम इति विन्यस्तां चामरहस्तां ध्यात्वा गन्ध ····· प्रणमेत् । पद्मस्येशानदले । ओं ईशानायै चामरहस्तायै नम इति विन्यस्तां चामरहस्तां ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । भगवतः पुरतः कर्णिकापूर्वभागे ओं, अनुग्रहायै चामरहस्तायै नम इति विन्यस्तां चामरहस्तां ध्यात्वा गन्ध ····· प्रणमेत् । पद्मकर्णिकायां ओं जगत्प्रकृत्प्रकृतये दिव्ययोगपीठाय नम इति विन्यस्तं दिव्ययोगपीठं ध्यात्वा गन्ध ····· प्रणमेत् । योगपीठे ओं दिव्ययोगपर्यङ्काय नमः । इति विन्यस्तं योगपर्यङ्कं ध्यात्वा गन्ध ····· प्रणमेत् । दिव्ययोगपर्यङ्के ओं अनन्ताय नागराजाय सहस्रफणशोभिताय नमः । इति विन्यस्तं आस्तरणातपवारणरूपमनन्तं ध्यात्वा गन्ध ····· प्रणमेत् । पुरतो भगवत्पादपीठाय नमः । तदुपरि ओं भगवत्पादुकाभ्यां नमः । इति पुरतो विन्यस्तं पादपीठपादुकाञ्च ध्यात्वा गन्ध ····· प्रणमेत् । अनन्तोपरि देव्या सहितं भगवन्तमावाहयेत् । ओं वं यां नमः पुरुषात्मने नमः । इति भगवन्तं निवेश्य आवाह्य प्राञ्जलिस्सन् तादृशं तेजोमयं नारायणम् । ओं रं वां नमः पराय निवृत्यात्मने नमः । इति मन्त्रेण पीठस्थ बिम्बे सर्वतो व्याप्य स्थितं स्मरेत् । अनन्तरं बिम्बब्रह्मरन्ध्रं प्रणवेन पिहितं

भावयेत् । अनन्तरं बिम्बे न्यासं कुर्यात् । ओं पुरुषात्मने नमः । ओं प्राणात्मने नमः । इति बिम्बशिरसि हस्तं न्यसेत् । ओं प्रकृति-तत्त्वाय नमः । ओं बुद्धितत्त्वाय नमः । इति बिम्बहृदये हस्तं न्यसेत् । ओं शब्दतत्त्वाय नमः । इति बिम्बश्रोत्रयोर्हस्तं न्यसेत् । ओं स्पर्श-तत्त्वाय नमः । इति बिम्बत्वचि हस्तं न्यसेत् । ओं रूपतत्त्वाय नमः । इति बिम्बचक्षुषोर्हस्तं न्यसेत् । ओं रसतत्त्वाय नमः । इति बिम्ब-जिह्वायां हस्तं न्यसेत् । ओं गन्धतत्त्वाय नमः । इति बिम्बनासि-कायां हस्तं न्यसेत् ॥

अनन्तरं प्राणप्रतिष्ठां कुर्यात्.

ओं अयं पुरोभुवस्तस्य प्राणोभौ वायनोवसन्तः प्राणायनो गायत्री वासन्ती गायत्रियै गायत्रं गायत्रादुपाग्ं शुरुपाग्ं शोस्त्रि-वृत्रिवृतो रथंतरग्ं रथंतराद्वसिष्ठऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्यः आः, ह्रीं, क्रों हंसः श्रीमन्नारायणस्य महालक्ष्म्याश्च प्राणा इह प्राणा इह जीवः स्थितस्सर्वेन्द्रियाणि वाक्पाणिपादोपस्थ-पायुमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि सर्वे पाणा इहागत्य स्वस्तये सुखेन सुचिरं तिष्ठन्तु स्वाहा । इति मन्त्रेण सर्वेन्द्रियाणि हृदयञ्च स्पृशेत् ॥

अयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो मानस-स्त्रिष्टुग्ग्रैष्मीत्रिष्टुभ ऐडमैडादन्तर्यामाऽन्तर्यामात्पञ्चदशः पञ्चदशाद्बृहद्बृहतो भरद्वाजऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः । ओं ह्रां ह्रीं क्रौं हंसः । अस्य श्रीमन्नारायणस्य महालक्ष्म्याश्च इह जीव इह स्थितः सुखेन चिरं तिष्ठन्तु स्वाहा । अनेनहृदयं स्पृशेत् ॥

अयं पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्षाणि चाक्षुषाणि जगतीवार्षाजगत्या ऋक्षममृक्षमाच्छुक्रश्शुक्रात् सप्तदशस्सप्तदशाद्वैरूपं

त्रैरूपाद्विश्वामित्रऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः ओं आं ह्रीं क्रौं हंसः । श्रीमन्नारायणस्य महालक्ष्म्याश्च सर्वेन्द्रियाणि इहागत्य सुखेन चिरं तिष्ठंतु स्वाहा । अनेन सर्वेन्द्रियाणि स्पृशेत् । इदमुत्तरात्सुवस्तस्य श्रोत्रꣳ सौवꣳशरच्छ्रौत्यनुष्टुप् छारद्यनुष्टुभः स्वारꣳस्वारान्मन्थी मन्थिन एकविꣳश एकविꣳशाद्वैराजं वैराजाज्जमदग्निर्ऋषिः प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः आं ह्रीं क्रौं हंसः श्रीमन्नारायणस्य महालक्ष्म्याश्च वाङ्मनश्चक्षुश्रोत्रप्राणा इहागत्य सुखं चिरन्तिष्ठन्तु स्वाहा । अनेन वाङ्मनश्चक्षुश्रौत्रप्राणान् स्पृशेत् । इयमुपरिमतिस्तस्यै वाङ्मातीहेमन्तो वाच्यायनः पङ्क्तिर्हैमन्ती पङ्क्त्यै निधनवन्निधनवत आग्रयणमाग्रयणात्रिणवत्रयस्त्रिꣳशौत्रिणवत्रयस्त्रिꣳशाभ्यां शाक्करैवतैशाक्करैवताभ्यां विश्वकर्मर्षिः प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यः ओं आं ह्रीं क्रौं हंसः । अस्य श्रीमन्नारायणस्य महालक्ष्म्याश्च वागिहागत्य सुखं चिरं तिष्ठतु स्वाहा । अनेन मुखं स्पूशेत् ॥

एवं प्राणप्रतिष्ठां कृत्वा पञ्चोपनिषन्न्यासं कुर्यात् । ओं षौं नमः पराय परमेष्ठ्यात्मने नमः । इति भगवच्छिरः स्पृशेत् । ओं यां नमः पराय पुरुषात्मने नम इति भगवन्नासाग्रं स्पृशेत् । ओं रान्नमः पराय विश्वात्मने नम इति भगवद्धृदयं स्पृशेत् । ओं वां नमः पराय निवृत्यात्मने नम इति भगवद्गुह्यं स्पृशेत् । ओं लां नमः पराय सत्वात्मने नम इति भगवत्पादौ स्पृशेत् । मूलमन्त्रेण मन्त्ररत्नेन च वाक्पाणिपादोपस्थपायुमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि स्पृशेत् । इति भगवन्तं श्रियं चावाह्य, ओं नमो भगवते वासुदेवायेति मन्त्रेणात्माभिमुखं भगवन्तं भावयित्वा प्रणम्य, समाराधनाभिमुखो भवेति संप्रार्थ्य—

ब्रह्माद्यास्सकला देवा यन्नस्मर्तुमपीश्वराः ।
स एष भगवानद्य मम प्रत्यक्षतां गतः ॥ १ ॥

स्वागतं भगवन्नद्य मां तारयितुमागतः ।
धन्योऽस्म्यनुगृहीतोऽस्मि कृतार्थोऽस्मि कृपानिधे ॥ २ ॥
आवाहयामि लक्ष्मीशं परमात्मानमव्ययम् ।
पञ्चोपनिषदात्मानं दिव्यमङ्गळविग्रहम् ॥ ३ ॥
आतिष्ठतामिमां मूर्तिं मदनुग्रहकाम्यया ।
श्रिया सार्धं जगन्नाथो (देवो) दिव्यो नारायणऽप्रभुः ॥४॥ इति।

स्वागतं निवेद्य स्वागतं श्रीहरिं पश्येत् । दक्षिणतः ओं श्रीं श्रियै नमः । वामतः । ओं भूं भूम्यै नमः । पुरतः । ओं नीं नीळायै नमः । इति श्र्यादीन् ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं किरीटाधिपतये नमः । इति भगवतः पश्चिमे पार्श्वे चतुर्बाहुं चतुर्वक्त्रं मूर्ध्नि भगवत्किरीटधरं कृताञ्जलिपुटं किरीटाख्यं दिव्यपुरुषं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं किरीटमालायै आपीडात्मने नमः । इत्यापीडां भगवत्पश्चिमपार्श्वे ध्यात्वा गन्धपुष्पैरभ्वर्च्य प्रणमेत् । ओं दक्षिणकुण्डलाय मकरात्मने नमः । इति भगवतो दक्षिणभागे दक्षिणकुण्डलम् । ओं वामकुण्डलाय मकरात्मने नम इति भगवतो वामभागे वामकुण्डलं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं वैजयन्त्यै वनमालायै नमः । इति भगवत्पुरतो वनमालां ध्यात्वा गन्धाद्यैरभ्यर्च्य प्रणमेत् । ओं श्रीमत्तुलस्यै नम इति तुलसीं देवीं भगवत्पादमूले ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं हाराय सर्वाभरणाधिपतये नमः । इति हारात्मानं भगवत्पुरतो ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं श्रीवत्साय श्रीनिवासाय नमः । इति श्रीवत्सं भगवद्धृदयदक्षिणभागे ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं काञ्चीगुणोज्वलाय पीताम्बराय नमः । इति पीताम्बरं भगवत्कट्यां ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं नूपुराभ्यां नमः । पादयोः । ओं सर्वेभ्योङ्गदवलयाङ्गुलीयेभ्यो नमः ।

स्वस्वस्थानेषु सर्वेभ्यो भगवद्भूषणेभ्यो नमः । इति सुदर्शनात्मानं सुवर्णरक्तनेत्रं कृताञ्जलिपुटं भगवन्तमाह्वयन्तं तद्दर्शनानंदोपब्रह्मितमुखं मूर्ध्नि भगवच्चक्रं धारयन्तं ध्यात्वा। ओं नन्दकाय खड्गाधिपतये नमः । इति खड्गात्मानं भगवत्खड्गं शिरसि धारयन्तम् । ओं पद्माय नमः । इति पद्मात्मानं भगवत्पद्मं शिरसि धारयन्तं भगवतो दक्षिणभागे ध्यात्वा चक्रखड्गपद्मानि गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं पाञ्चजन्याय शङ्खाधिपतये नमः । इति शङ्खात्मानं सितवर्णं सितनेत्रं द्विभुजं कृताञ्जलिपुटं शिरसि शङ्खं धारयन्तम् । ओं कौमोदक्यै गदाधिपत्ये नमः । इति शिरसि गदां धारयन्तीं गदादेवीम् । ओं शार्ङ्गाय चापाधिपतये नमः । इति शार्ङ्गात्मानं शिरसि शार्ङ्गं धारयन्तं भगवतो वामभागे ध्यात्वा शङ्खगदाशार्ङ्गाणि गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं सर्वेभ्यो भगवद्दिव्यायुधेभ्यो नम इति सर्वाणि भगवद्दिव्यायुधानि ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत्। ओं सर्वाभ्यो भगवत्पादारविन्दसंवाहिनीभ्यो नमः । इति भगवत्पादारविन्दसंवाहनीर्ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं सर्वेभ्यो भगवत्परिचारकेभ्यो नम इति भगवत्परिचारकान्ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं अनन्ताय नागराजाय नम इति भगवन्तमनन्तं चतुर्भुजं हलमुसलधरं कृताञ्जलिपुटं फणामणिसहस्रमण्डितोत्तमाङ्गं श्रीभगवद्दर्शनानन्दब्रह्मितसर्वगात्रं भगवतः पृष्ठभागे ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं वारुण्यै नमः । इति वारुणीं अनन्तस्य दक्षिणपार्श्वे ध्यात्वा । ओं काञ्चयै नम इति काञ्चीमनन्तस्य वामपार्श्वे ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं सर्वेभ्यो भगवत्परिजनेभ्यो नमः इत्यनुक्तासङ्ख्येयपरिजनान्भगवत्पुरतो ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं भगवत्पादुकाभ्यां नम इति पीठस्य पुरतः पादुके ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं सर्वेभ्यो भगवत्परिच्छदेभ्यो नम इति

भगवत्परिच्छदान्समन्ततो ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं वैनतेयाय नम इति भगवदग्रे आसीनं द्विभुजं कृत्वाञ्जलिपुटं वैनतेयं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं रुद्रायै नम इति वैनतेयस्य दक्षिणपार्श्वे रुद्रां सुकीर्त्यै नम इति वैनतेयस्य वामपार्श्वे सुकीर्तिं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं विष्वक्सेनाय नम इति भगवतः प्रागुत्तरपार्श्वे दक्षिणाभिमुखं भगवन्तं विष्वक्सेनं चतुर्भुजं कृताञ्जलिपुटं नीलमेघनिभं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं सूत्रवत्यै नम इति विष्वक्सेनवामभागे विष्वक्सेनपत्नीं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं गं गजाननाय नमः । ओं जं जयत्सेनाय नमः । ओं हं, हरिवक्त्राय नमः । ओं कं कालप्रकृति-संज्ञाय नमः । ओं सर्वेभ्यो विष्वक्सेनपरिजनेभ्यो नमः । इति विष्वक्सेनपरिजनान् विष्वक्सेनपृष्ठभागे ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । पीठस्य पश्चिमोत्तरदिग्भागे, पराङ्कुश, परकाल, यतिवर, देशिकादीन्स्वाचार्यान्तान् गुरून् ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणवेत् । ओं चण्डाय द्वारपालाय नमः । ओं प्रचण्डाय द्वारपालाय नमः। इति पूर्वद्वारपार्श्वयोः चण्डप्रचण्डौ । ओं भद्राय द्वारपालाय नमः । ओं सुभद्राय द्वारपालाय नम इति दक्षिणद्वारपार्श्वयोर्भद्रसुभद्रौ । ओं जयाय द्वारपालाय नमः । ओं विजताय द्वारपालाय नम इति पश्चिम-द्वारपार्श्वयोर्जयविजयौ । ओं धात्रे द्वारपालाय नमः । ओं विधात्रे द्वारपालाय नम इत्युत्तरद्वारपार्श्वयोर्धातृविधातारौ ध्यात्वा गन्धपुष्पै-रभ्यर्च्य प्रणमेत् । ओं कुमुदाय गणाधिपतये सवाहनपरिवारप्रहणाय-नम इति पूर्वस्यां कुमुदम् । ओं कुमुदाक्षाय गणाधिपतये सवाहन-परिवारप्रहरणाय नम इत्यग्निकोणे कुमुदाक्षम् । ओं पुण्डरीकाय गणाधि-पतये सवाहनपरिवारप्रहरणाय नम इति दक्षिणे पुण्डरीकम् । ओं

वामनाय गणाधिपतये सवाहनपरिवारप्रहरणाय नम इति नैर्ऋत्ये वामनम् । ओं शङ्कुकर्णाय गणाधिपतये सवाहनपरिवारप्रहरणाय नम इति पश्चिमे शङ्कुकर्णम् । ओं सर्वनेत्राय गणाधिपतये सवाहनपरिवार-प्रहरणाय नम इति वायव्ये सर्वनेत्रम् । ओं सुमुखाय गणाधिपतये सवाहनपरिवारप्रहरणाय नम इत्युत्तरे सुमुखम् । ओं सुप्रतिष्ठिताय गणाधिपतये सवाहनपरिवारप्रहरणाय नम इतीशाने सुप्रतिष्ठितं ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । ओं सर्वेभ्यो भगवद्गणाधिपतिभ्यो नमः । ओं सर्वेभ्यो भगवत्पार्षदेभ्यो नमः । ओं नित्येभ्यो नमः । ओं मुक्तेभ्यो नमः । ओं समस्तपरिवाराय श्रीमते नारायणाय नमः । इति सर्वान् ध्यात्वा गन्धपुष्पैरभ्यर्च्य प्रणमेत् । परमव्योम, क्षीरार्णवा-दित्यमण्डल, हृदयकमल, मधुरा, द्वारकायोध्यादि, यथारुचिस्थानेष्वेव-स्थितं भगवन्तं नारायणं देवीभूषणायुधपरिजनपरिच्छदद्वारपालैस्सेव्य-मानः स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदं स्वाभाविकान-वधिकातिशयज्ञानबलैश्वर्यशक्तितेजःप्रभृत्यसङ्ख्येयकल्याणगुणौघमहार्णवं ध्यात्वा प्रणम्य मूलेन स्वात्मानं देवाय निवेद्य पुनः प्रणम्य अनुज्ञाय भगवत्पूजामारभेत ॥

अर्घ्यपात्रादुद्धरिण्यार्घ्यजलमादाय घ्राणसममुद्धृत्य भगवन् मत्-(मे) पूजाम्परिगृह्णीष्व इति प्रार्थ्य मुखे दर्शयित्वा भगवद्दक्षिणहस्ते तुलसीदलेन किञ्चित्प्रदाय प्रतिग्रहपात्रे निक्षिपेत् । स्वहस्तौ प्रक्षाळ्य, पादयोः पुष्पाणि दत्वा पाद्यपात्रादुद्धरिण्या जलमादाय घ्राणसममुद्धृत्य, भगवन् मत् (मे) पूजां प्रतिगृह्णीष्वेति प्रार्थ्य उत्तरवाक्यमुच्चरन् वा तुलसीदलेन भगवत्पादयोः किञ्चित्प्रदाय मनसा पादौ प्रक्षाळ्य प्रतिग्रहे तज्जले प्रक्षिपेत् । पादौ वस्त्रेण संमृज्य गन्धपुष्पाणि दत्वा आचमनपात्रादुद्धरिण्या जलमादाय घ्राणसममुद्धृत्य भगवन्मत्पूजां

प्रतिगृह्णीष्वेति प्रार्थ्य उत्तरवाक्यमुच्चरन् भगवद्दक्षिणहस्ते किञ्चित्प्रदाय प्रतिग्रहपात्रे प्रक्षिपेत् । ततो गन्धपुष्पधूपदीपाचमनमुखवासताम्बूलानि उत्तरवाक्यमुच्चरन् तुलसीदलेन दद्यात् । प्रणम्यात्मानमात्मीयञ्च सर्वं भगवन्नित्यकिङ्करत्वाय स्वीकुरु इति भगवते निवेदयेत् ॥

ततस्स्नानासनमानीय गन्धपुष्पैरभ्यर्च्य भगवन्तं प्रणम्य तुलसीदलेन मनसा पादुके दत्वा स्नानासने भगवन्तं मनसा उपवेशयेत् । तत्रोपविष्टे सति माल्यपुष्पवस्त्राभ्यपनीय स्नानशाटिकां प्रदाय तत्र उत्तरवाक्यमुच्चरन् पाद्याचमनानि दत्वा पादपीठार्थं तुलसीदलं दद्यात् । ततस्तुलसीकाष्ठेन गण्डूषमुखप्रक्षाळनं कारयेत् । तत उत्तरवाक्यमुच्चारन् आचमनं दत्वा आदर्शं दद्यात् । ततस्सुगन्धितैलेनाभ्यज्य माषमुद्गचूर्णेन भगवद्विग्रहसम्मर्दनं कृत्वा, आमलकचूर्णेन प्रक्षाळय हरिद्रोदकेन मङ्गळस्नानं कारयित्वा, स्नानीयपात्रजलेन मूलमन्त्रोच्चारणपूर्वकं पुरुषसूक्तेन स्नापयेत् । शाट्या सम्मृज्य, उत्तरवाक्यमुच्चरन् वस्त्रोपवीतपाद्याचमनपवित्रकेशप्रसाधनानि कुर्यात् । तत अलङ्कारासनम् । पुष्पैरभ्यर्च्य, अलङ्कारासनमासादयेति विज्ञाप्य तुलसीदलेन पादुके दत्वा तत्रोपविष्टं भगवन्तमुत्तरवाक्यमुच्चारयन् अर्घ्यपाद्याचमनभूषणगन्धपुष्पैरभ्यर्चयेत् । भगवते स्वात्मानं निवेद्य यथाशक्तिमूलमन्त्रं जपेत् । ततो देव्यादिसर्वपरिवाराणां अर्घ्यपाद्यालङ्कारासनं पूर्ववद्दद्यात् । ततो अर्घ्यादिपात्राणि प्रक्षाळ्य पूर्ववत्पूर्णकुम्भस्थजलेन पूरयित्वा, "मयि पर्वतपूरुषं–मयि पर्वतवर्चसं–मयि पर्वतभेषजं–मयि पर्वतायुषम् । यन्मे वर्चः परागतमात्मानमुपतिष्ठति । इदं तत्पुनराददे दीर्घायुत्वाय वर्चसे । प्रतिष्ठेस्तोदेवतानां मामासंतासम्" इति मन्त्रेण दर्पणं दद्यात् । ततो नृत्यगीतछत्रचामराद्युपचारान्मूलेन समर्पयेत् । धूरसि धूर्वधूर्वन्तं धूर्वतं योऽस्मान् धूर्वतितं धूर्वयं वयं धूर्वामस्त्वं

देवानामसीति मन्त्रेण धूपं दद्यात् । उद्दीप्यस्व जातवेदोपघ्नं निरऋतिं मम । पशूंश्च मह्यमावह जीवनं च दिशो दश । मानो हिंसीज्जातवेदो गामश्वं पुरुषं जगत् । अविध्रदग्न आगहि श्रीया मा परिपातय ।" इति दीपं दद्यात् । ततश्शुद्धं मधुसर्पिर्दधिक्षीरं शर्कराश्च पात्रे निक्षिप्य मूलेन विशोध्य अर्घ्यजलेन प्रोक्ष्य मुद्रां प्रदर्श्य, मूलमन्त्रोच्चारण-पूर्वकमवनतशिरा हर्षोत्फुल्लनयनो हृष्टरोमा भूत्वा मधुपर्कं प्रदाय आचमनं दद्यात् । ततो गां रत्नसुवर्णादिकं च यथाशक्ति दद्यात् ॥

ततस्सुसंस्कृतान्नमाज्याढ्यं दधिक्षीरमधूनि च ॥

फलमूलव्यञ्जनानि मोदकांश्चान्यानपि लोके प्रियतमान्यात्मनः श्रेष्ठानि शास्त्राविरुद्धानि संभृत्य भगवत्पुरतः शोधितस्थले स्थापयेत् । यं शोषयामि । रं दाहयामि । वं प्लावयामीति विशोध्य, अर्घ्यजलेन संप्रोक्ष्य, ओं नमः अस्त्राय फडिति मन्त्रेण रक्षां कृत्वा मूलमन्त्रेण परि-षेचनापोशनञ्च कारयेत् ॥

असत्यमशुचिं नित्यमपराधैकभाजनम् ।
अशक्तं चाप्यचैतन्यमनर्हं भृत्यकर्मणि ॥ १ ॥
दोषाकरं दुरात्मानं मामेवं परिचिन्तयन् ।
मत्समर्पितमित्येतन्न त्वमर्हस्युपेक्षितुम् ॥ २ ॥
कौसल्याकल्पितं गेहे कानने लक्ष्मणार्पितम् ।
पम्पायां शबरीदत्तं भरद्वाजार्पितञ्च यत् ॥ ३ ॥
नवनीतं घृतं क्षीरं व्रजे यत्स्वयमार्जितम् ।
यद्यन्नन्दयशोदाभ्यां यद्यद्गोपीभिरर्पितम् ॥ ४ ॥
यद्दत्तं व्रजपत्नीभिः यन्महेन्द्रेण कल्पितम् ।
यदर्पितं कुचेलेन यद्यद्विदुरकल्पितम् ॥ ५ ॥
अन्यद्वा यद्यदिष्टं ते नित्यमुक्तैर्निवेदितम् ।
श्रिया भूम्या च यद्दत्तं शठारिप्रमुखैश्च यत् ॥ ६ ॥

नाथार्ययामुनाचार्ययतीश्वरसमर्पितम् ।
त्वन्महिम्नोऽनुरूपञ्च त्वत्प्रियाणाञ्च यत्प्रियम् ॥ ७ ॥
यथा तथा स्वसङ्कल्पात् कल्पयित्वेदमेव हि ।
अतिप्रभूतमत्यन्तभक्तिपूतं चतुर्विधम् ॥ ८ ॥
पथ्यं पाकविशेषाढ्यं रुच्यं दोषविवर्जितम् ।
दिव्यं दृष्टिप्रियं स्वाद्यं सरसं सौरभोत्तमम् ॥ ९ ॥
सर्वोपचारपूर्वं यत्संपाद्य प्रेमपूर्वकम् ।
देवदेव तदेतत्ते ददौ वेदान्तदेशिकः ॥ १० ॥
अतस्तद्विषयप्रीतिप्रेरितः करुणानिधे ।
अत्रैवसन्निधाय्य त्वमखिलैस्सह भोक्तृभिः ॥ ११ ॥
अनन्यहृदयस्सम्यगासीनः परमासने ।
श्रीमन्नारायण स्वामिन् एतत्स्वीकर्तु मर्हसि ॥ १२ ॥

इति विज्ञाप्य गुरुपरम्परामनुसन्धाय मूलमन्त्रमष्टोत्तरशतवारं जप्त्वा ग्रासमुद्रया हविर्निवेदयेत् । ततो मध्ये मध्ये पानीयं दत्वा ततो मूलेन उत्तरापोशनहस्तशोधनगन्धपुष्पाद्याचमनमुखवासकर्पूरताम्बूलानि दद्यात् । पुनः प्रणम्य—

अनेनान्नाद्ययोगेन सम्यगाराधनेन च ।
पद्मनाभोरविन्दाक्षः प्रीतिमभ्येतु मेऽच्युतः ॥

इति विज्ञापयेत् । पुनर्मन्त्रासनं कूर्चेन मार्जयित्वा गन्धादिभिरभ्यर्च्य, ओं भगवत्पादुकाभ्यां नमः । इति पादुके चाभ्यर्च्य, भगवन्मन्त्रासनमासादयेति भगवन्निमे पादुके इति विज्ञाप्य, तत्रोपविष्टे अर्घ्यादि दत्वा फलाचमनमुखवासताम्बूलनृत्यगीतादिभिरभ्यर्च्य प्रणमेत् । भगवन्निवेदितं सर्वं शुद्धोदकेन श्रियै निवेदयेत् । श्रियै निवेदितं मनसा चतुर्धा विभज्य भूम्यै एकं नीलायै एकं अनन्तगरुडविष्वक्सेनादिभ्य एकं पराङ्कुश, परकाल, यतिवर, वेदान्तदेशिक-

स्वाचार्यपर्यन्तेभ्यः एकं शुद्धोदकजलेन निवेदयेत् । मूलमन्त्रेण अष्टोत्तरसहस्रदळैरभ्यर्चयेत् । ओं नर्यप्रजां मे गोपाय । अमृतत्वाय जविसे । जातां जनिष्यमाणां च । अमृते सत्ये प्रतिष्ठिताम् । अथर्वपितुं मे गोपाय । रसमन्नमिहायुषे । अदब्धायोशीतनो । अविषन्नः पितुं कृणु । शꣳस्य पशून्मे गोपाय । द्विपादो ये चतुष्पदः । अष्टाशफाश्च य इहाग्ने । ये चैकशफा आशुगाः । सप्रथसभां मे गोपाय । ये च सभ्यास्सभासदः । तानिन्द्रियावतः कुरु । सर्वमायुरुपासताम् । अहे बुध्नियमन्त्रम्मे गोपाय । यमृषयश्चैविदा विदुः । ऋचस्सामानि याजूꣳषि । सा हि श्रीरमृतासताम् । साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं वैराज्यं महाराजमाधिपत्यामिति मन्त्रेण तिरस्करणीमन्तरा कर्पूरेण नीराजनं कुर्यात् । तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रा सोविपन्यवो जागृवाꣳ सस्समिन्धते । विष्णोर्यत्परमं पदम् । पर्याप्या अनन्तरायाय सर्वस्तोमोतिरात्र उत्तममहर्भवति सर्वस्याप्त्यै सर्वस्य जित्त्यै सर्वमेव तेनाप्नोति सर्वं जयति " इत्यनेन मन्त्रपुष्पं दद्यात् । अनन्तरं देवस्य दक्षिणपार्श्वं समासाद्य—

नमो नमो वाङ्मनसातिभूमये
नमो नमो वाङ्मनसैकभूमये ।
नमो नमोऽनन्तमहाविभूतये
नमो नमोऽनन्तदयैकसिन्धवे ॥

अनेन अष्टवारं दण्डवत्प्रणम्य, बद्धाञ्जलिपुटो भूत्वा इमां गामुदीरयेत्—

भक्तवत्सल देवानामभिप्रेतार्थसाधक ।
प्रार्थये त्वामहं देव मदनुग्रहैकाम्यया ॥ १ ॥
सन्निधत्स्व चिरं स्थाने कल्पिते श्रद्धया मया ।
प्रसीद देवदेवेश पूजामपि गृहाण मे ॥ २ ॥

ग्रामस्य राज्ञो राष्ट्रस्य प्रजानामिन्दिरावह ।
देवतुष्टिं च पुष्टिं च गतिं च परमां तथा ॥ ३ ॥
नमस्तुभ्यं भगवते राघवाय महात्मने ।
रावणादिजगद्वैरिनिबर्हणमहौजसे ॥ ४ ॥
वृष्णिवर्याय कृष्णाय नमस्तुभ्यं मधुद्विषे ।
भूभारभूतकंसादिमहाबलिनिषूदिने ॥ ५ ॥
इति विज्ञापयेद्देवं वासुदेवं तु देशिकः ।

अनन्तरमाचार्यः मन्दिरस्य चतुर्दिक्षु बलीन् दद्यात् । फललाजदधिसक्तूनां चतुरः पिण्डान् कृत्वा तेष्वेकं हस्ते गृहीत्वा

आद्याश्च कर्मजाश्चैव ये भूताः प्राग्दिशिस्थिथाः ।
प्रसन्नाः परितुष्टास्ते गृह्णन्तु बलिकांक्षिणः॥ १ ॥

इति पूर्वस्यां बलिं दद्यात् । द्वितीयं पिण्डं हस्ते गृहीत्वा—

वृक्षेषु पर्वताग्रेषु ये विदिक्षु च संस्थिताः ।
भूमौ व्योम्नि स्थिता ये च बलिं गृह्णन्तु तेऽपि च ॥ २ ॥

इति दक्षिणायां दिशि बलिं दद्यात् । तृतीयं पिण्डं हस्ते गृहीत्वा—

विनायकाः क्षेत्रपालाः ये चान्ये बलिकांक्षिणः ।
पूषाद्याः पार्षदाश्चैव प्रतिगृह्णन्तु मे बलिम् ॥ ३ ॥

इति पश्चिमायां दिशि बलिं दद्यात् । चतुर्थं पिण्डं हस्ते गृहीत्वा—

चण्डाद्याः कुमुदाद्याश्च ये भूतास्सर्वतस्स्थिताः ।
आगच्छन्तु च ते सर्वे गृह्णन्तु तमिमं बलिम् ॥ ४ ॥

इत्युत्तरस्यां दिशि बलिं दद्यात् ॥

तत आचार्यः हस्तपादौ प्रक्षाळ्य आचम्य पवित्रपाणिः प्राणानायम्य शुद्धात्मा ध्यायेद्ब्रह्म सनातनम् । तत आचार्यो यागशालां प्रविश्य भगवत्प्रतिष्ठार्थमावाहितदेवताविसर्जनं करिष्ये इति सङ्कल्प्य

आवाहितदेवताभ्यो नम इति मन्त्रेण अर्घ्यपाद्याचमनगन्धपुष्पधूपदीप-नैवेद्यानि दत्वा—

यान्तु देवगणास्सर्वे पूजामादाय मामकीम् ।
इष्टकामप्रदानाय पुनरागमनाय च ॥

इति मन्त्रेण पूर्वस्थापितपालिकादेवताश्च विसर्जयेत् । अनन्तर-माचार्यः मन्दिरं प्रविश्य भगवन्तं प्रदक्षिणीकृत्य सुखासने उदङ्मुख उपविश्य अष्टोत्तरशतवारं मन्त्ररत्नं जपित्वा—

न धर्मनिष्ठोऽस्मि न चात्मवेदी
न भक्तिमांस्त्वच्चरणारविन्दे ।
अकिञ्चनोऽनन्यगतिश्शरण्य
त्वत्पादमूलं शरणं प्रपद्ये ॥

इति भगवन्तं प्रार्थयेत् ॥

अथ पुष्पाञ्जलिः.

ओं नर्यप्रजां मे गोपाय । अमृतत्वाय जीवसे । जातां जनिष्य-माणाञ्च । अमृते सत्ये प्रतिष्ठिताम् । अथर्वपितुं मे गोपाय । रसमन्न-मिहायुषे । अदब्धायोशीततनो । अविषन्नः पितुं कृणु । शꣳस्य पशून्मे गोपाय । द्विपादो ये चतुष्पदः । अष्टाशफाश्च य इहाग्ने । ये चैकशफा आशुगाः । सप्रथसभां मे गोपाय । ये च सभ्यास्सभा-सदः । तानिन्द्रियावतः कुरु । सर्वमायुरुपासताम् । अहेर्बुध्नियमन्त्रं मे गोपाय । यमृषयस्त्रैविदा विदुः । ऋचस्सामानि यजूꣳषि । सा हि श्रीरमृता सताम् । साम्राज्यं भोज्यं वैराज्यं स्वाराज्यं पारमेष्ठ्यं वैराज्यं महाराज्यमाधिपत्यमित्यनेन तिरस्करिणीं दूरीकृत्य महानीराजनं कुर्यात् । तत आचार्यस्सर्वे ऋत्विजः—

योऽपां पुष्पं वेद। पुष्पवान् प्रजावान्पशुमान्भवति। चन्द्रमा वा अपां पुष्पम्। पुष्पवान् प्रजावान् पशुमान्भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान्भवति। अग्निर्वा अपामायतनम्। आयतनवान्भवति। योऽग्नेरायतनं वेद। आयतनवान् भवति। आपो वा अग्नेरायतनम्। आयतनवान्भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान्भवति। वायुर्वा अपामायतनम्। आयतनवान्भवति। यो वायोरायतनं वेद। आयतनवान्भवति। आपो वै वायोरायतनम्। आयतनवान्भवति। य एवं वेद। योऽपामायतनं वेद आयतनवान्भवति। असौ वै तपन्नपामायतनम्। आयतनवान्भवति। योऽमुष्यतपत आयतनं वेद। आयतनवान्भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति चन्द्रमा वा अपामायतनं। आयतनवान्भवति। यश्चन्द्रमस आयतनं वेद। आयतनवान्भवति। आपो वै चन्द्रमस आयतनम्। आयतनवान्भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान्भवति। नक्षत्राणि वा अपामायतनम्। आयतनवान्भवति। यो नक्षत्राणामायतनं वेद। आयतनवान्भवति। आपो वै नक्षत्राणामायतनम्। आयतनवान्भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान्भवति। पर्जन्यो वा अपामायतनम्। आयतनवान्भवति। यः पर्जन्यस्यायतनं वेद। आयतनवान्भवति। आपो वै पर्जन्यस्यायतनम्। आयतनवान्भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान्भवति। संवत्सरो वा अपामायतनम्। आयतनवान्भवति। यस्संवत्सरस्यायतनं वेद। आयतनवान्भवति। आपो वै संवत्सरस्यायतनम्। आयतनवान्भवति य एवं वेद। योऽप्सुनावं प्रतिष्ठितां वेद। प्रत्येवतिष्ठति। इति मन्त्रेण पुष्पाञ्जलिं समर्पयेत्॥

ऐन्द्राग्नमुपसादितं। सर्वाभ्यो वा एष देवताभ्यो जुहोति योऽग्निहोत्रं जुहोति। यथा खलु वै धेनुं तीर्थे तर्पयति। एवमाग्निहोत्री

यजमानं तर्पयति। तृप्यति प्रजया पशुभिः। प्रसुवर्गं लोकं जानाति। पश्यति पुत्रम्। पश्यति पौत्रम्। प्रप्रजया पशुभिर्मिथुनैर्जायते। यस्यैवं विदुषोऽग्निहोत्रं जुह्वति। य उचैन देवं वेद। शतमानं भवति शतायुः पुरुषश्शतेन्द्रियं आयुष्येवेन्द्रिये प्रति तिष्ठति। आशास्ते यं यजमानोऽसौ। आयुराशास्ते। सुप्रजास्त्वमाशास्ते। सजातवनस्यामाशास्ते। उत्तरां दैवयज्यामाशास्ते। भूयो हविष्करणमाशास्ते। दिव्यं धामाशास्ते। विश्वं प्रियमाशास्ते। यदनेन हविषाशास्ते। आशिषमेवैतामाशास्ते पूर्णपात्रे। अन्ततोऽनुष्टुभा। चतुष्वद्वा एतच्छन्दः प्रतिष्ठितं पत्नियै पूर्णपात्रे भवति। अस्मिन् लोके प्रतितिष्ठानीति। अस्मिन्नेव लोके प्रतितिष्ठति। अथो वाग्वा अनुष्टुक्। वाच्मिथुनम्। आपो रेतः प्रजननम्। एतस्माद्वै मिथुनाद्विद्योतमानस्तनयान्वर्षति। रेतस्सिञ्चन्। प्रजाः प्रजनयन्। यद्वै यज्ञस्य ब्रह्मणा युज्यते। ब्रह्मणा वै तस्य विमोकः। अद्भिश्शान्तिः। विमुक्तं वा एतर्हि योक्रं ब्रह्मणा। आदायैनत्पत्नी सहाप उपगृह्णीते शान्त्यै। अञ्जलौ पूर्णपात्रमानयति। रेत एवास्यां प्रजां दधाति। प्रजया हि मनुष्यः पूर्णः। मुखं विमृष्टे। अवभृथस्यैवरूपं कृत्वोत्तिष्ठति। गो मृगकण्ठेन प्रथमामाहुतिं जुहोति। पशवो वै गोमृगः। रुद्रोग्निस्विष्टकृते। रुद्रादेव पशूनन्तर्दधाति। अथो यत्रैषाहुतिर्होयते। न तत्र रुद्रः पशूनभिमन्यते। अश्वशफेन द्वितीयमाहुतिं जुहोति। पशवो वा एकशफम्। रुद्रोऽग्निस्विष्टकृत्। रुद्रादेव पशूनन्तर्दधाति। अथो यत्रैषाहुतिर्हूयते। न तत्र रुद्रः पशूनभिमन्यते। अयस्मयेन कमण्डलुना तृतीयाम्। आहुतिं जुहोत्यायास्यो वै प्रजाः। रुद्रोग्निस्विष्टकृत्। रुद्रादेव प्रजा अन्तर्दधाति। अथो यत्रैषाहुतिर्हूयते। न तत्र रुद्रः प्रजा अभिमन्यते। अपश्यंत्वा मनसा चैकितानम्। तपसो जातं तपसो विभूतम्। इह प्रजामिह-

रयिगं् ररा णः प्रजायस्व प्रजाया पुत्रकाम । सहस्रमाख्यात्रे दध्याच्छतं प्रतिगरित्रेते ते वासने स्वेनस्याश्वतरो होतुः पुत्रकामाख्या-लभन्ते हि पुत्रान् लभन्ते हि पुत्रान् सर्वस्यात्तयै सर्वस्य । जित्यै सर्वमेव तेनाप्नोति सर्वं जयति । ऋध्यास्म हव्यैर्नमसोपसद्य । मित्रं धेवं मित्रधेयं नो अस्तु । अनूराधान् हविषा वर्धयन्तः । शतं जीवेम शरदस्सवीराः । नवो नवो भवति जायमानोह्नां केतुरुषसामेत्यग्रे । भागं देवेभ्यो विदधात्यायन् प्रचन्द्रमास्तरति दीर्घमायुः । शतमानं भवति शतायुः पुरुषश्शतेन्द्रिय आयुष्येवेन्द्रिये प्रतितिष्ठति । अनेन पीताक्षतान् समर्पयेयुः । ततः प्रदक्षिणीकृत्य दण्डवत्प्रणम्य पर्य-ङ्कासनमभ्यर्च्य पर्यङ्कासनमासादयेति भगवन्तं विज्ञाप्य पादुके च प्रदाय तत्रोपविष्टं भगवन्तं पाद्याचमनैरभ्यर्चयेत् । माल्यवस्त्रभूषणा-न्यपनीय विष्वक्सेनाय दत्वा । शयनोचितं सुखस्पर्शवासः तदुचित-भूषणानि उपवीतं दत्वा गन्धपुष्पधूपदीपमुखवासताम्बूलैरभ्यर्चयेत् ॥

चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि । तेन पवित्रेण शुद्धेन पूताः । अतिपाप्मानमरातिंतरेम । लोकस्य द्वार-मर्चिमत्पवित्रम् । ज्योतिष्मद्राजमानं महस्वत् । अमृतस्य धारा बहुधा दोहमानम् । चरणं नो लोके सुधितां दधातु इति मन्त्रेण पुष्पाञ्जलिं समर्पयेत् । स्वनियाम्यस्वरूपस्थितिप्रवृत्तिना स्वशेषतैकरसेन स्वकीयैश्च देहेन्द्रियान्तःकरणैस्स्वकीयकल्याणतमद्रव्यमयानौपचारिक-सांस्पर्शिकाभ्यवहारिकादिसमस्तभोगानतिप्रियतमानतिसमग्रानत्यन्त — भक्तिकृतानखिलपरिजनपरिच्छदान्विताय स्वस्मै स्वप्रीतये स्वयमेव प्रति-पादितवानित्यनुसन्धाय भगवन्तं अनुज्ञापयेत् । ततो हस्तपादौ प्रक्षाळ्य आचम्य यजमानहस्तेन प्रतिष्ठासाफल्यार्थं गोदानं कारयेत् । गन्धपुष्पधूपदीपैः पूजितां गामानीय सङ्कल्पं कुर्यात् । श्रीगोविन्द

गोविन्द गोविन्द अद्य अमुकमासे अमुकतिथौ अमुकगोत्रोऽमुक-शर्माहं कृतैतद्भगवत्प्रतिष्ठासाङ्गतासिध्यर्थं सुवर्णशृङ्गीं रौप्यखुरां ताम्र-पृष्ठीं प्रवालोष्ठीं मुक्तापुच्छीं सवत्सां कांस्यदोहनामिमां गां अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे । इति जलसहितानक्षतान् ब्राह्मणहस्ते देवतीर्थेन दद्यात् । कृतैतद्धोदानप्रतिष्ठार्थं इदं हिरण्य-ममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे । इति ब्राह्मणहस्ते जलाक्षतसहितं हिरण्यं दद्यात् । ततो विप्रं परिक्रम्य प्रणमेत् ॥

भोजयित्वा ततो विप्रान्सहस्रं तु शतं तु वा ।
दद्याद्वै दक्षिणां शक्त्या ऋत्विजः पूजयेत्ततः ॥ १ ॥

गोभूहिरण्यवस्त्राद्यैराचार्यं परितोषयेत् ।
महोत्सवं पञ्चदिनं यथाशक्त्यनुसारतः ॥ २ ॥

एवं प्रतिष्ठां कुर्वीत पञ्चरात्रोक्तमार्गतः ।
तत्र देवस्तु सान्निध्यं याति नारायणो हरिः ॥ ३ ॥

॥ श्रीः श्रीमते रामानुजाय नमः श्रीः ॥

प्रतिष्ठया सार्वभौमस्सद्मना भुवनत्रयम् ।
पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

॥ इति श्रीपाञ्चरात्रे पाद्मसंहितोक्ता भगवत्प्रतिष्ठापद्धतिस्सम्पूर्णा ॥

श्रीशैलवंशजातो वेङ्कटनामा लिलेख पाद्मोक्ताम् ।
परया मुदा प्रतिष्ठाप्रयोगसरणिं मधुद्विषो रम्याम् ॥

लक्ष्मीपुराभिजनपण्डितवृन्दवन्द्य
श्रीश्रीनिवासगुरुवर्यकृपात्तबोधः ।
मैसूरुपत्तननृपामरवाङ्निकेत-
वैखानसप्रथमबोधकनामयातः ॥

श्रीशैलवंशजनितो बहुळप्रबन्ध-
साहायकात्तिरुमलार्यसुधीः प्रबन्धम् ।
एतं व्यशोधयदसौ कमलानिवासः
प्रीणातु तेन परमः पुरुषः पुराणः ॥

॥ श्रीकृष्णार्पणमस्तु ॥

———

WD 132—GBPM—500—14-8-43.